गायत्री

पुष्प

८०१ से ९००

XI 2/633

Digitized by Arya Samaj Foundation Chennai and eGangotri

RA
661
भट्ट-ज

ओ३म्
पुस्तक संख्या ...... ६६१ / ६५(२)
पञ्जिका संख्या ४७,६४०

पुस्तक पर सर्व प्रकार की निशानियां लगाना वर्जित है। कोई सज्जन पन्द्रह दिन से अधिक देर तक पुस्तक अपने पास नहीं रख सकते। अधिक देर तक रखने के लिये पुनः आज्ञा प्राप्त करनी चाहिये।

गुरुकुल कांगड़ी विश्वविद्यालय
कृ... पुस्तक के ऊपर कोई निशान आदि
न लगायें।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

४४,६४०

६६१

पुस्तकालय

गुरुकुल काँगड़ी विश्वविद्यालय, हरिद्वार

वर्ग संख्या ६६१/४८८B आगत संख्या ४४,६४०

पुस्तक विवरण की तिथि नीचे अंकित है। इस तिथि सहित 30 वें दिन यह पुस्तक पुस्तकालय में वापस आ जानी चाहिए अन्यथा 50 पैसे प्रति दिन के हिसाब से विलम्ब दण्ड लगेगा।

CHECKED 1973

Initial

VISHWA VIDYALAYA GURUKULA KANGRI LIBRARY

Digitized by Arya Samaj Foundation Chennai and eGangotri

॥ श्रीः ॥

-*-

आनन्दवनविद्योतिसुमनोभिः सुसंस्कृता ॥
सुवर्णाऽङ्कितभव्याभशतपत्रपरिष्कृता ॥ १ ॥
चौखम्बा—संस्कृतग्रन्थमाला मञ्जुलदर्शना ॥
रसिकालिकुलं कुर्यादमन्दाऽऽमोदमोहितम् ॥ २ ॥

स्तबकः—२७७

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ज्ञानमानुभविकं तदा तज्ज्ञानस्यैव विशिष्टवैशिष्ट्यबोधप्रतिबन्धकत्वं वाच्यम् । एवं कदाचित् संयोगेनैव दण्डादिविशिष्टस्य प्रकारता कदाचित्सम्बन्धान्तरेणैव तद्विशिष्टस्येत्यत्रानुगतनियामककल्पनमपेक्ष्य तत्तत्सम्बन्धेन तत्तद्विशिष्टविषयकज्ञानस्य तादृशविशिष्टप्रकारकज्ञानेहेतुत्वकल्पनमुचितम् । एवं च किञ्चिद्विशिष्टविषयकज्ञानादिकल्पनागौरवं फलमुखतया न दोषायेत्यत आह अस्तु वेति ।

(दी०) अस्तु वा दण्डीत्यादिप्रत्यक्षे दण्डत्वादिना दण्डसंयोगवानित्यादौ च दण्डसंयोगत्वादिना यत्किञ्चिद्व्यक्तिज्ञानं कारणम् । दृष्टान्ताभावादिति । विशेषणज्ञानत्वेन हेतुत्वस्य विशेष्यज्ञानादेरपि कारणत्वापत्त्या मानाभावेन च निरस्तत्वादिति ।

(गा०) दण्डीत्यादौ दण्डत्वादिना यत्किञ्चिद्व्यक्तिज्ञानं कारणं न तु फलीभूतग्रहविशेषणव्यक्तिज्ञानपर्यन्तम् एतच्च दृष्टान्तविषयोक्तम् । नानाव्यक्तिविशेषणतावच्छेदकदण्डसंयोगवानित्यादौ अपूर्वदण्डादिज्ञानानपेक्षाया एव प्रकृतत्वात् । दण्डसंयोगत्वादिनेति । दण्डत्वसंयोगत्वादिनेत्यर्थः । तेन दण्डत्वादिना फलीभूतग्रहविशेषणतावच्छेदकदण्डादिव्यक्तिज्ञानानपेक्षालाभः । यथाश्रुते फलीभूतज्ञानविशेषणसंयोगादिव्यक्तिज्ञानानपेक्षामात्रलाभेनासङ्गतिप्रसङ्गात् । संयोगत्वादिना यत्किञ्चिज्ज्ञानकारणत्वाभिधानं तु पूर्ववत् दृष्टान्तविधया विशेषणतावच्छेदकप्रकारकज्ञानहेतुतायां तद्विशेषणविषयकत्वनिवेशे वह्निमानित्याद्यनुमितौ अपूर्ववह्न्यादिरूपविशेषणभानार्थमेव सामान्यप्रत्यासत्तेरावश्यकतया तदनिवेशस्य प्रागेव व्यवस्थापितत्वादिदानीं दृष्टान्तता ।

मूले विशिष्टवैशिष्ट्यज्ञानत्वादिति । विशिष्टप्रकारकज्ञानत्वादित्यर्थः । विशेषणान्तरविशेष्यतापन्नप्रकारकज्ञानत्वादिति यावत् । अतो दण्डत्वादिविशिष्टप्रतियोगिकत्वानवच्छिन्नवैशिष्ट्यविषयताशालिनो दण्डी पुरुष इति ज्ञानस्यापि सङ्ग्रहः । तदसङ्ग्रहे तादृशज्ञाने विशेषणज्ञानजन्यत्वानभ्युपगमात् हेत्वनभिधाने न्यूनतापातात् । न च तत्र विशेषणज्ञानजन्यतानभ्युपगमोऽपि न विवक्षित इति

Digitized by Arya Samaj Foundation Chennai and eGangotri

वाच्यम् । तथा सति तादृशबुद्धेर्दृष्टान्तत्वाप्रतिक्षेपात् ।

यद्यपि विशिष्टवैशिष्ट्यज्ञानस्य विशेषणतावच्छेदकप्रकारकज्ञानजन्यत्वमेव विशेषणज्ञानजन्यत्वानभ्युपगमे बीजं विशेषणतावच्छेदकप्रकारकज्ञानस्य च विशिष्टप्रतियोगिकवैशिष्ट्यावगाहिन्यामेव बुद्धौ हेतुता न तु विशिष्टविशेषणकज्ञानमात्रे । मणिकृता अवान्तरवाक्यार्थज्ञानं विनापि युगपत् सकलपदार्थसंसर्गावगाहिरक्तदण्डवान् पुरुष इत्यादिशाब्दबोधस्योपगमात् । स्वप्रकाशग्रन्थे ज्ञानत्वानिर्विकल्पकानन्तरं व्यवसायतृतीयक्षणे विशेष्ये विशेषणमित्यादिरीत्या जानामीत्याकारकविशिष्टज्ञानविशेषणकानुव्यवसायस्योपगतत्वाच्च । काञ्चनमयत्वादिविशिष्टवह्निप्रसिद्धिं विनापि काञ्चनमयवह्निमानित्यादिबुद्धेर्विशेष्ये विशेषणमित्यादिन्यायेन सम्भवस्य दीधितिकृता हेत्वाभासे वक्तव्यत्वात् । विशिष्टव्याप्तिज्ञानं विनापि विशिष्टपरामर्शोत्पादस्य मिश्रप्रभृतिभिः परामर्शग्रन्थे कथनात् । लाघवोपनीतयदर्थविशिष्टसाध्यप्रसिद्धिं विनापि तद्विशिष्टसाध्यविशेषणकानुमितेरुपगमाच्च । तथापि प्राचीनैर्विशिष्टोपस्थितिं विना विशिष्टप्रतियोगिकवैशिष्ट्यविषयकमपि विशिष्टविशेषणकज्ञानं नोपेयते मणिकृता विशिष्टाप्रसिद्ध्यैव काञ्चनमयत्वविशिष्टवह्न्यनुमित्यसम्भवस्य हेत्वाभासे कथनादिति नासङ्गतिः । अत एव साध्याप्रसिद्धिस्थले साध्यविशेष्यिकैवानुमितिरुपेयते न तु विशेष्ये विशेषणमित्यादिन्यायेनापि साध्यप्रकारिकेति ।

ननु तद्विशिष्टज्ञानत्वेन तज्ज्ञानत्वावच्छिन्नहेतुकत्वानुमाने मूलोक्तदृष्टान्ताभावो ज्ञानप्रत्यासत्तिस्वीकर्तृमते न सङ्गच्छते उपनीतभानस्यैव दृष्टान्ततासम्भवात् अतः स्वयं तत्र दूषणान्तरमाह । विशेषणेति । हेतुत्वस्येति । निरस्तत्वादित्यग्रिमेणान्वयः । कारणत्वापन्नस्येति । तद्विशेषणकबुद्धित्वस्येव तद्विशेष्यकबुद्धित्वादेरपि तद्विशेष्यकोपनीतभाने तज्ज्ञानत्वावच्छिन्नहेतुकत्वसहचरितत्वाल्लौकिकविशिष्टबुद्धिपूर्वं विशेषणगोचरस्येव विशेष्यगोचरस्यापि निर्विकल्पकस्य नैयायिकसंमततया व्यभिचारनिर्णयाविषयत्वाच्च तज्ज्ञानत्वावच्छिन्नजनकत्वानुमापकत्वसम्भवादिति भावः ।

प्रतिबन्देरनुत्तरतया दोषान्तरमाह । मानाभावेन चेति । विशिष्टज्ञानत्वे विशेषणज्ञानजन्यत्वानुमापकौपयिकतर्काभावेन

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

केत्यर्थः । मानाभावपर्यन्तानुसरणबीजं प्रतिबन्धेऽकिञ्चित्करत्वमित्याशयाविना दर्शयति ।

(दी०) एतेनास्तु विशेष्यज्ञानमपि कारणम्, जन्यतां निर्विकल्पकमपि सामान्यलक्षणया सर्वज्ञत्वापत्त्या तस्यास्तदजनकत्वे तु तत एव बाधकाच्च तत् कारणमिति निरस्तम् ।

(गा०) एतेनेति । ननु विशेष्यज्ञानत्वेन हेतुत्वे सामान्यलक्षणातोऽपि निर्विकल्पकस्वीकारप्रसङ्गः अज्ञातातीतानागतघटादिव्यक्तीनां प्रथमतो विशेष्यतया भानासम्भवादित्यत्रापीष्टापत्तिमाह । जन्यता चेति । सामान्यलक्षणायाः सामान्यप्रकारकसामान्याश्रयविषयकप्रत्यक्षत्वं जन्यतावच्छेदकं न तु सामान्यप्रकारतानिरूपितसामान्याश्रयविषयताकप्रत्यक्षत्वमतो ज्ञातधर्म्यंशे सामान्यप्रकारकप्राथमिकसामान्यज्ञानीयाज्ञातसामान्याश्रयनिष्ठप्रकारस्य विशेष्यतात्मकविषयताया अपि सामान्यप्रत्यासत्तिनियम्यतेति भावः । एतन्मते च संसर्गतानिरूपकतदीयविषयताशालिज्ञानत्वमेव तज्ज्ञानस्य जन्यतावच्छेदकं न तु तद्विशेष्यकज्ञानत्वतत्प्रकारकज्ञानत्वे कार्यकारणभावद्वयापत्तेः । संसर्गतानिरूपकत्वस्य प्रकारताविशेष्यतासाधारणत्वेनोक्तधर्मेणोभयसङ्ग्रहः । सौरभाद्यप्रकारकतन्मानसानुरोधेनापि ज्ञानप्रत्यासत्तेः स्वतन्त्रकारणत्वमेतन्मते नास्ति इच्छाकारणतयैवोपपत्तेः ।

न च विशेष्यज्ञानाहेतुतामतेऽपि तत्र सामान्यलक्षणया सौरभमानसम्भवात्तदनुरोधेन न ज्ञानप्रत्यासत्तिहेतुतेति वाच्यम् । यत्र नित्यत्वादिना सौरभत्वादिकमेवोपस्थितं न तु सौरभादिकमपि तत्र किञ्चिद्विशेष्यभासकप्रत्यासत्त्यन्तराभावेन सामान्यप्रत्यासत्त्यापि मानससौरभभानाजननात् सौरभत्वादिसामान्यलक्षणया मानसज्ञाने जननीये यत्किञ्चित्सौरभादिज्ञानसहकारितायाः आवश्यकत्वात् तदनुरोधेनैव ज्ञानप्रत्यासत्तेरेतन्मते हेतुत्वान्तरस्यावश्यकत्वादित्यवधेयम् ।

ननु सामान्यलक्षणया निर्विकल्पकजननोपगमे जातित्वादिसामान्यलक्षणया अज्ञातनिखिलजातिनिर्विकल्पकं जनयित्वा स्वरूपल-

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्तत्तज्जातिप्रकारकज्ञानं जनयिष्यते स्वरूपतस्तद्विशिष्टबुद्धिहेतुभूतस्य स्वरूपतस्तज्ज्ञानस्य सत्त्वात् । तादृशं च ज्ञानमसर्वज्ञस्यानुभवविरुद्धमत आह । सार्वज्ञापत्त्येति । यावत्प्रमेयभासकप्रमेयत्वादिसामान्यज्ञानतृतीयक्षणजातसंशयधर्मितावच्छेदकतत्तादिविशिष्टधर्मिज्ञानानन्तरं यत्र घटत्वादिरूपकोट्युपस्थितिस्तदुत्तरं स घटो न वेत्यादिसंशयः तत्र धर्मिज्ञाने सामान्यलक्षणाजन्यघटत्वादिनिर्विकल्पकात् घटत्वाद्यंशेऽन्याप्रकारकात् स्वरूपतोऽपि धर्मितावच्छेदकतत्तादिविशिष्टे घटत्वादिभानसम्भवेन समानप्रकारकनिश्चयसत्त्वेन स घटो न वेत्यादिसंशयानुपपत्त्येत्यर्थ इति सम्प्रदायः ।

अत्रेदं चिन्त्यते । सामान्यलक्षणया निर्विकल्पकाजननेऽपि यत्र धर्मिज्ञानात् पूर्वं स्वरूपतो घटत्वादिप्रकारिका उपस्थितिः तत्ताविशिष्टधर्मिधीरेव वा इदन्त्वादिविशिष्टे घटत्वाद्यंशे अन्याप्रकारकतत्प्रकारकसमूहालम्बनरूपा तत्रापि धर्मिज्ञानानन्तरं घटभेदाद्युपस्थित्या स घटो न वेत्यादिसंशयः कदाचिदनुभूयते तदनुपपत्तिर्दुर्वारैव तत्ताविशिष्टेऽपि तत्र घटत्वादेः स्वरूपतो भाने बाधकाभावात् ।

यदि च दूरत्वादिरूपसंशयजनकदोषात्तत्र तत्ताविशिष्टे स्वरूपतो घटत्वादेर्न विशिष्टधीरित्युच्यते तदा सामान्यलक्षणया निर्विकल्पकजननेऽपि तत एव तत्ताविशिष्टे घटत्वादेरभानान्न स घटो न वेति संशयानुपपत्तिः ।

वस्तुतस्तूपनीतभाने दूरत्वादिदोषो न प्रतिबन्धकः तथा सति दूरस्थे धर्मिणि घटत्वादिसंशयस्याप्यनुपपत्तेः । न हि निश्चयत्वं दोषप्रतिबध्यतावच्छेदकं तस्य कार्यतानवच्छेदकत्वात् । तथा च दर्शितस्थले तत्ताविशिष्टे घटत्वादेरुपनीतभानात्मकनिश्चये बाधकाभावः ।

न च धर्मिज्ञानस्य संशयहेतुतायाः संशयत्वस्य कार्यतावच्छेदकत्वानभ्युपगन्तृभिरनभ्युपगमादुक्तधर्मिज्ञानमेव संशयरूपं भविष्यतीति न संशयानुपपत्तिरिति वाच्यम् । विपरीतकोट्युपस्थितेः प्रागसत्त्वेन प्रथमं संशयासम्भवात् । तस्माद्धर्मिविशेषे स्वरूपतो घटत्वाद्युपनीतभाने अननुगततत्तदुपनायकज्ञानव्यक्तीनामेव हेतुत्वं स्वीकरणीयमिति सामान्यलक्षणया निर्विकल्पकजननेऽपि तस्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

स्वरूपतो घटत्वाद्युपनायकतानभ्युपगमान्नोक्तसंशयानुपपत्तिरिति
तस्मात् सार्वज्ञापर्यत्यस्य प्रमेयत्वादिसामान्यज्ञानतृतीयक्षणे घट-
त्वादिरूपयावदखण्डधर्माणां स्वरूपतः प्रकारतया भानापत्तेरित्यर्थः ।
येन पुंसा लौकिकसन्निकर्षेण घटत्वादिकं कदापि न गृहीतं घट
इत्याद्याकारकतदीयज्ञानस्यानुभवविरुद्धतया इष्टापत्तेरयोगात् ।

न च उपनायकज्ञानस्योक्तयुक्त्या अननुगतरूपेण हेतुत्वे अस्या
अप्यापत्तेर्नावकाशः । स्वरूपतो विशेषणविषयकधीसहकृतज्ञान-
प्रत्यासत्तिबलादेव तादृशज्ञानस्यापादनीयत्वात् । सामान्यलक्ष-
णाघटितायाः सामग्र्याः सामान्याश्रयप्रकारताप्रयोजकत्वानभ्यु-
पगमात् ज्ञातसामान्याश्रयप्रकारकज्ञानस्य ज्ञानप्रत्यासत्तित एव
सर्वत्र निर्वाहात् कथञ्चिदुक्तापत्तिसम्भवे संशयानुपपत्तेरपि दुर्वार-
त्वादिति वाच्यम् । यतो धर्मिज्ञानात् पूर्वं यत्राविशेषितघट-
त्वादिकमेवोपस्थितं तादृशोक्तस्थले संशयधर्मितावच्छेदकत-
याविशिष्टे निर्विशेषणकघटत्वाद्युपनीतभानवारणाय सधर्मि-
तावच्छेदकक एव तादृशोपनीतभाने उपनायकज्ञानस्यानु-
गतरूपेण हेतुता स्वीक्रियते न तु निर्धर्मितावच्छेदकके तत्रानुगत-
सामग्रीस्वीकारे संशयानुपपत्त्यादिरूपानिष्टप्रसङ्गविरहात् । तथा
च सामान्यलक्षणाया निर्विकल्पकजनकत्वमते निर्धर्मितावच्छेदक-
कोक्तज्ञानापत्तिर्दुर्वारैव ।

न च निर्धर्मितावच्छेदककोपनीतभानसामग्र्या अपि नानुगम-
सम्भवस्तथा सत्युपस्थितानां वस्तूनां सन्निकृष्टयावद्वस्तुष्वेव उप-
नीतभानापत्त्या उपनीतभानमात्रस्यैव भ्रमत्वप्रसङ्गादिति वाच्यम् ।
एतादृशातिप्रसङ्गवारणाय यत्र यस्य बाधितत्वं तत्र तदुपनीतभान-
सामग्र्या अनुगमासम्भवेऽपि तदाश्रयधर्मिकतदुपनीतभानसामग्र्या
अनुगमोपगमे बाधकाभावात् ।

एतेन लौकिकप्रत्यक्षे स्वरूपतो घटत्वादिभासकं तद्व्यञ्जकस-
न्निकर्षविशेषादिकमेव केवलजातिमानित्याकारकघटत्वादिलौकि-
कप्रत्यक्षानुपगमात् । अन्यथा जातिमत्त्वाद्युपस्थितिसत्त्वे प्रहराव-
धि निरीक्ष्यमाणेऽपि घटे अयं घटो न वेति संशयविच्छेदानुपप-
त्तेः । उपनीतभानसामग्री चाननुगतैवेति घट इत्याकारकोपनीत-
भाने अनियम इति स्वरूपतस्तत्प्रकारकबुद्धौ स्वरूपतस्तज्ज्ञान-

हेतुत्वं तदेकयुक्तिकं निर्विकल्पकं च विलीयेतेति निरस्तम् । बाधितस्थलेऽननुगतत्वेऽपि अबाधितस्थले तस्यानुगतत्वात् । एवं च स्वरूपतस्तत्प्रकारकोपनीतभाने स्वरूपतस्तद्विषयकज्ञानहेतुत्वे सिद्धे तत्रैव लाघवाल्लौकिकान्यत्वमनिवेश्य स्वरूपतस्तत्प्रकारकज्ञानत्वावच्छिन्नं प्रति स्वरूपतस्तद्विषयकज्ञानत्वेन हेतुत्वं कल्प्यते प्रथमतो जातित्वाद्युपस्थितिस्थले लौकिकसामग्रीतो जातित्वेन घटत्वप्रत्यक्षेऽपि निर्विकल्पकीयघटत्वविषयत्वोपगमे बाधकाभावात् तन्मूलिकैवायं घट इति धीः स्वरूपतस्तद्विषयकज्ञानत्वावच्छिन्नं प्रति स्वरूपतस्तद्विषयकज्ञानत्वेन हेतुत्वे निर्विकल्पकास्वीकारे प्राथमिकविशिष्टबुद्धौ व्यभिचारः, निर्विकल्पकस्वीकारे च तत्रैव व्यभिचार इति स्वरूपतस्तत्प्रकारकत्वमेव कार्यतावच्छेदकमिति ।

तस्याः । सामान्यलक्षणायाः । तदजनकत्वे । तन्निर्विकल्पकाजनकत्वे । तत एव बाधकात् । सामान्यप्रत्यासत्तिजप्राथमिकाज्ञातविशेष्यकप्रत्यक्षे व्यभिचारात् । तत् । विशेष्यज्ञानम् । न कारणम् । न सम्भवत्कारणताकम् । तथा च तावतैव प्रतिबन्द्युद्धार इति विशेषणज्ञानहेतुत्वं निष्प्रत्यूहमिति भावः ।

निरस्तमिति । यद्यपि विशेषणज्ञानहेतुत्वे ज्ञानलक्षणायाः स्वतन्त्रकारणता नास्तीति लाघवं तन्मुख्यविशेष्यकमानसतदुपनीतभानेऽपि नियमतः स्वांशे तादात्म्यसम्बन्धेन तत्प्रकारकत्वोपगमात् । तद्प्रकारकत्वे लौकिकविषयतान्यतद्विषयताया एव ज्ञानलक्षणाजन्यतावच्छेदकत्वावश्यकत्वात् । सामान्यस्य प्रत्यासत्तितामते सामान्यप्रत्यासत्तिज्ञाततद्विशेष्यकमानसे व्यभिचारेण ज्ञानप्रत्यासत्तिहेतुताया एवासम्भवात् । तथापि विशिष्टप्रत्यक्षत्वस्यैव विशेषणज्ञानजन्यतावच्छेदकत्वसम्भवेन विशिष्टबुद्धित्वस्यानुमित्यादिसाधारणस्य तज्जन्यतावच्छेदकत्वमप्रामाणिकमित्यनुमित्यादावपूर्वभानानुरोधेन न सामान्यप्रत्यासत्त्यादर इत्यवधेयम् । ननु प्रसिद्धधूमेऽव्यभिचारनिश्चयसत्त्वेन तत्र व्यभिचारसंशयायोगात् धूमान्तरधर्मिक एव व्यभिचारसंशयो वाच्यः । तादृशस्य च धर्मिणो भानं न सामान्यप्रत्यासत्तिमन्तरेणेति मूलसिद्धान्तो धर्मिज्ञानस्य संशयहेतुतायामेवोपपद्यते सैव मीमांसकानां नानुमता अत एव तेषां स्वतःप्रामाण्यवादिनामप्यज्ञात एव ज्ञानरूपे धर्मिणि प्रामाण्य संशयनिर्वाहः ।

Digitized by Arya Samaj Foundation Chennai and eGangotri
CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न च तुरगाद्यो वेगेन गच्छत इन्द्रियसन्निकर्षादिशालिनामनन्तधर्मिणां कस्मिंश्चिदेव धर्मिणि संशयो न सर्वत्रेति नियमानुरोधात्तद्धर्मिकसंशये तत्र धर्मिज्ञानहेतुत्वमावश्यकमिति वाच्यम् । इन्द्रियसन्निकर्षान्निरस्ते कस्यचिदेव धर्मिणो ज्ञानमित्यत्र नियामकस्य दुर्वचतया धर्मिज्ञानहेतुत्वेऽपि उक्तस्थले संशये धर्मिणि नियमस्योपपादयितुमशक्यत्वात् ।

न च तत्तत्सन्निकर्षादिव्यक्तीनां तत्तद्धर्मिज्ञाने विशिष्य हेतुताकल्पनाद्धर्मिणां संशयजनकज्ञानविषयतानियम इति वाच्यम् । तथा सति संशयीयधर्मिविषयताया अपि तत एव नियमोपपत्तेर्धर्मिज्ञानहेतुत्वासिद्धेः ।

न च संशयात्मकधर्मिज्ञाने अननुगततत्तत्सन्निकर्षादिव्यक्तीनां हेतुतापेक्षया लाघवेन तथानुगतधर्मिज्ञानहेतुत्वे सिद्धे तद्बलाच्च संशयपूर्वं तद्विषयधर्मिविषयकज्ञानान्तरसिद्धौ तत्र संशयाविषयधर्मिविषयतावारणाय तत्र तत्तत्सन्निकर्षादिव्यक्तीनां हेतुताकल्पने गौरवं फलमुखतया न दूषणमिति वाच्यम् । सन्निकृष्टेष्वनेकधर्मिषु यत्र न संशयः तादृशधर्मिणां कियतामपि भानस्यानुभविकतया अनुगतधर्मिज्ञानहेतुतया संशये धर्मिविषयतानियमानुपपत्तेः ।

अथ साधारणादिधर्मवद्धर्मिज्ञानं संशये धर्मिविषयतानियामकं साधारणधर्मवत्त्वेन धर्मिज्ञाने च नियामकान्तरमुभयसिद्धमेव अत एव ज्ञातेष्वपि धर्मिषु क्वचिदेव धर्मिणि कस्यचिदेव धर्मस्य संशय इति नियमोऽप्युपपद्यते तत्तदभावसहचरितधर्मवत्ताज्ञानविषयतायास्तत्संशयविषयताप्रयोजकत्वात् ।

एतेन न तत्तद्विशेष्यकत्वविशिष्टबुद्धित्वावच्छिन्नोत्पत्तौ तत्तद्विशेष्यभासकसामग्रीणां चाक्षुषस्पार्शनादिभेदेनाननुगतानां गुरुशरीराणां च प्रयोजकत्वमपेक्ष्य तत्तद्विशेष्यविषयकज्ञानाव्यवहितप्राक्क्षणवृत्तित्वविशिष्टस्यानुगतरूपेण हेतुतां कल्पयित्वा प्रयोजकत्वकल्पनमेव तद्धेतोरेवेति न्यायात् लाघवादुचितमिति तत एव संशये विशेष्यभाननियम इति मिश्रानुसारेण धर्मिज्ञानहेतुताखण्डनमप्यपास्तम् । तावता साधारणधर्मदर्शनाद्यविषये ज्ञायमाने धर्मिणि संशयाविषयत्वानिर्वाहात् ।

न च तद्धर्मिकसाधारणधर्मवत्ताज्ञानसामग्रीत्वेनैव तद्धर्मिकसं-

Digitized by Arya Samaj Foundation Chennai and eGangotri

शयहेतुत्वमात्तामिति वाच्यम् । तादृशज्ञानसामग्रीत्वापेक्षया तादृशज्ञानत्वस्यातिलघुत्वात् ।

न चैतादृशसामग्रीत्वस्य गुरुशरीरत्वेऽपि तदवच्छिन्नस्य नियतपूर्ववर्तितायाः क्लृप्तत्वात्तदनन्यथासिद्धत्वमात्रं कल्पनीयमिति लाघवं तादृशज्ञानस्य तु उभयमेव कल्पनीयमिति सामग्रीहेतुत्वमेवोचितमिति वाच्यम् । साधारणधर्मदर्शनादिविशिष्टसंशयत्वरूपतत्कार्यतावच्छेदकाभिमतधर्मावच्छिन्नं प्रति तादृशज्ञाननियतपूर्ववर्तिताया अप्युभयवादिसिद्धत्वात् ।

न च संशये साधारणधर्मादिज्ञानस्य हेतुत्वेऽपि उक्तस्थले सन्निकर्षादिशालिसकलधर्मिषु प्रत्येकं तत्तत्कोटिविशिष्टबुद्ध्यापत्तिर्दुर्वारैवेति तत्तद्धर्मिकतत्तद्धर्मविशिष्टबुद्धौ अननुगतनियामककल्पनमावश्यकं तत एव च तत्तद्धर्मिकसंशयस्यापि नियमनिर्वाहात् संशयसाधारणधर्मवत्ताज्ञानहेतुताकल्पनमयुक्तम् । अत एव संशयत्वस्य सामग्रीसमाजनियम्यतया न कार्यतावच्छेदकत्वमिति नवीनमतनिर्वाह इति वाच्यम् । संशयत्वावच्छिन्नं प्रति साधारणादिधर्मवत्ताज्ञानस्याहेतुत्वेऽपि आरोपसाधारणतत्तद्धर्मिकतत्तत्कोटिविशिष्टबुद्धौ तत्तत्कोटिसहचरितधर्मादिमत्तत्तद्धर्मिज्ञानस्य हेतुतायाः आरोपे धर्मिभाननियमावश्यंकल्पनीयतया तत एव संशये धर्मिज्ञानस्यापेक्षणीयत्वात् । मैवम् । संशये धर्मितावच्छेदकभाननियमाय तत्तद्धर्मावच्छिन्नधर्मिकसंशये तत्तद्धर्मावच्छिन्नधर्मिकसाधारणादिधर्मज्ञानस्य हेतुताया आवश्यकत्वात् यादृशधर्मावच्छिन्ने क्वचिद्धर्मिणि साधारणादिधर्मदर्शनं तत्तद्धर्माश्रयेन्द्रियसन्निकर्षादिशालिसकलधर्मिणामेव तेन रूपेण संशयविषयतोपगमात्तत्तद्धर्मिविषयकत्वमन्तर्भाव्य साधारणादिधर्मिज्ञानस्य हेतुताया अकल्पनात् ।

(चि०) उच्यते । यदि सामान्यलक्षणा नास्ति तदा अनुकूलतर्कादिकं विना धूमादौ व्यभिचारसंशयो न स्यात् । प्रसिद्धधूमे वह्निसम्बन्धावगमात् कालान्तरीयदेशान्तरीयधूमस्य मानाभावेनाज्ञानात् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सामान्येन तु सकलधूमोपस्थितौ धूमान्तरे विशेषादर्शनेन संशयो युज्यते ।

(दी०) प्रसिद्धधूम इत्यादि । धर्मिज्ञानस्य संशयहेतुत्वानङ्गीकारेऽपि संशये एव धर्मिभानार्थं सा स्वीकार्या धर्मितावच्छेदकप्रकारकज्ञानस्य प्रत्यासत्तित्वाभ्युपगमे त्वविवादात् । तद्धर्मप्रकारकज्ञानस्य तद्धर्माश्रयप्रत्यासत्तित्वोपगमात् ।

(गा०) समानधर्मिकसाधारणादिधर्मज्ञानाद्यनुरोधेन सामान्यप्रत्यासत्तिसिद्धेरयोगात् धूमत्वादिना प्रसिद्धधूमादिषु साधारणादिधर्मज्ञानादेवाप्रसिद्धधूमादौ धूमत्वादिना व्यभिचारसंशयोपपत्तेरित्यालोच्य धर्मिज्ञानहेतुत्वेऽपि सामान्यप्रत्यासत्तेरावश्यकतामाह । धर्मिज्ञानस्येति । सा । सामान्यप्रत्यासत्तिः । स्वीकार्येति । संशयस्यापि प्रत्यक्षतया तत्राप्रत्यासन्नस्य भानासम्भवादिति भावः ।

ननु विशिष्टानुयोगिकवैशिष्ट्यबोधे विशेष्यतावच्छेदकप्रकारकज्ञानहेतुत्वमावश्यकं तत्र च सधर्मितावच्छेदककबुद्धित्वमेव कार्यतावच्छेदकमुपेयते लाघवात् । एवं च सामान्यप्रत्यासत्त्यनभ्युपगमेऽपि न क्षतिः । धर्मितावच्छेदकप्रकारकज्ञानजन्यतावच्छेदकगर्भे एव तत्तद्धर्मावच्छिन्नधर्मिविषयत्वानिवेशात्तज्ज्ञानस्यैव धर्मिभासकप्रत्यासत्तित्वसम्भवादत आह । धर्मितावच्छेदकेति । अविवादमेव स्फुटयति । तद्धर्मेति ।

न चैवमपि संशयान्यथाऽसिद्धाने यावद्धूमादिविषयकत्वं न सिध्यतीति वाच्यम् । धूमत्वप्रकारकज्ञानस्य धूमभासकतायां विपरीतकोटिभानसामग्र्याः प्रयोजकत्वाकल्पनेन निश्चयेऽपि तद्बलात् सकलधूमभाने बाधकाभावात् विपरीतनिश्चयस्य धर्मितावच्छेदकसामानाधिकरण्यमात्रावगाहिविशिष्टधीप्रतिबन्धकतायां तत्समानविषयकत्वमात्रं तद्धर्मितावच्छेदकघटितधर्मावच्छेदेन विरोधिविषयकत्वविशिष्टं तत्समानविषयकत्वं वा न प्रयोजकं अपि तु शुद्धधर्मितावच्छेदकावच्छेदेन विरोध्यवगाहित्वमेवेति व्यवस्थापयन् संशयानुपपत्तिरूपमूलोक्तसामान्यप्रत्यासत्तियुक्तिं दूषयितुमुपक्रमते । अत्र वदन्तीति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(दी०) अत्र वदन्ति। प्रसिद्धधूमे धूमत्वेन व्याप्तिज्ञानमेतद्धूमत्वेन वा ? आद्ये संशयोऽसिद्धः। द्वितीये धूमत्वावच्छेदेन व्याप्तिग्रहस्यैव तद्विरोधितया संशयो नानुपपन्नः। कथमन्यथा पृथिव्यादिरूपे वायुत्वाभावव्याप्यतानिर्णयेऽपि रूपं वायुत्वाभावव्यभिचारि न वेत्यादिसंशयः। न चातिरिक्तसम्भावनया तथा, विशेषतश्चोपस्थितानामतिरिक्तानां विशेषदर्शनाक्रान्ततया अतिरिक्तान्तरोपस्थितये अवश्यं सा स्वीकरणीयेति वाच्यम्।

(गा०) धूमत्वेन। शुद्धधूमत्वावच्छेदेन। एतद्धूमत्वेन। महानसीयधूमत्वावच्छेदेन। व्याप्तिज्ञानमिति। प्रसिद्धधूमधर्मिकव्यभिचारसंशयविरोधितया अभिमतमिति शेषः। आद्य। प्रसिद्धधर्मिकव्याप्ति(१)निश्चयकाले। संशयोऽसिद्ध इति। तादृशनिश्चयस्य यावद्धूमविषयकत्वे समानविषयकत्वमात्रेण विरोधितामतेऽपि अनीदृशधूमरूपधर्मिणो दुर्लभतया संशयाप्रसक्तेः। प्रसिद्धधूममात्रविषयकत्वेऽपि धूमत्वव्यापकताया विरोधिन्या अवगाहनेन धूमत्वपुरस्कारेण स्वाविषयधूमधर्मिकमपि संशयं प्रति तस्य विरोधित्वौचित्यात्। यथा एकधर्मिणि विरोधिद्वयसत्त्वे विरोधभङ्गप्रसङ्गस्तत्र समानधर्मिकविरोधिज्ञानप्रतिबन्धकतायां बीजम्। तथा तत्समानाधिकरणधर्मं प्रति तद्विरोधिनो व्यापकत्वेऽपि विरोधभङ्गप्रसङ्गस्य उक्तज्ञानप्रतिबन्धकताबीजत्वादिति भावः।

धूमत्वावच्छेदेन। शुद्धधूमत्वव्यापकत्वेन। एवकारेण तादृशव्यापकतानवगाहिसमानविषयकज्ञानव्यवच्छेदः। तद्विरोधितया। धूमत्वसामानाधिकरण्यमात्रेण व्यभिचारविषयकसंशयविरोधितया। स नानुपपन्नः। संशयो नानुपपन्नः।

ननु दर्शितबीजेनोक्तव्यापकतानवगाहिनोऽपि समानविषयकज्ञानस्य विरोधित्वमावश्यकम्, प्रतिबध्यप्रतिबन्धकतयाभिमतधियोर्विषयविरोधभङ्गप्रसङ्गेऽपि प्रतिबध्यप्रतिबन्धकभावानुपगमे धर्मितो-

(१) प्रथमोक्तव्याप्तीति २ पु० पाठः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वच्छेदकव्यापकतावगाह्यपि भिन्नधर्मिकं ज्ञानमविरोधि तदनवगाह्यपि समानधर्मिकं ज्ञानं विरोधीति विपरीतमेव कुतो न स्यात् । व्यापकतावगाहित्वेन विरोधित्वे अवच्छेदकावच्छेदेन विशिष्टबुद्धौ तत्सामानाधिकरण्यमात्रेण विरोधिनिश्चयस्य प्रतिबन्धकत्वान्तरस्य कल्पनया गौरवं चेत्याशङ्क्याह । कथमन्यथेति । अन्यथा । समानविषयतामात्रेण निश्चयस्य संशयविरोधित्वे । पृथिव्यादिरूप इति । सर्वत्र पार्थिवरूपत्वादिनेति शेषः । कथं संशय इत्यन्वयः । प्रसिद्धरूपातिरिक्तस्य रूपस्याप्रसिद्ध्या प्रसिद्धरूपाणां च विपरीतनिश्चयविषयतया संशयधर्मिणः सामान्यप्रत्यासत्तिमतेऽपि दुर्लभत्वादिति भावः । अतिरिक्तसम्भावनया । प्रसिद्धरूपातिरिक्ते रूपत्वसम्भावनया । तथा । विशेषरूपेण सर्वत्र व्याप्तिनिश्चयेऽपि सामान्यरूपेण संशयः । विशेषधर्मपुरस्कारेण निश्चयस्य सामान्यधर्मपुरस्कारेण संशयं प्रति प्रतिबन्धकतायां तद्विशेषधर्मशून्ये सामान्यधर्मसम्भावनाया उत्तेजकत्वोपगमादिति भावः । सम्भावनायाश्च निश्चयसाधारणेन ज्ञानत्वेनैवोत्तेजकत्वात् पार्थिवाद्यतिरिक्तमपि रूपमस्तीति भ्रमेऽपि रूपं वायुत्वाभावव्यभिचारि न वेति संशयस्योक्तनिश्चयदशायामुत्पत्तेः ।

नन्वेवं सामान्यस्याप्रत्यासत्तित्वेऽपि व्याप्तिनिश्चयविषयप्रसिद्धधूम एव अतिरिक्तसम्भावनया व्यभिचारसंशयोपपत्तेः प्रकृतासिद्धिरित्यत आह । विशेषतश्चेति । लौकिकसन्निकर्षादितः । उपस्थितानाम् । प्रसिद्धधूमरूपातिरिक्तानाम् । घटगुणादिद्रव्यरसादीनाम् । विशेषतः । विशेषधर्मघटत्वादिपुरस्कारेण । विशेषदर्शनाक्रान्ततया । धूमत्वरूपत्वाद्यभावनिश्चयविषयतया तेषु धूमत्वरूपत्वादिसम्भावनाया असम्भवात् । प्रसिद्धधूमाद्यतिरिक्तत्वेन रूपेण विशेषदर्शनाविषयतया अनुपस्थितवस्त्वन्तरमेवातिरिक्तसम्भावनायां धर्मितया विषयो वाच्यः । तादृशातिरिक्तोपस्थितिश्च सामान्यलक्षणां विना नेति तदर्थमेव तस्याः प्रत्यासत्तित्वं स्वीकार्यमित्यर्थः ।

अतिरिक्तसम्भावनापदार्थं यथासम्भवं विकल्प्य दूषयति । यत इति ।

(दी०) यतो रूपेषु नातिरिक्तत्वसम्भावना तेषु वि-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शेषदर्शनात् । नाप्यतिरिक्ते रूपत्वसम्भावना रूपान्यन्न रूपं द्रव्यादयो रसादयश्च न रूपं प्रसिद्धरूपभिन्नं यद्रूपभिन्नं द्रव्यं रसादि वा तत् सर्वं न रूपं रूपत्वाभाववच्चेत्यादिविशेषदर्शनेन तस्या अप्ययोगात् । तदानीञ्चोक्तसंशयस्य सर्वजनानुभवासिद्धत्वात् अतिरिक्तसम्भावनाया गौरवेणाप्रयोजकत्वाच्च । तस्मात्तत्रैव धूमे रूपे वा धूमत्वेन रूपत्वाद्यवच्छेदेन व्याप्तेरग्रहाद् व्यभिचारसंशयो नायुक्तः ।

(गा०) अतिरिक्तत्वसम्भावना । प्रसिद्धरूपातिरिक्तत्वकोटिकसम्भावना । प्रकृते उत्तेजिका भवितुमर्हतीति शेषः । तेषु । सर्वेषु रूपेषु । विशेषदर्शनात् । विशेषतोऽनतिरिक्तत्वनिश्चयात् । समानविषयकत्वमात्रेण विरोधितामते रूपधर्मिकसम्भावनाया एवोत्पादासम्भवादिति शेषः । न रूपमित्यन्तत्रयं इत्यादीत्यन्तेतिपदेन प्रत्येकं सम्बध्यते । रूपान्यरूपमित्यादिविशेषदर्शने सामान्यप्रत्यासत्तिपक्षे तद्बलात् सर्वेषामेवातिरिक्तानां धर्मितया रूपत्वसम्भावनाधर्मिणो दुर्लभतया तस्या अयोगादित्यर्थः । रूपभिन्ने रूपभिन्नत्वेन सामान्यतो विशेषदर्शनमुक्त्वा विशेषतो द्रव्यत्वादिनापि तदुक्तुं द्रव्यादय इति । समानविशेष्यकत्वेन विरोधितामतेऽपि समानप्रकारकत्वस्य तन्त्रत्वे प्रसिद्धरूपातिरिक्तत्वेन प्रकारेणातिरिक्तधर्मिकसम्भावनायां केवलरूपान्यत्वादिप्रकारेणातिरिक्तधर्मिकविशेषदर्शनस्याविरोधित्वसम्भवात् । सामान्यतो विशेषतश्च विशेषदर्शने प्रसिद्धरूपभिन्नत्वमपि धर्मितावच्छेदके अन्तर्भावयति । प्रसिद्धेति । प्रसिद्धरूपभिन्नं सर्वं न रूपमिति विशेषदर्शने प्रसिद्धरूपेषु सर्वत्र वायुत्वाभावव्याप्तिनिश्चये च सति रूपे तद्व्यभिचारसंशयाभावस्यानुभविकतया तदानीं तादृशसम्भावनाविरह इष्ट एवेति रूपभिन्नत्वमपि सामान्यतो विशेषतश्च विशेषदर्शनस्य धर्मितावच्छेदकेऽन्तर्भावितम् । सर्वमिति च सर्वेषां विशेषदर्शनविषयत्वलाभाय न तु तस्य व्यापकतावगाहित्वलाभाय एतन्मते तदवगाहिताया अकिञ्चित्करत्वात् । रूपभेदनिश्चयस्य यदि तादात्म्येन रूपकोटिकमेव संशयं प्रति विरोधिता न तु समवा-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

येन रूपत्वकोटिकं तदभिप्रायेण रूपत्वाभावनिश्चयोऽपि दर्शितः । तादृशविशेषदर्शनदशायां संशयोऽप्यपलपनीय इत्यत आह । तदानीं चेति । उक्तसंशयस्य । रूपं वायुत्वाभावव्यभिचारि न वेति संशयस्य । रूपं वायुत्वाभावव्यभिचारि न वेति संशयस्य अनुभवे विवदमानं गौरवेण निराकरोतीति । अतिरिक्तेति । गौरवेण । प्रतिबन्धकतावच्छेदक-गौरवेण । तत्तद्विशेषधर्मपुरस्कारेण निश्चयत्वेन प्रतिबन्धकतायां तत्त-द्विशेषधर्मशून्ये सामान्यधर्मसम्भावनाया विशिष्य उत्तेजकतया प्र-तिबन्धकताधिक्येन वा । अप्रयोजकत्वात् । अनुत्तेजकत्वात् । तथा च तद्धर्मसामानाधिकरण्येन विशेषणावगाहिज्ञाने शुद्धतद्धर्मावच्छे-देन तद्धर्मावच्छेदेन विशेषणाग्रहे च तद्धर्मसामानाधिकरण्येन वि-परीतनिश्चयो विरोधी न तु तद्धर्मसामानाधिकरण्यमात्रेण विशेषण-ग्रहे तद्धर्मसामानाधिकरण्यमात्रेण विपरीतनिश्चय इति भावः । उप-संहरति । तस्मादिति । नायुक्त इति । तथा च नोक्तयुक्त्या सामा-न्यप्रत्यासत्तिसिद्धिरिति भावः ।

सामान्यप्रत्यासत्तौ युक्त्यन्तरं निराकर्तुमुपन्यस्यति । यत्त्विति ।

(दी०) यत्तु सामान्याभावभानार्थं सा स्वीकार्या तां विना सकलतत्प्रतियोगिज्ञानासम्भवादिति । तन्न । न हि अभा-वस्य ज्ञानमात्रे लौकिकप्रत्यक्षे वा प्रतियोगिज्ञानं कारणं तत्र सामान्यलक्षणया इदन्त्वादिना च भाने व्यभिचारान्मा-नाभावाच्च ।

(गा०) सामान्याभावभानार्थम् । घटादिसामान्याभावभानार्थम् । घटादिसामान्याभावभासकसकलघटादिभानार्थम् । सां । सामान्यप्र-त्यासत्तिः । सकलप्रतियोगीति । घटादिसामान्याभावीयसकलप्रति-योगीत्यर्थः । इदं च सकलप्रतियोगिज्ञानत्वेनाभावधीहेतुता तत्तद्घ-टादिव्यक्तिप्रतियोगिकाभावबुद्धौ तत्तद्घटादिव्यक्तिज्ञानत्वेन वा हे-तुतेत्यभिमानेन स चाग्रे निराकरणीयः । प्रथमतः प्रतियोगिज्ञानस्य स्वातन्त्र्येणाभावधीहेतुतामेव खण्डयति । न हीति । ज्ञानमात्र इति । लौकिकालौकिकसाधारणप्रत्यक्ष इत्यर्थः । अभावप्रत्यक्षत्वं अभाव-लौकिकप्रत्यक्षत्वं वा प्रतियोगिज्ञानजन्यतावच्छेदकमित्युभयमपि

Digitized by Arya Samaj Foundation Chennai and eGangotri
CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नेति फलितम् । स्वमते सामान्यप्रत्यासत्त्यभावेन तज्जन्याभावप्रत्यक्षे व्यभिचारोऽसम्भवयुक्तिक इत्यतस्तथेति । सामान्यलक्षणयेति । अग्रिमेण भाने व्यभिचारादित्यनेन सम्बध्यते ।

द्वितीयपक्षेऽभावत्वादिसामान्यजप्रतियोगिज्ञाननिरपेक्षाभावप्रत्यक्षे लौकिकत्वविरहेण व्यभिचारानवकाशात् पक्षद्वये दोषमाह । इदन्त्वादिनेति । तेजोरूपप्रतियोगिज्ञानशून्यकालीने इदं नीलमिति तमःप्रत्यक्षे इत्यर्थः । प्रतियोगिविशेषिताभावाविषयकप्रत्यक्षत्वस्य कार्यतावच्छेदकत्वोपगमे उक्तव्यभिचारानवकाशात्तन्मते दोषान्तरमाह । मानाभावादिति । प्रतियोगिज्ञानशून्यकाले प्रतियोग्यविशेषिताभावविषयकस्य नेत्याकारकाभावप्रत्यक्षस्य सर्वानुभवविरुद्धस्य वारणायैव प्रतियोगिज्ञानहेतुतामङ्गीकरोषि प्रतियोग्युपरागावगाहित्वस्य प्रतियोगिज्ञानजन्यतावच्छेदकत्वोपगमे च प्रतियोग्यनुपरक्ताभावप्रत्यक्षापत्तौ प्रतियोगिज्ञानविरहस्याकिञ्चित्करतया प्रकारान्तरेणैव तस्य वारणीयतया प्रतियोगिज्ञानहेतुतायां मानाभावादित्यर्थः ।

ननूक्तप्रतीतिविषयस्तमोनिष्ठमिदन्त्वं तेजोभावत्वमेव तेन रूपेण ज्ञानं च तेजोज्ञानं विना न कस्याप्यनुमतमिति प्रतियोगिप्रकारकत्वस्य प्रतियोगिज्ञानजन्यतावच्छेदककोटावनिवेशेऽपि न व्यभिचार इत्यत आह ।

(दी०) अत एवेदन्त्वादिनोपस्थिते तमसि भावत्वाभावत्वसंशयः तेजोभावत्वेनोपस्थिते तदयोगात् । प्रतियोगिविशेषिततज्ज्ञानं तु विशिष्टवैशिष्ट्यबोधमर्यादां नातिशेते, सकलप्रतियोगिविषयत्वं तु तस्यासिद्धम्, प्रतियोगिज्ञानस्य हेतुत्वेऽपि प्रतियोगितावच्छेदकाविशिष्टयत्किञ्चित्प्रतियोगिज्ञानादेव तत्सम्भवात् यावत्प्रतियोगिज्ञानत्वेन गौरवेणाहेतुत्वात् ।

(गा०) अत एवेति । तेजोज्ञानं विनापि तेजोभावत्वानात्मकेन इदन्त्वेन तमःप्रत्यक्षोत्पत्तेरेवेत्यर्थः । इदन्त्वादिनोपस्थिते । इदन्त्वादिरूपधर्मितावच्छेदकप्रकारेण प्रत्यक्षतः प्रतीते । तेजोभावत्वेनोपस्थिते । तेजोभावत्वरूपधर्मितावच्छेदकविशिष्टे । तदयो-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गात् । भावत्वसंशयायोगात् । तद्व्यावर्तकधर्मस्य तत्संशयधर्मितावच्छेदकताया अनुभवविरुद्धत्वादिति भावः ।

ननु प्रतियोगिज्ञानहेतुतामते तज्जन्यतावच्छेदके प्रतियोगिप्रकारतानिवेशे प्रतियोगिज्ञानशून्यकाले न प्रतियोग्यनुपरक्ताभावप्रत्यक्षापत्तिः, तादृशाभावलौकिकप्रत्यक्षस्याप्रसिद्धेः प्रतियोगिज्ञानकारणत्वानुपगमे च प्रतियोगिज्ञानशून्यकाले प्रतियोगिज्ञानदशाप्रसिद्धस्यैवाभावप्रत्यक्षस्यापत्तिरिति तत्कारणत्वमावश्यकमित्यत आह । प्रतियोगिविशेषितेति । तज्ज्ञानम् । अभावभानम् । विशिष्टवैशिष्ट्यबोधमर्यादाम् । प्रतियोगितावच्छेदकविशिष्टवैशिष्ट्यावगाहिताम् । नातिशेते । नातिक्रामति । तच्छून्यं न भवतीति यावत् । तथा च तत्र विशेषणतावच्छेदकप्रकारकज्ञानविधयैव प्रतियोगितावच्छेदकप्रकारकप्रतियोगिज्ञानमपेक्षितं किं तत्र स्वतन्त्रप्रतियोगिज्ञानहेतुतयेति भावः ।

ननु मा भूदभावबुद्धौ स्वातन्त्र्येण प्रतियोगिधीः कारणं तथापि सामान्याभावबुद्धौ प्रत्यासत्त्यन्तराभावेन सकलप्रतियोगिभानमनुपपन्नमिति तदुपपत्तये सा स्वीकार्येत्यत आह । सकलेति । तस्य । सामान्याभावप्रत्यक्षस्य । असिद्धमिति । घटो नास्तीति सामान्याभावबुद्धौ घटत्वादिसामान्यधर्मे प्रतियोगितावच्छेदकत्वपर्याप्तिभानान्नीलघटो नास्तीति बुद्धौ च तत्र तदभावादेव तयोर्वैलक्षण्योपपत्तेरिति भावः । प्रतियोगितावच्छेदकविशिष्टप्रतियोगिज्ञानस्य स्वतन्त्रहेतुतामभ्युपेत्यापि पूर्वोपदर्शिताभिमानं निराकृत्य सामान्यप्रत्यासत्तिं खण्डयति । प्रतियोगिज्ञानस्येति ।

(दी०) न च तदभावबुद्धौ तज्ज्ञानहेतुत्वात् यावत्प्रतियोगिज्ञानस्य हेतुत्वमर्थायातम् । मानाभावात्, ध्वंसप्रागभावात्यन्ताभावाश्च प्रतियोग्यादित्रितयप्रतियोगिकाः दुराग्रहेऽप्येकग्रहादेव गृह्यन्ते इत्यभ्युपगमाच्च । अन्धकारस्तु तेजोविशेषसामान्याभावो नाभावसमुदायः यावत्तदभावानामेकत्रासम्भवात् अननुगमात् गौरवात्तेजोविशेषत्वादिज्ञानस्य तेजःसामग्र्याश्च विरहेऽपि तेजोविशेषात्यन्ताभावप्रागभावानां प्रत्यक्षानभ्युपगमाच्च प्राग-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भावप्रत्ययोऽपि च प्रतियोगिवृत्तिघटत्वादिप्रकारकज्ञानसाध्यो न प्रतियोगिज्ञानमपेक्षते ।

(गा०) न चेत्यनन्तरं यावत्त्वस्य कारणतावच्छेदककोटावप्रवेशोऽपीति पूरणीयम् । तदभावबुद्धौ । तत्तद्व्यक्तिप्रतियोगिकाभावबुद्धौ । तज्ज्ञानत्वेन हेतुत्वात् । तत्तद्व्यक्तिज्ञानत्वेन हेतुत्वात् तत्तदभावप्रत्यक्षे तत्तदभावीयप्रतियोगिज्ञानत्वेन हेतुत्वे घाभावानामेकप्रतियोगिकानामपि सम्बन्धादिभेदेन नानात्वेन प्रतियोग्यपेक्षया बहुतरतया कार्यकारणभावबाहुल्यमिति भावः । मानाभावादिति । एकधर्मप्रकारकप्रतियोगिज्ञानादन्यधर्मावच्छिन्नाभावप्रत्यक्षवारणाय तत्तद्धर्मावच्छिन्नप्रतियोगिताकाभावबुद्धौ तत्तद्धर्मप्रकारकज्ञानत्वेन हेतुताया आवश्यकत्वे उक्तकार्यकारणभावे मानाभावादित्यर्थः ।

ननु ध्वंसप्रागभावयोः सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वाभावात् घटो ध्वस्त इत्यादिप्रत्यक्षानुरोधेन तत्तद्घटादिव्यक्तिप्रतियोगिकाभावप्रत्यक्षे तत्तद्व्यक्तिज्ञानत्वेन कारणत्वमावश्यकमित्यत आह । ध्वंसेति । घटध्वंसस्य घटात्यन्ताभावविरोधितया स एव घटात्यन्ताभावस्यात्यन्ताभावः प्रागभावध्वंसस्य प्रतियोगितद्ध्वंसस्वरूपतया स घटप्रागभावस्य ध्वंसोऽपीति घटतदत्यन्ताभावतत्प्रागभावत्रयप्रतियोगिकः । एवं घटप्रागभावो घटात्यन्ताभावस्यात्यन्ताभावः घटध्वंसस्य प्रागभावश्च ध्वंसप्रागभावस्य प्रतियोगितत्प्रागभावात्मकत्वादिति सोऽपि घटादित्रयप्रतियोगिकः । घटात्यन्ताभावोऽपि तद्ध्वंसतत्प्रागभावात्यन्ताभावसमनियततया तदभिन्न इति घटादित्रयप्रतियोगिकः अथ चैकैकप्रतियोगिज्ञानादेव गृह्यते इत्यभ्युपगमेन तत्प्रत्यक्षे परापरप्रतियोगिज्ञानस्य व्यभिचारादित्यर्थः । स्वमते समनियतसंख्यापरिमाणाद्यभावस्याभिन्नतया संख्यादिज्ञानजन्ये तदभावप्रत्यक्षे परिमाणादिज्ञानस्य व्यभिचारोऽपि बोध्यः । तथा चागत्या प्रतियोगिज्ञानहेतुतामते तदभावप्रत्यक्षे तत्तदभावीयप्रतियोगिज्ञानत्वेनैव हेतुता वाच्येति न सामान्याभावप्रत्यक्षे यावत्प्रतियोगिज्ञानापेक्षेति भावः ।

अथाभावाभेदेऽपि प्रतियोगितावच्छेदकादिभेदेनानुयोगिताभेदात् तत्तद्व्यक्तिनिरूपितानुयोगिताप्रत्यक्षत्वस्य तत्तद्व्यक्तिज्ञानजन्यता-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वच्छेदकत्वान्न व्यभिचारः । अत एवेदन्त्वादिनानुयोगिताविशेषाविषयकतमःप्रत्यक्षेऽपि न व्यभिचारः । एवं च सामान्याभावीयघटत्वादिसामान्यधर्मावच्छिन्नसकलप्रतियोगिनिरूपितानुयोगिताया ऐक्यात् तत्प्रत्यक्षानुरोधेन यावद्घटादिज्ञानमावश्यकमिति चेन्न । तत्तद्व्यक्तिनिरूपितानुयोगिताप्रत्यक्षे तत्तद्व्यक्तिज्ञानहेतुत्वेऽनन्तप्रतियोगिभेदादनन्तकार्यकारणताप्रसङ्गेन विषयतया अनुयोयोगिताप्रत्यक्षं प्रति स्वविषयनिरूपितत्वसम्बन्धेन ज्ञानत्वेनैव हेतुताया ध्वंसादिप्रत्यक्षानुरोधेन कल्पनीयत्वात् यत्किञ्चिद्घटादिज्ञानादेव सामान्यधर्मावच्छिन्ननिरूपितानुयोगिताप्रत्यक्षोपपत्तेः ।

उद्भूतानभिभूतरूपवत्तेजःसामान्याभावो नान्धकारपदार्थः तेजोध्वंसप्रागभावाधिकरणे तत्सामान्याभावासत्त्वेन तमःप्रतीत्यनुपपत्तेः । किं तु तादृशतत्तत्तेजोव्यक्तीनां विशेषाभावसमुदाय एव, स च प्रतियोगिज्ञानहेतुतामते यावत्तादृशतेजोज्ञानग्राह्य इति सामान्यप्रत्यासत्त्यास्य इति भिन्नमतं दूषयति । अन्धकारश्चेति । तेजोविशेषेति । उद्भूतानभिभूतरूपवत्तेज इत्यर्थः । अभावः संयोगसम्बन्धेन ग्राह्यः तेन सम्बन्धान्तरावच्छिन्नाभावमादाय नातिप्रसङ्गः । न वा सम्बन्धसामान्येनाभावविवक्षाधीनोऽसम्भवः । न चैवमालोकसमवधानेऽपि रूपादौ तमःप्रत्ययापत्तिः । संयोगसम्बन्धावच्छिन्नतेजोभावस्य तत्र सर्वदा सत्त्वादिति वाच्यम् । तत्र तेजोविशेषसामान्याभावग्रहस्य सर्वसंमतत्वात् । रूपे तम इति व्यवहारापत्तेश्च तमःप्रभृतिपदसमभिव्याहारे सप्तम्यर्थादेर्द्रव्यानुयोगिकविशेषणतावच्छिन्नाधेयतायां व्युत्पन्नत्वादसम्भवात् ।

यत्तु तेजःसामान्याभावविशिष्टद्रव्यत्वमेवान्धकार इति । तन्न । तथा सत्यालोकं विनान्धकारप्रत्यक्षं न स्यात् द्रव्यत्वलौकिकप्रत्यक्षेऽपि तस्य हेतुत्वात् । इदं तु ध्वंसादेः सामान्याभावाविरोधित्वाभिप्रायेण ।

अत्र च तादृशसमुदायस्य एकैकप्रतियोगिकयावत्तादृशतेजोभावत्वेन तमःप्रतीतिविषयता एकैकव्यक्तिप्रतियोगिकत्वनिवेशाच्च सामान्याभावस्य यावत्तदन्तर्गतत्वम् । अभावे यावत्त्वनिवेशाच्च ता-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दृशतेजस्विनि देशे यत्किञ्चित्तेजोऽभावमादायातिप्रसङ्गः । किं वा यावतीनां तादृशतेजोव्यक्तीनां तत्तद्व्यक्तित्वेनाभावानां तत्तद्व्यक्त्यभावत्वेन(१) तमःप्रतीतिविषयता प्रतियोगिनि यावत्त्वनिवेशान्न तेजोविशेषाधिकरणे तमःप्रत्ययः तत्तेजोव्यक्तेरेव तथाभावासत्त्वात् । व्यासज्यवृत्तिधर्मावच्छिन्नस्य किञ्चिद्विशेषणविशिष्टस्य च तेजसस्तेजस्विन्यप्यभावस्याक्षतत्वादतिप्रसङ्ग इति तत्तद्व्यक्तित्वेनेति ।

ध्वंसप्रागभावप्रतियोगितायां प्रतियोगिवृत्तिधर्मविशेषावच्छिन्नत्वस्याप्रामाणिकत्वे तत्सङ्ग्रहाय तत्तद्व्यक्तित्वान्यधर्मानवच्छिन्नत्वमेव प्रतियोगितायां निवेशनीयं सम्बन्धान्तरावच्छिन्नाभावमादायातिप्रसङ्गस्य वारणाय संयोगसम्बन्धावच्छिन्नत्वं संयोगान्यसम्बन्धानवच्छिन्नत्वं वा प्रतियोगितायां निवेश्यम्, अनयोः प्रथमं पक्षं दूषयति । यावत्तदभावानामिति । एकदासम्भवादिति । ध्वंसप्रागभावयोः प्रतियोगिदेशे एव सत्त्वेन व्यधिकरणतेजसोर्ध्वंसद्वयस्य प्रागभावद्वयस्य चैकाधिकरण्यासम्भवादिति भावः ।

ननु स्ववृत्तिसमानकालीनयावदभावस्य स्वाधिकरणकतमःप्रत्ययविषयत्वोपगमे नोक्तदोषः समानकालीनत्वनिवेशात्स्ववृत्त्यतीतानागतप्रागभावध्वंसघटितसमुदायस्य स्वस्मिन्नेकदाऽसत्त्वेऽपि न क्षतिरित्यत आह । अननुगमादिति । तथा च नानाधिकरणे एकाकारतमःप्रत्ययानुपपत्तिर्विषयाननुगमादिति भावः । ध्वंसप्रागभावादिघटिताभावसमुदायस्य एकदासम्भवेऽपि एकैकव्यक्तेरेकैकाभावघटितसमुदायस्य सर्वत्र तमःप्रत्यक्षदशायामक्षतत्वाद्द्वितीयपक्षे नोक्तदोष इत्यतः पक्षद्वये दोषमाह । गौरवादिति । अनन्तानामभावानां तमःप्रतीतिविषयताकल्पने इत्यादिः । दोषान्तरमाह । तेजोविशेषेति । सामान्यप्रत्यासत्त्याप्यनुपपद्यमानं स्वप्रतियोगितावच्छेदकतेजोनिष्ठतत्तद्व्यक्तित्वप्रकारकज्ञानमन्तरेण तत्तद्व्यक्तित्वावच्छिन्नतेजोत्यन्ताभावस्य प्रतियोगिसामग्रीव्यंग्यतया तेजःसामग्रीविरहे तत्प्रागभावस्य च प्रत्यक्षानभ्युपगमादित्यर्थः । तथा च तदानीमप्यनुभूयमानस्य तमःप्रत्यक्षस्य तेजोभावकूटविषयकत्वासम्भव इति भावः ।

---

(१) तत्तद्व्यक्तित्वेनेति–२ पु० पा० ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

ननु सामान्याभावप्रत्यक्षस्य यत्किञ्चित्प्रतियोगिज्ञानात् सम्भवेन तदनुरोधात् सामान्यप्रत्यासत्तेरनावश्यकत्वेऽपि प्रागभावप्रत्यक्षजनकतत्प्रतियोग्यनागतव्यक्तिज्ञानार्थं तदावश्यकतेति युक्तिं प्रतियोगिज्ञानहेतुतामनङ्गीकुर्वन् दूषयति । प्रागभावप्रत्ययोऽपीति । प्रतियोगिविशेषितप्रागभावप्रत्ययोऽपीत्यर्थः । घटत्वादेः सामान्यधर्मस्य प्रागभावादिप्रतियोगितानवच्छेदकत्वात् प्रतियोगिवृत्तीत्युक्तम् । घटत्वादिप्रकारकज्ञानस्य तद्विशिष्टघटाद्युपरक्तप्रागभावप्रत्यक्षेऽपि विशिष्टविशेषणकधियो हेतुत्वेनापेक्षा तज्जन्यतावच्छेदककोटौ घटत्वानिष्ठप्रकारतानिरूपितविशेष्यतावच्छिन्नघटादिनिष्ठप्रकारताशालिबुद्धित्वस्य विशेष्ये विशेषणमिति रीत्या ज्ञानसाधारणस्य तथाभूतस्य घटत्वावच्छिन्नप्रकारताकत्वरूपघटत्वविशिष्टप्रकारताकत्वस्य घटत्वघटोभयपर्याप्तप्रकारताकत्वरूपघटत्वविशिष्टपर्याप्तप्रकारताकत्वस्य वा निवेशात् न तु तदवच्छिन्नप्रतियोगिताकत्वविशिष्टसंसर्गकत्वरूपतद्विशिष्टप्रतियोगिकवैशिष्ट्यावगाहित्वस्य येन घटत्वादेरतिप्रसक्ततया ध्वंसप्रागभावप्रतियोगितानवच्छेदकत्वेन तत्प्रतीतौ प्रतियोग्यंशे उपलक्षणतयैव भानेन तस्या घटत्वविशिष्टप्रतियोगिकवैशिष्ट्यानवगाहित्वेनासङ्ग्रहः स्यादिति ध्येयम् ।

यद्यपि विशिष्टप्रतियोगिकत्वेन वैशिष्ट्यानवगाहिविशेषणान्तरविशेष्यतापन्नप्रकारकेऽपि ज्ञाने न विशिष्टविशेषणज्ञानत्वेन हेतुता दीधितिकारसम्मता एकत्वविशिष्टकर्मादिज्ञानं विनापि विशिष्टप्रकारककर्माद्यनुमितेस्तेनोपगमात्तथापि प्रत्यक्षे विशिष्टप्रकारके एव विशिष्टविशेषणज्ञानं पूर्वोक्तयुक्त्या हेतुः विशिष्टप्रतियोगिकत्वेन वैशिष्ट्यावगाहिता क्वचिद्विशिष्टप्रकारकज्ञानेन सर्वत्रान्यत्र नियामकं बाधविशेषाभावादिकमेवेत्यभिप्रायेणेदम् ।

केचित्तु विशेषणान्तरप्रकारतानिरूपितविशेष्यतावच्छिन्नप्रकारता न विशेषणतावच्छेदकप्रकारकज्ञानजन्यतावच्छेदिका अत एकत्वविशिष्टकर्मादिज्ञानं विनापि लाघवोपनीतैकत्वादिविशेष्यतापन्नकर्मादिप्रकारिकानुमितिर्ज्ञानत्वादिनिर्विकल्पकात्तद्विशेष्यतापन्नज्ञानादिप्रकारकानुव्यवसायश्चोत्पद्यते नापि विशिष्टप्रतियोगिकत्वेन वैशिष्ट्यावगाहित्वं तथा घटत्वादिनिर्विकल्पकादुपलक्षणीभूतघट-

Digitized by Arya Samaj Foundation Chennai and eGangotri
CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्वादिविशेष्यतापन्नप्रतियोग्युपरागेण ध्वंसप्रागभाव(१)प्रत्यक्षापत्तेः। किं तु विशिष्टप्रकारकत्वं तथा विशिष्टप्रकारकत्वं च विशेषणविशेष्योभयपर्याप्तप्रकारताकत्वं विशेषणनिरूपितावच्छेद्यताख्यस्वरूपसम्बन्धघटप्रकारकत्वं वा घटत्वाद्युपलक्षितघटादिप्रतियोगिकानुयोगिताविशेषरूपवैशिष्ट्यावगाहिन्यपि प्रागभावादिप्रत्यक्षे तादृश्येव घटत्वादिप्रकारितोपेयते अतो न घटादिनिर्विकल्पकात्तादृशप्रागभावप्रत्यक्षमित्याहुः । तच्चिन्त्यम् । तद्धर्मविशिष्टविशेषणज्ञानपूर्वकतद्धर्मोपलक्षितवैशिष्ट्यावगाहिज्ञाने तद्धर्मनिर्विकल्पकानन्तरजातघटवद्भूतलमित्यादिज्ञाने ऽवर्त्तमानाया व्यासज्यवृत्त्यादिप्रकारताया आनुभविकत्वविरहेणाप्रामाणिकत्वात् । ज्ञानवैलक्षण्यानुभवविरहे कार्यतावच्छेदकत्वेनातिरिक्तविषयतास्वीकारेऽपसिद्धान्तात् ।

अत एव पक्षसाध्यकानुमानव्याख्यावसरे संवादिप्रवृत्तित्वावच्छिन्ननिरूपितजनकतारूपहेतुग्रहः तादृशजनकतावच्छेदकप्रमात्वग्रहं विना न सम्भवतीत्याक्षिप्य द्वयी संवादित्वविशिष्टप्रवृत्तिविशेषितजनकताग्रहसामग्री एका विशिष्टविशेषणज्ञानघटिता अपरा तदघटिता जनकत्वरूपविशेष्ये प्रवृत्तिं प्रवृत्तौ चोपलक्षणतया संवादित्वमवगाहमानाया धियः सामग्री तत्राद्यसामग्रीजन्यज्ञाने जनकतायां संवादित्वविशिष्टप्रवृत्तिप्रतियोगिकनिरूपितत्वरूपवैशिष्ट्यविषयकत्वेन प्रमात्वावच्छिन्नजनकताया एव विषयतया प्रमात्वाग्रहात्तदसम्भवेऽपि तद्ग्रहं विनापि संवादित्वोपलक्षितप्रवृत्तिनिरूपितसामान्यजनकताविषयको हेतुग्रहः सम्भवतीति मिश्राणां समाधानमपि सङ्गच्छते संवादित्वोपलक्षितप्रवृत्तिवैशिष्ट्यावगाहिग्रहेऽपि विशिष्टविशेषणज्ञानजन्यतावच्छेदकप्रकारतोपगमे तादृशज्ञानसामग्र्या अपि विशिष्टविशेषणज्ञानघटिततया विशिष्टज्ञानघटितसामग्र्याः प्रामाण्यरूपावच्छेदकाग्रहप्रयुक्तासम्भवाभिधानासङ्गतेः ।

अभावबुद्धौ प्रतियोगिज्ञानस्य स्वातन्त्र्येणाहेतुत्वेऽपि प्रतियोगिविशेषितप्रागभावप्रत्यक्षे प्रतियोग्युपनायकतज्ज्ञानापेक्षादुर्वा-

(१) स्वप्रागभावेति-२ पु० पा० ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

६६१ / ४८ IX

वैव तथा चानागतप्रतियोगिभानार्थं सामान्यप्रत्यासत्त्यादर इत्याशङ्कते । अथेति ।

(दी०) अथ घटो भविष्यतीति प्रत्यक्षं प्रतियोगिविशेषितं प्रागभाववस्तु अवगाहते, न च प्राचीनास्तत्प्रतियोगिनस्तत्प्रतियोगित्वावगाहने च भ्रमत्वम्, न चानागते घटे प्रत्यासत्त्यन्तरमस्ति अतः सामान्यप्रत्यासत्त्या घटत्वेनानुभूतं स्मृतश्च तं तदालम्बते । न च चरमकारणरूपसामग्रीव्यंग्यः प्रागभावो वाच्यः अन्यदा तदप्रत्ययापत्तेस्तस्याः स्वरूपसत्याः स्वरूपेण वा ज्ञातायास्तथात्वेऽतिप्रसङ्गात् व्याप्यत्वेन गृहीतायास्तथात्वं वाच्यम् तथा च तद्धेतुका प्रागभावस्यानुमितिरेव तावत्कालं प्रागभावस्यासत्त्वेन प्रत्यक्षायोगाच्चेति वाच्यम् ।

(गा०) घटो भविष्यतीति प्रत्यक्षमिति । घटो भविष्यतीति व्यवहारप्रयोजकं प्रागभावप्रत्यक्षमित्यर्थः । तच्च इदानीमत्र घटो नास्ति इदानीमत्र घटप्रागभाव इत्याकारकं तावतैवोपनीतानागतघटस्य प्रकारतासम्भवात् तस्य तथाविधव्यवहारप्रयोजकता यथाकथञ्चिद्वर्त्तमानप्रागभावप्रतियोगित्वरूपभविष्यत्वविषयकतया तथाविधप्रत्यक्षस्योक्तव्यवहारापेक्षणीयत्वाभिधानं चापलापनिराकरणायेत्यवधेयम् । प्राचीनाः । प्रत्यक्षपूर्वकालीनाः । तत्प्रतियोगिनः । तत्प्रत्यक्षविषयवर्त्तमानप्रागभावप्रतियोगिनः । येन लौकिकसन्निकर्षेण तज्ज्ञानसम्भवात्तत्सामान्यप्रत्यासत्तिःस्यात् ।

ननु प्राचीनानामप्रतियोगित्वेऽपि प्रतियोगितया तेषामेव भानमङ्गीकार्यं न त्वनागतानामित्याशङ्कायामाह । तत्प्रतियोगिकत्वेति । भ्रमत्वमिति । नियमेन प्रागभावप्रत्यक्षस्येत्यादिः । स्यादिति शेषः । प्रत्यासत्त्यन्तरादेवानागतप्रतियोगिज्ञानं भविष्यतीत्यत आह । न चेति । सामान्यप्रत्यासत्त्या घटत्वेनेति । घटत्वरूपसामान्यलक्षणप्रत्यासत्त्येत्यर्थः । प्रागभावप्रत्यक्षे सामान्यप्रत्यासत्त्याप्यज्ञातप्रतियोगिनः प्रकारतया भानासम्भवादनुभूतमिति । अनुभवोपनीतमित्यर्थः । प्रत्यासत्त्येत्यस्यानुभवेनान्वयः । घटान्तरेणापि सन्निकर्षविरहे घटत्वसा-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मान्यलक्षणया अनागतघटज्ञानासम्भवात् सर्वत्र प्रागभावप्रत्यक्षे अनुभवोपनीतानागतप्रतियोगिभानासम्भवात् । स्मृतं चेति । क्वचित्सामान्यप्रत्यासत्तिजप्राचीनानुभवमूलकस्मरणोपनीतमपीत्यर्थः तम् । अनागतघटम् । तत् । प्रागभावप्रत्यक्षम् । आलम्बते । अवगाहते ।

प्रागभावप्रत्यक्षमेव न भवतीत्याशङ्कते । न चेति । चरमकारणरूपेति । विलक्षणकपालसंयोगादिरूपेत्यर्थः । अन्यदा । तादृशसामग्र्यसमवधानदशायाम् । तदप्रत्ययात् । अत्र घटो भविष्यतीत्याद्यनिश्चयात् । स्वरूपसत्याः । स्वज्ञानानपेक्षायाः । स्वरूपेण ज्ञातायाः । कारणतावच्छेदकविलक्षणसंयोगत्वादिप्रकारकज्ञानमात्रापेक्षायाः । तथात्वे । प्रागभावव्यञ्जकत्वे । अतिप्रसङ्गात् । तादृशसामग्र्या कार्योत्पत्तेः प्रागभावस्य वा व्यभिचारस्य धर्म्यवृत्तित्वस्य वा ग्रहदशायामपि प्रागभावप्रत्ययप्रसङ्गात् । तत्र चेह घटो भविष्यति न वेत्यादिसंशयस्यानुभविकतया प्रागभावप्रत्यक्षे नेष्टापत्तिसम्भव इति भावः । व्याप्यत्वेन प्रागभावव्याप्यत्वेन । धर्मिवृत्तित्वेन चेत्यपि द्रष्टव्यम् । तद्धेतुका । सामग्रीहेतुका । अनुमितिरेव सम्भवति । व्याप्यवत्ताज्ञानघटिततत्सामग्रीसत्त्वादिति शेषः । तथा च किं तत्प्रत्यक्षोपगमेन अनुमितौ चानागतभानं पक्षधर्मताबलादेवेति न सामान्यप्रत्यासत्तिसिद्धिरिति भावः ।

अनुमितिसम्भवेऽपि साक्षात्करोमीत्यनुव्यवसायानुरोधेन तत्प्रत्यक्षमवश्यमङ्गीकर्तव्यमित्याशङ्क्याह । तावदिति । तावत्कालम् । सामग्रीज्ञानपर्यन्तम् । प्रागभावस्यासत्त्वेनेति । प्रागभावस्य प्रतियोगिकाले असत्त्वनियमात् सामग्रीसमवधानोत्तरं तज्ज्ञानोत्पत्तिसमये प्रतियोग्युत्पत्त्यावश्यकतया तत्प्रागभावावस्थानासम्भवेनेत्यर्थः । प्रत्यक्षायोगादिति । विषयस्य प्रत्यक्षहेतुत्वादिति भावः । प्रागभावव्याप्यत्वेन सामग्रीज्ञानं न व्यञ्जकं येन प्रागभावानुमितिसामग्री नियता स्यात् अपि तु कार्योत्पादव्याप्यत्वेनैव न हि कार्योत्पत्तिव्याप्यवत्तानिश्चये इह घटो भविष्यति न वेत्यादिसंशय आनुभविको येन तादृशनिश्चयदशायामपि प्रागभावव्याप्यवत्तानिश्चयं विनापि प्रागभावप्रत्यक्षस्वीकारो न सम्भवेत् ।

न च कार्योत्पादव्याप्यवत्तानिश्चये भिन्नविषयकानुमितिसामग्री-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सत्त्वाच्च प्रागभावप्रत्यक्षसम्भव इति वाच्यम् । येन रूपेण व्याप्तिर्गृहीता तेन रूपेण धर्मिवृत्तिताज्ञानस्यैव व्यञ्जकत्वोपगमात्तादृशव्यञ्जकसमवधानस्य च ज्ञानद्वयदशायामपि सत्त्वेन तदानीमेव प्रागभावप्रत्यक्षसम्भवात् व्याप्तिविशिष्टवत्ताज्ञानस्यैवानुमितिसामग्रीत्वात् ।

न चैवं प्रागभावव्याप्यत्वेन गृहीताया एव सामग्र्याः प्रागभावव्यञ्जकता किन्नोपेयते इति वाच्यम् । स्वतन्त्रप्रागभावव्याप्तिज्ञानधर्मिवृत्तिताज्ञानापेक्षायामपि क्षणिकव्यञ्जनविशिष्टज्ञानोत्पत्त्या प्रागभावानुमितिसम्भवेन तत्प्रत्यक्षापलापसम्भवात् सामग्र्या ज्ञानमात्रं हेतुर्न तु लौकिकप्रत्यक्षमेव अतः सामग्रीपूर्वं सामग्रीक्षणे च उपनीतभानादिरूपतज्ज्ञानसम्भवात् न सामग्रीज्ञानपर्यन्तप्रागभावानवस्थानरूपोक्तदोषावसरः सामग्रीपूर्वं सामग्रीक्षणेऽपि उक्तव्यञ्जकबलात् प्रागभावप्रत्यक्षमिष्टमेव अन्यथा पुनः स्वरूपसत्या अपि सामग्र्या उक्तव्यञ्जकसहकारिता वाच्येति समाधत्ते । यादृशेति ।

(दी०) यादृशकारणकलापानन्तरं कार्योत्पादो दृष्टस्तद्बुद्धेरेव व्यञ्जकत्वाभ्युपगमात् । अनुयोगिताविशेषरूपप्रागभावत्वादेः क्वचिदप्रतीतौ ताद्रूप्येणानुमानासम्भवाच्चेति चेत् ?

(गा०) यादृशकारणकलापानन्तरम् । यद्रूपावच्छिन्नकारणकलापानन्तरक्षणे । दृष्ट इत्यस्य नियमेनेत्यादिः । अनन्तरमित्यत्यन्तसंयोगार्थकद्वितीयाबलादेव वा नियमलाभः । तद्बुद्धेः । तद्रूपावच्छिन्नबुद्धेः ।

ननु सामग्र्याः कार्योत्पत्तिव्याप्यत्ववत्प्रागभावव्याप्यत्वमपि सुग्रहमिति प्रागभावप्रतीतिपूर्वं प्रागभावव्याप्तिज्ञानकल्पना सम्भवतीति किं प्रागभावप्रत्यक्षोपगमेनेत्यत आह । अनुयोगितेति । प्रागभावस्यातीन्द्रियत्वे प्रागभावत्वस्य क्वचिदप्रतीतया तेन रूपेण व्यापकताग्रहासम्भवेन तद्रूपावच्छिन्नस्यानुमानासम्भवादित्यर्थः । अत्यन्ताभावादावभावत्वं घटादौ च विनाशित्वं प्रतीत्य विनाश्यभावत्वरूपं प्रागभावत्वं सामान्यप्रत्यासत्त्या प्रतीयमाने तदनभ्युपगमे कथंचिदनुमानेनोपस्थिते प्रागभावे प्रत्येतुं शक्यते इति अनुयोगिताविशेषरूपेत्युक्तम् । विनाश्यभावत्वं न प्रागभावत्वं घटादेर्घटात्यन्ताभावाद्यभावत्वात् विनाशित्वाच्च घटा-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्यन्ताभावादिप्रागभावत्वापत्तेः, किं तु प्रागभावत्वमनुयोगिता-विशेष एवेति भावः। प्रमेयत्वादिसामान्यलक्षणया प्रागभावत्वादेः प्रतीतिसम्भवेऽपि प्रमेयत्वाद्यनवच्छिन्नतत्प्रकारकविलक्षणप्रतीति-र्दुरुपपादेति ध्येयम्।

घटो भविष्यतीत्यादिव्यवहारविषयकं प्रागभावप्रत्यक्षं न सम्भवति तादृशव्यवहारविषयस्यातीन्द्रियत्वात् किं त्वनुमित्यादिरूपमेव तज्ज्ञानम्, आनुमानिकादिज्ञाने चाज्ञातस्यापि पक्षधर्मताबलाद्भानसम्भव इति न दर्शितव्यवहारमूलभूतज्ञानेऽनागतभानानुरोधेन सामान्यप्रत्यासत्तिरिति दूषयितुं वर्तमानप्रागभावप्रतियोगित्वमात्रस्य तद्व्यवहारविषयतां निराकरोति। भविष्यत्त्वं हीति।

(दी०) भविष्यत्त्वं हि न वर्तमानप्रागभावप्रतियोगित्वं श्वो भाविन्यद्य भविष्यतीति प्रत्ययप्रसङ्गात्, किं तूत्पत्स्यते भविष्यतीत्यादेः समानार्थकत्वाद्वर्तमानप्रागभावप्रतियोग्युत्पत्तिकत्वं वर्तमानकालोत्तरकालोत्पत्तिकत्वं वा तत्त्वम्, न चेदमध्यक्षम्, उत्पत्तेरतीन्द्रियत्वात्। इहाद्य घटो भविष्यतीत्यादौ च तादृशोत्पत्तेर्देशविशेषः कालविशेषश्चाधिकरणत्वेन प्रतीयते न तु प्रागभावस्योत्पत्तिमतो वा।

(गा०) अद्य भविष्यतीति प्रत्ययप्रसङ्गादिति। एतन्मते च प्रागभाव एवाद्यादिकालान्वयस्योपगन्तव्यत्वात् श्वोभाविनः प्रागभावेऽप्यद्यतनत्वस्याबाधितत्वादिति भावः। इदमुपलक्षणम्, उपदर्शितभविष्यत्त्वस्याख्यातार्थस्य धात्वर्थ एवान्वयस्य व्युत्पन्नतया घटादौ नामार्थे तदनन्वयप्रसङ्गोऽपि द्रष्टव्यः।

न च कालसम्बन्धरूपसत्ता भूधातोरर्थः तत्रैव वर्तमानप्रागभावप्रतियोगित्वरूपानागतत्वस्यान्वयः स्वीक्रियते तथा च वर्तमानप्रागभावप्रतियोगिसत्ताकत्वमेव भविष्यत्त्वं तादृशसत्तायामेवाद्यादिकालान्वयः। श्वोभाविनः सत्तायां चाद्यतनत्वस्य बाधान्नोक्तातिप्रसङ्ग इति वाच्यम्। एवं सत्यपि श्वोभाविनि परश्वःस्थायिनि घटादौ परश्वो भविष्यतीति प्रयोगस्य दुर्वारत्वात्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

परश्वःकालसम्बन्धस्य वर्त्तमानप्रागभावप्रतियोगिनः परश्वस्तत्वात् कालसम्बन्धत्वावच्छेदेन कालान्वयोपगमे च तादृशघटादौ श्वो भविष्यतीति प्रयोगानुपपत्तिः । तदीयकालसम्बन्धसामान्ये परश्वःकालवृत्तित्वस्येव श्वस्तनत्वस्यापि बाधात् । समानार्थकत्वादिति । तथा च उत्पत्स्यमानत्वं भविष्यत्वं तच्चानागतोत्पत्तिकत्वं लृट्प्रत्ययेन धात्वर्थोत्पत्तावनागतत्वप्रत्यायनादिति भविष्यत्त्वमपि तथा, अनागतत्वं च प्रागभावस्य प्रामाणिकत्वे वर्त्तमानप्रागभावप्रतियोगित्वं तदप्रामाणिकत्वे वर्तमानकालध्वंसाधिकरणकालीनत्वमिति तदुत्पत्तिकत्वमेव भविष्यत्वमिति भावः । प्रागभावे वर्त्तमानत्वं तत्तच्छब्दप्रयोगाधिकरणक्षणवृत्तित्वं काले वर्त्तमानत्वं च तत्तच्छब्दप्रयोगाधिकरणत्वमेव प्रागभावाघटितानागतत्वे उत्तरकालः क्षणरूपो ग्राह्यस्तेनातीताद्युत्पत्तेरपि वर्तमानकालध्वंसाधिकरणमहाकालादिवृत्तितया अतिप्रसङ्गस्य नावकाशः ध्वंसस्यापि कालोपाधितया वर्तमानकालध्वंसवृत्तित्वमेव वा विवक्षणीयम् ।

उत्पत्तेरतीन्द्रियत्वादिति । तद्घटकस्वाधिकरणकालध्वंसाधिकरणत्वसामान्याभावस्यातीन्द्रियस्यापि स्वाधिकरणकालस्य सम्भवेनातीन्द्रियतद्ध्वंसप्रतियोगिकत्वेनायोग्यत्वादिति भावः

अथातीन्द्रियतया भविष्यत्त्वस्य लौकिकप्रत्यक्षासम्भवेऽपि घटो भविष्यतीति व्यवहारप्रयोजकमानसादिज्ञानेऽनागतघटादिभानार्थं सामान्यप्रत्यासत्तेरावश्यकता । न चोत्पत्तिशरीरे उत्पत्तिमतः स्वपदार्थस्य तत्तद्व्यक्तित्वेन प्रविष्टतया अनागतव्यक्तीनां च विशिष्य तेन रूपेण ज्ञानस्य सामान्यलक्षणासहस्रेणाप्यसम्भवादुत्पत्तिघटितभविष्यत्वस्य मानसादिज्ञानमपि न सम्भवतीति वाच्यम् । सामान्यलक्षणया प्रमेयत्वादिप्रकारेण यावद्वस्तुज्ञानजन्यसंस्कारात्प्रमेयत्वादिमोषदशायां स्वरूपतस्तत्तद्व्यक्तित्वादिना अनागतस्यापि भानमङ्गीकृत्य तन्मूलकमानसादिज्ञानस्यावश्यमुपपादनीयत्वात् अन्यथा व्यवहारविलोपप्रसङ्गादिति चेन्न । विशिष्टप्रकारकसंस्काराद्विशेषणमोषवशेन स्वरूपतस्तत्प्रकारकस्मरणस्योपनीतभानस्य चोपगमे सामान्यलक्षणानुपगमेऽपि प्रमेयत्वादिनाऽनागतयावद्वस्तुप्रकारकानुमित्यादिजन्यसंस्कारात् स्वरूपतस्तद्व्यक्तित्वादिप्रकारकस्मरणसम्भवेनानागतघटादिज्ञानस्य च सम्भवेन व्य-

Digitized by Arya Samaj Foundation Chennai and eGangotri

वहारजनकविशिष्टगोचरमानसादिज्ञानोपपत्तेः । भविष्यत्वस्योत्पत्तिघटितत्वे पूर्वोक्तं श्वोभाविन्यद्य भविष्यतीति प्रयोगातिप्रसङ्गं वारयति । इहाद्य इति । तादृशोत्पत्तेरिति । देशविशेषः कालविशेषश्च तादृशोत्पत्तेरधिकरणत्वेन प्रतीयते इत्यन्वयः देशविशेषोपादानं दृष्टान्तार्थं उत्पत्तौ तदन्वयस्योक्तातिप्रसङ्गवारणानुपयुक्तत्वात् । न तु प्रागभावस्येति । येनोक्तातिप्रसङ्गः स्यादिति शेषः । घटादौ देशकालान्वयेऽपि उक्तातिप्रसङ्गवारणसम्भवादुत्पत्तिघटनानर्थक्यमित्याशङ्क्य तदपि निराकरोति । उत्पत्तिमतो वेति ।

दृष्टान्तदार्ढ्याय भागभावे देशान्वये अतिप्रसङ्गं प्रथमतो दर्शयति । कपालनाशेति ।

(दी०) अत एव कपालनाशजन्यघटनाशस्य घटाद्यात्मकतत्प्रागभाववत्यपि तत्र कपाले नेह घटध्वंसो भविष्यतीति बुद्धिः, न वा भवने श्वः समुत्पद्य प्राङ्गणे परश्वो गमिष्यति मैत्रे प्राङ्गणे परश्वो भविष्यतीति धीः ।

(गा०) तत्कपालसत्त्वे घटनाशे तत्र कपाले घटध्वंसो भविष्यतीति प्रयोगस्येष्टत्वात् कपालनाशजन्येति । प्रागभावप्रतियोगिनि घटादौ देशकालान्वये अतिप्रसङ्गं दर्शयति । न वेति । प्राङ्गण इति । तादृशमैत्रे प्राङ्गणवृत्तित्वस्य परश्वःकालवृत्तित्वस्य चाबाधात् अतिप्रसङ्गः, उत्पत्तौ देशकालान्वयोपगमे तत्र तत्तद्देशकालान्वयबाधान्नातिप्रसङ्गः ।

न च प्रागभावे तत्प्रतियोगिनि चोभयत्र कालाद्यन्वयस्वीकारान्न कोऽप्यतिप्रसङ्गः अद्यतनत्वस्य श्वोभाविनि विनष्टकपालवृत्तित्वस्य तन्नाशजन्यघटध्वंसे परश्वस्तनतत्प्राङ्गणवृत्तित्वयोर्दर्शितमैत्रप्रागभावेऽसत्त्वादिति किमुत्पत्त्यन्तर्भावेणेति वाच्यम् । कालस्योभयत्रान्वयोपगमे दर्शाद्यक्षणे भविष्यतो मैत्रस्य प्रागभावे दर्शवृत्तित्वबाधेन दर्शे मैत्रो भविष्यतीति प्रयोगानुपपत्त्या उत्पत्त्यन्तर्भावस्यावश्यकत्वात् उभयत्र देशान्वयापेक्षया लाघवेनोत्पत्तिमात्रे देशान्वयस्याप्युचितत्वात् निरुक्तभविष्यत्वस्य भविष्यदर्थकलृट्प्रत्ययाद्यर्थत्वे धातुवैयर्थ्यं उत्पत्तेः प्रत्ययार्थे एवान्तर्भावात्तदुत्पत्तावुत्पत्तिभानो-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पगमे चानुभवविरोध इत्युत्पत्तिघटितभविष्यतायाः प्रकृतिप्रत्ययोभयलभ्यतामाह । अत्र चेति

(दी०) अत्र च धातुनोत्पत्तिः प्रत्याय्यते प्रत्ययेन च धात्वर्थनिष्ठं तादृशप्रतियोगित्वं तादृशकालीनत्वं वा नङ्क्ष्यति नश्यति नष्ट इत्यादौ च प्रत्ययेन यथायथमनागता वर्तमानातीता चोत्पत्तिः तस्यामेव च कालविशेषादिर्विशेषणत्वेनान्वेति ।

(गा०) अत्र । निरुक्तभविष्यत्त्वे । घटकत्वं सप्तम्यर्थः । तादृशप्रतियोगित्वम् । वर्त्तमानप्रागभावप्रतियोगित्वम् । तादृशकालीनत्वम् । वर्त्तमानकालोत्तरकालीनत्वम् । उत्पत्तिघटितमपि भविष्यत्त्वं क्वचित् प्रत्ययार्थ इति दर्शयति । नङ्क्ष्यतीति । कालान्तरविहितलडादेरुत्पत्तिघटितार्थकत्वं च दृष्टान्तत्वेनोक्तम् । अतीता । वर्त्तमानध्वंसप्रतियोगिनी । तस्यामेवेत्येवकारेण नाशादिक्रियाव्यवच्छेदः । तद्व्यवच्छेदप्रयोजनं दर्शयति । एतेनेत्यादिना परास्तमित्यन्तेन ।

(दी०) एतेन श्वोभाविनाशके परश्वो नङ्क्ष्यतीति नष्टे च नश्यतीति च व्यवहारः स्यात् न स्याच्च नाशस्य विद्यमानत्वात् नष्ट इत्यादिव्यवहारः । न च तत्रातीतकालसम्बन्धित्वं वर्त्तमानत्वं वा निष्ठादेरर्थः, चिरविनष्टेऽपि पूर्वेद्युर्नष्टोऽधुना वेति व्यवहारप्रसङ्गादिति परास्तम् ।

(गा०) व्यवहारः स्यादिति । श्वोभाविनोऽपि नाशस्य परश्वस्तनत्वात् अतीतोत्पत्तिकनाशस्यापि वर्तमानत्वादिति भावः । न स्यादित्यत्रापि नष्ट इत्यनुषज्यते । तथा च नष्टेऽपि नष्ट इति व्यवहारो न स्यात् नाशेऽतीतत्वस्य बाधादित्यर्थः । एतदनुपपत्तेरुद्धारमाशङ्कते । न च तत्रेति । तत्र । नष्ट इत्यादौ । अतीतकालसम्बन्धित्वं वर्तमानध्वंसप्रतियोगिकालवृत्तित्वम् । लाघवादाह । वर्तमानत्वं वेति । नाशोत्पत्तिक्षणेऽपि नष्ट इति व्यवहारस्येष्टत्वात् इति हृदयम् ।

व्यवहारप्रसङ्गादिति । उत्पत्त्यनन्तर्भावे उक्तनिष्ठार्थस्यैव काल-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रूपाधिकरणस्यापि नाश एवान्वयस्योपगन्तव्यत्वात्। चिरातीतोत्पत्तिकेऽपि च विनाशे पूर्वदिनवृत्तित्वस्य अद्यतनत्वादेश्चाबाधादिति भावः। देशस्य नाशान्वये गृहोत्पन्नप्रागभावनाशात्मकघटादिमति प्राङ्गणे घटप्रागभावो नङ्क्ष्यतीति प्रयोगापत्तिर्बोध्या। परास्तमिति। उत्पत्तौ कालान्वयोपगमे श्वस्तनोत्पत्तिकनाशादौ परश्वस्तनोत्पत्तिकत्वादेर्बाधेन नाशस्य विद्यमानत्वेऽपि तदुत्पत्तेरतीतत्वेनोक्तातिप्रसङ्गाप्रसङ्गयोरनवकाशादिति भावः।

यद्यपि कारकविभक्त्यर्थस्यान्यत्र क्रियायामेवान्वयो दृष्टस्तथापि अगत्या व्युत्पत्तिवैचित्र्येणात्र क्रियान्वितप्रत्ययार्थेऽपि तदन्वय उपेयते इदं च नाशत्वमनुयोगिताविशेषरूपं नशधातुवाच्यमित्याशयेनाभिहितम्। नशधातोरुत्पत्तिमदभावत्वरूपनाशत्वावच्छिन्नवाचकत्वे तु अनागतत्वादिकमेव नङ्क्ष्यतीत्यादावपि प्रत्ययार्थः, तस्य कालविशेषदेशविशेषयोश्चोत्पत्तिरूपधात्वर्थैकदेशान्वयेनैव सामञ्जस्यात्, किं तु दर्शान्त्यक्षणाद्युत्पन्नप्रतिपदादिपर्यन्तस्थायिस्पन्दादिकमादाय प्रतिपदि गमिष्यतीत्यादिव्यवहारस्याप्रामाणिकत्वे तद्वतिप्रसङ्गवारणाय तत्रोत्पत्तिघटितं भविष्यत्त्वादिकं लृडादिप्रत्ययार्थो वाच्य इत्यवधेयम्।

ननु भविष्यति नङ्क्ष्यतीत्यादौ प्रत्ययार्थस्यानागतत्वादेरनागताद्युत्पत्तेर्वा धात्वर्थविशेषणत्वेनान्वये धात्वर्थस्योत्पत्तेराश्रयतासम्बन्धेन नाशस्य च प्रतियोगितासम्बन्धेन साक्षादेव नामार्थे स्वाश्रये प्रतियोगिनि चान्वयो वाच्यः स चायुक्तः नामार्थधात्वर्थयोर्भेदेनान्वयस्याव्युत्पन्नत्वात् प्रतियोगितासम्बन्धस्याभावप्रतियोगितानवच्छेदकतया न नङ्क्ष्यति इत्यादावगतेश्चेत्यत आह। कर्त्तरि विहितेन चेति।

(दी०) कर्त्तरि विहितेनाख्यातेन कृता वा यथायथमाश्रयत्वप्रतियोगित्वलक्षणं कर्तृत्वं आश्रयप्रतियोगिरूपश्च कर्त्ताऽभिधीयते। कार्यानुत्पाददशायां चाभावधीः सामयिकात्यन्ताभावमवगाहते। न च प्रतियोगिसमवायिनि समयावच्छेदेनात्यन्ताभाववृत्तौ मानाभावः, भाविनि नष्टे वा घटे इह कपाले

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

घटो नास्तीति प्रत्ययात् । न ह्ययं घटप्रतियोगिकमभावमात्रमवगाहते, यत्किञ्चिद्घटवत्यपि तादृशप्रत्ययप्रसङ्गात् । परं तु घटत्वावच्छिन्नप्रतियोगिताकम्, न च ध्वंसप्रागभावौ तथा सम्भवतो वा न तत्र कपाले ततः पूर्वं परतश्च बहूनां घटानां नष्टत्वादुत्पत्स्यमानत्वाच्च ।

(गा०) आख्यातेन भविष्यतीत्यादावाश्रयत्वरूपं नश्यतीत्यादौ प्रतियोगित्वरूपं भाक्तकर्तृत्वं कर्तरिक्तला भविष्यन्नित्यादौ आश्रयरूपः कर्त्ता नश्यन्नित्यादौ प्रतियोगिरूपः कर्त्ता ऽभिधीयते इत्यर्थः । तथा च धात्वर्थविशेषिततादृशप्रत्ययार्थयोरेव साक्षाद्भेदाभेदाभ्यां नामार्थे ऽन्वयाङ्गीकाव्युत्पत्तिविरोध इति भावः ।

ननु माभूद्भविष्यतीत्यादिव्यवहारप्रयोजकं लौकिकप्रत्यक्षं तथापि कार्यानुत्पाददशायां कपालादौ घटो नास्तीदानीमित्यादिलौकिकप्रत्यक्षे प्रागभावविषयके ध्वंसप्रागभाववत्यत्यन्ताभावासत्त्वनियमेनासम्भवद् घटत्वाद्यवच्छिन्नसामान्याभावविषयताकानागतप्रतियोगिभानार्थं सामान्यप्रत्यासत्तेरावश्यकतेत्याशङ्कां ध्वंसप्रागभावयोरत्यन्ताभावाविरोधितां व्यवस्थापयन्निराकुरुते । कार्यानुत्पादेत्यादिना । सामयिकेति । समयविशेषावच्छेदेन प्रतियोगिमद्वृत्तीत्यर्थकम् । अत्यन्ताभावमवगाहते इति । प्रतियोगिमत्यत्यन्ताभावस्य विरोधिनोऽपि ध्वंसादिमत्समयविशेषावच्छिन्नवृत्तौ बाधकाभावादिति भावः । तथा च प्राचीनघटादिरेव तत्र प्रतियोगितया भासते तेषामपि घटादिसामान्याभावप्रतियोगित्वादिति नानागतभानानुरोधेन सामान्यप्रत्यासत्तिसिद्धिरित्याशयः

साधकविरह एव बाधक इति शङ्कां निराकुरुते । न चेति । अभावम् । ध्वंसादिरूपम् । तादृशप्रत्ययप्रसङ्गादिति । ध्वंसादिकमादाय घटो नास्तीति प्रत्ययप्रसङ्गात् । घटत्वावच्छिन्नप्रतियोगिताकं अभावमवगाहते इत्यनुषङ्गेणान्वयः । न च । न हि । तथा च घटत्वावच्छिन्नप्रतियोगिताकौ ध्वंसप्रागभावप्रतीयोगितायामतिप्रसक्तस्य सामान्यधर्मस्यानवच्छेदकत्वात् । प्रत्येकं ध्वंसादिप्रतियोगितायां अतिप्रसक्तस्यापि घटत्वादेरनुगतकिञ्चिद्रूपावच्छिन्नानतिप्रसक्ततया अव-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रसिद्धस्य प्रतियोगितया भानासम्भवादित्यत आह । इहेदानीमिति । प्रत्ययः । अत्यन्ताभावप्रतीतिविलक्षणः । एतावता प्रागभावस्य कथञ्चिदपि न लौकिकप्रत्यक्षमिति पर्यवसित प्रागभावे युक्तिप्रदर्शनासमर्थः प्रागभावस्य प्रत्यक्षतामेव स्वीकरिष्यतीत्यभिसन्धिना प्रागभावस्याप्रत्यक्षत्वे तस्याप्रामाणिकत्वं प्रसञ्जयति । अथेति ।

(दी०) अथैवं जातो घट इत्यादिवदुत्पन्नो घटध्वंस इत्याद्विविलक्षणप्रत्ययबलेन नाशोऽतिरिच्यतां न तु प्रागभावः, पूर्वत्वतत्पूर्वत्वादिव्यवहारश्चातीतकालवृत्तित्वतदुत्पत्तिकालीनध्वंसप्रतियोगिकालवृत्तित्वादिविषयक एवास्तु दुःखात्यन्ताभावस्य स्वस्मिन्नुत्तरकालानुवृत्तिं दुःखसाधनध्वंसं वा समुद्दिश्य क्रियाविशेषे प्रवृत्तिरस्तु मानान्तरसिद्धं हि प्रयोजनमुद्दिश्य पुमांसः प्रवर्तन्ते न तु प्रवृत्त्यैव तत्सिद्धिः, उत्पन्नस्य पुनरुत्पादप्रसङ्गश्च लाघवात् कार्यादेः प्रतिबन्धकत्वेनापि निरसनीयः ।

(गा०) प्रागभावो नातिरिच्यतामित्यनेनान्वयः प्रमाणान्तरस्याप्रे खण्डनीयत्वादिति भावः । ननु कार्यानुत्पाददशायामिव कार्योत्तरमपि तदधिकरणेऽभावप्रत्ययस्य सामयिकात्यन्ताभावविषयकत्वसम्भवादतिरिक्तसंसर्गाभावखण्डनमेव सम्भवति किं तु ध्वंसप्रागभावान्यतरं विना उत्तरत्वपूर्वत्वादिकं न शक्यते निर्वक्तुमिति अन्यतरस्वीकार आवश्यकस्तथा च विनिगमनाविरहादुभयमेव सेत्स्यतीति शङ्काव्युदासाय ध्वंसस्यातिरिक्तत्वमन्तरा व्यवस्थापयति । जात इति । उत्पत्त्यंशे उपनीतभानात्मकादपि प्रत्ययाद्यथा उत्पत्तिविशिष्टो घटादिः सिध्यति तथा तादृशप्रत्ययादुत्पत्तिविशिष्टोऽभावः सेत्स्यति एतावतैवातिरिक्तध्वंसः सिद्धः अत्यन्ताभावस्यानुत्पन्नत्वात् न च सामयिकात्यन्ताभाव एवोत्पादविनाशशील इति मतमवलम्बनीयम्, प्रतियोग्युत्तरकालीनस्याभावस्याविनाशित्वे बाधकाभावात्तस्य विनाशकल्पनायां गौरवादविनाशिजन्याभावसिद्धावेव समीहितनिर्वाहात्तस्यात्यन्ताभावत्वे नास्त्येव विवाद इत्यर्थः प्रागभावो नष्ट इत्यादिप्रत्ययश्चासिद्ध इत्याशयः । पूर्वत्वतत्पूर्वत्वतदुत्तरत्वव्य-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

च्छेदकत्वसम्भवः प्रतीतिबलेनातिप्रसक्तेऽपि स्वरूपसम्बन्धरूपाव-च्छेदकत्वकल्पना सम्भवत्येवेत्यत आह । सम्भवतो वेति । तत्र कपाले इति । तथा ध्वंसप्रागभावावित्यनुषञ्जनीयम् । कुत इत्याकाङ्क्षायामाह तत इति । अत्रापि तत्रेत्यनुषञ्जनीयम् ।

नष्टत्वादुत्पत्स्यमानत्वाच्चेति । ध्वंसप्रागभावयोः सामान्याभावत्ववादिनापि समानाधिकरणसामान्यधर्मावच्छिन्नसमानकालीने ध्वंसादौ सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वं नाभ्युपगम्यते तथा सति तमादाय घटादिसत्त्वदशायामपि घटो नास्तीति प्रत्ययापत्तेरिति भावः ।

नन्वस्मन्मते प्रतियोग्यत्यन्ताभावस्य ध्वंसादिविरोधित्वेन ध्वंसात्यन्ताभावत्वात् तस्यैव ध्वंसो नास्तीत्यादिबुद्धिविषयत्वं भवन्मते तस्य तदविरोधित्वात् कपालादौ पटध्वंसो नास्तीत्यादिबुद्धेः को विषयः ? न हि तदविरोधिन्यपि तदत्यन्ताभावत्वं स्वीकर्तुं शक्यते अतिप्रसङ्गात् ध्वंसप्रतियोगिकाभावस्वीकारे चाभावप्रतियोगिकोऽतिरिक्ताभावो नाङ्गीक्रियते इति सिद्धान्तभङ्गप्रसङ्ग इत्याशङ्कते । अथेति ।

(दी०) अथैवं कपालादौ कथं घटध्वंसादिशून्यताबुद्धिः, अत्यन्ताभावस्य ध्वंसाद्यविरोधित्वादिति चेत् ? तत्तदधिकरणस्वरूपादतिरिक्तादेवानुगतादभावाद्वा इहेदानीं घटप्रागभाव इति च प्रत्ययो न लोकानाम् ।

(गा०) एवम् । ध्वंसादिविशिष्टेऽप्यत्यन्ताभावोपगमे । ध्वंसाद्यविरोधित्वात् । भवन्मते ध्वंसाद्यविरोधित्वेन तदभावप्रत्ययविषयत्वासम्भवात् । अनवस्थाप्रसंगेनाभावाभावो(१) नातिरिक्त इति सिद्धान्तमनुरुध्य समाधत्ते । तत्तदधिकरणस्वरूपादिति । लाघवमनुरुध्याह । अतिरिक्तादेवेति । अनुगतादित्यनेन पूर्वमते ऽननुगतभूयोधिकरणे ऽभावत्वकल्पनायां गौरवमिति सूचितम् ।

नन्वत्यन्ताभावप्रतीतिविलक्षणे इहेदानीं घटप्रागभाव इति प्रत्यये प्रतियोगिभानार्थं सामान्यप्रत्यासत्तेरावश्यकता तादृशप्रत्यये

(१) ध्वंसात्यन्ताभाव इति–२ पु० पा० ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रसिद्धस्य प्रतियोगितया भानासम्भवादित्यत आह । इहेदानीमिति । प्रत्ययः । अत्यन्ताभावप्रतीतिविलक्षणः । एतावता प्रागभावस्य कथञ्चिदपि न लौकिकप्रत्यक्षमिति पर्यवसितं प्रागभावे युक्तिप्रदर्शनासमर्थः प्रागभावस्य प्रत्यक्षतामेव स्वीकरिष्यतीत्यभिसन्धिना प्रागभावस्याप्रत्यक्षत्वे तस्याप्रामाणिकत्वं प्रसञ्जयति । अथेति ।

(दी०) अथैवं जातो घट इत्यादिवदुत्पन्नो घटध्वंस इत्यादिविलक्षणप्रत्ययबलेन नाशोऽतिरिच्यतां न तु प्रागभावः, पूर्वत्वतत्पूर्वत्वादिव्यवहारश्चातीतकालवृत्तित्वतदुत्पत्तिकालीनध्वंसप्रतियोगिकालवृत्तित्वादिविषयक एवास्तु दुःखात्यन्ताभावस्य स्वस्मिन्नुत्तरकालानुवृत्तिं दुःखसाधनध्वंसं वा समुद्दिश्य क्रियाविशेषे प्रवृत्तिरस्तु मानान्तरसिद्धं हि प्रयोजनमुद्दिश्य पुमांसः प्रवर्तन्ते न तु प्रवृत्त्यैव तत्सिद्धिः, उत्पन्नस्य पुनरुत्पादप्रसङ्गश्च लाघवात् कार्यादेः प्रतिबन्धकत्वेनापि निरसनीयः ।

(गा०) प्रागभावो नातिरिच्यतामित्यनेनान्वयः प्रमाणान्तरस्याग्रे खण्डनीयत्वादिति भावः । ननु कार्यानुत्पाददशायामिव कार्योत्तरमपि तदधिकरणेऽभावप्रत्ययस्य सामयिकात्यन्ताभावविषयकत्वसम्भवादतिरिक्तसंसर्गाभावखण्डनमेव सम्भवति किं तु ध्वंसप्रागभावान्यतरं विना उत्तरत्वपूर्वत्वादिकं न शक्यते निर्वक्तुमिति अन्यतरस्वीकार आवश्यकस्तथा च विनिगमनाविरहादुभयमेव सेत्स्यतीति शङ्काव्युदासाय ध्वंसस्यातिरिक्तत्वमन्तरा व्यवस्थापयति । जात इति । उत्पत्त्यंशे उपनीतभानात्मकादपि प्रत्ययाद्यथा उत्पत्तिविशिष्टो घटादिः सिध्यति तथा तादृशप्रत्ययादुत्पत्तिविशिष्टोऽभावः सेत्स्यति एतावतैवातिरिक्तध्वंसः सिद्धः अत्यन्ताभावस्यानुत्पन्नत्वात् न च सामयिकात्यन्ताभाव एवोत्पादविनाशशील इति मतमवलम्बनीयम्, प्रतियोग्युत्तरकालीनस्याभावस्याविनाशित्वे बाधकाभावात्तस्य विनाशकल्पनायां गौरवादविनाशिजन्याभावसिद्धावेव समीहितनिर्वाहात्तस्यात्यन्ताभावत्वे नास्त्येव विवाद इत्यर्थः प्रागभावो नष्ट इत्यादिप्रत्ययश्चासिद्ध इत्याशयः । पूर्वत्वतत्पूर्वत्वतदुत्तरत्वव्य-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वहारस्य प्रागभावकालीनत्वतत्प्रागभावकालीनत्वतत्कालीनप्रागभावप्रतियोगित्वविषयकत्वेन शब्द एवातिरिक्तप्रागभावे मानमिति शङ्कया ध्वंसमन्तर्भाव्य तन्निर्वक्ति । पूर्वत्वेति । अयं पूर्व इति सामान्यतोऽवधिविनिर्मुक्तव्यवहारस्य ध्वंसप्रतियोगिकालवृत्तित्वं चरमध्वंसव्यावृत्तं विषयः, तद्वृत्तित्वं तदनुयोगिकसम्बन्धप्रतियोगित्वं स च सम्बन्धः कालिको ग्राह्यः, अन्यथा ध्वंसप्रतियोगिस्वविषयकज्ञानरूपकालनिष्ठविषयितासम्बन्धप्रतियोगिनि चरमध्वंसेऽतिप्रसङ्गः एतल्लाभायैव कालपदम् । प्रतियोगित्वं ध्वंसत्वनिरूपकं ग्राह्यम् । अन्यथा ध्वंसरूपकालस्यापि प्रागभावध्वंसात्मकप्रतियोगिरूपप्रागभावप्रतियोगितया अतिप्रसङ्गात् प्रागभावास्वीकारेऽपि ध्वंसस्य स्वभेदात्मकघटादिध्वंसप्रतियोगित्वेनातिप्रसङ्गात् घटात् पूर्व इत्यादिव्यवहारस्य च घटाद्युत्पत्तिकालीनध्वंसप्रतियोगिकालवृत्तित्वं विषयः स्वस्य स्वोत्तरोत्पन्नस्यापि कस्यचित्स्वसमानकालीनध्वंसप्रतियोगिस्वोत्पत्तिक्षणादिवृत्तित्वादतिप्रसङ्ग इत्युत्पत्तिनिवेशनम् । स्वोत्पत्तिक्षणादेरपि स्वोत्पत्त्यधिकरणमहाकालादिवृत्तिध्वंसप्रतियोगित्वादुत्पत्तिकालपदेन उत्पत्त्यधिकरणक्षणो विवक्षणीयः ।

वस्तुतस्तु महाप्रलयानङ्गीकारे तदधिकरणकालध्वंसानधिकरणकालः तदङ्गीकारे तद्वृत्तिस्वनिष्ठध्वंसप्रतियोगिकालवृत्तित्वाभावकः कालस्तदुत्पत्तिकालस्तदुत्पत्तिद्वितीयक्षणपर्यन्तस्थायिस्थूलकालादिस्तु न तथा तथाविधकाले तदधिकरणाद्यक्षणध्वंसस्य सत्त्वात्तादृशकालवृत्तिध्वंसप्रतियोग्याद्यक्षणादिवृत्तितद्घटादौ तद्घटादिपूर्वत्वव्यवहारप्रसङ्ग इति क्षणत्वमनुपादेयमेव ।

(१)[तदधिकरणकालध्वंसानाधिकरणत्वं तद्वृत्तिस्वनिष्ठध्वंसप्रतियोगिवृत्तिस्वाभावकत्वमेव वा कालशतसमुदायाधिध्वंसस्य कालतया तदीयाद्यक्षणादिध्वंसेऽपि तदधिकरणकालध्वंसस्य वृत्तेस्तादृशध्वंसे न तथाविधतदुत्पत्तिकालीनताप्रसङ्गः ।]

अत्र चोत्पत्तिकालीनत्वस्य पृथगेव पूर्वपदार्थत्वमतोऽवधिविनिर्मुक्तव्यवहारस्य न तद्विषयकत्वं उत्पत्तिप्रतियोगिनो

---

(१) [ ]पाठोऽयं पुस्तकान्तरयोर्नास्ति ।

Digitized by Arya Samaj Foundation Chennai and eGangotri

घटादेः स्वशब्दादेव लाभ इति तद्विनिर्मोकेणैव शक्तिः कल्प्या पञ्चम्यर्थप्रतियोगित्वस्य घटादिविशेषितस्य निरुक्तोत्पत्तिकालघटकवृत्तावन्वयः । अथ वा ध्वंसप्रतियोगिकालवृत्तित्वमेव पूर्वपदार्थः, उत्पत्तिकालीनत्वं पूर्वपदयोगानुशिष्टपञ्चम्या एवार्थ इति बोध्यम् । आदिपदाभ्यां तदुत्तरन्यव्यवहारस्य ध्वंसाधिकरणकालवृत्तित्वतदधिकरणकालध्वंसाधिकरणकालोत्पत्तिकत्वविषयकत्वस्य च परिग्रहः ।

ननु प्रागभावानङ्गीकारे प्रायश्चित्तवैफल्यप्रसङ्गः । तथा च तत्प्रवृत्त्यनुपपत्त्या दुःखप्रागभावसिद्धिः । पापध्वंसस्य सुखदुःखाभावान्यत्वेन स्वतःप्रयोजनतायास्तद्साधनतया गौणप्रयोजनतायाश्चासम्भवात् अतो दुःखानुत्पादस्य तत्प्रागभावरूपस्यैव प्रायश्चित्तफलत्वमावश्यकं(१) अत एव दुःखं मे मा भूत् इति कामनयैव तदाचरणं न तु पापं नश्यत्विति कामनया ।

न च दुःखात्यन्ताभाव एव दुःखानुत्पादः स च सिद्धोऽप्यग्रिमकालसम्बन्धरूपासिद्धविशेषणविशिष्टः प्रागभाववत् प्रयोजनीभवितुमीष्टे अत एवासिद्धस्वत्वाद्युपरागेण सिद्धग्रामादाविच्छेति वाच्यम् । तदात्मनि दुःखस्यातीततया प्रायश्चित्तानन्तरं पुनर्निषिद्धाचरणस्थले दुःखस्योत्पत्स्यमानतया च तदत्यन्ताभावासम्भवादिति ध्वंसप्रागभावयोरत्यन्ताभावविरोधितावादिनां प्राचां प्रागभावयुक्तिं प्रतियोग्यधिकरणेऽपि समयभेदेनात्यन्ताभाववृत्ताद्यविरोधः, अन्यथा प्रतियोग्युत्पादपूर्वकाले तद्वत्त्यभावप्रत्ययबलेनैव प्रागभावसिद्ध्या युक्त्यन्तरानुसरणवैयर्थ्यात् इत्याशयेन तदविरोधितामतमवलम्ब्य दूषयति । दुःखात्यन्ताभावस्येति । स्वस्मिन्नुत्तरकालानुवृत्तिम् । स्वात्मावच्छेदेनोत्तरकालसम्बन्धम् । इदं च दुःखाभाववत्तत्सम्बन्धस्यापि स्वतःप्रयोजनत्वमित्यभिप्रायेण, स्वस्मिन् उत्तरकालानुवर्त्तमानदुःखाभावमित्येव वार्थः दुःखाभावस्य तत्स्वरूपतत्सम्बन्धस्य वा नित्यत्वेऽपि प्रायश्चित्ते क्षेमसाधारणतत्साधनत्वमव्याहतमेवेति भावः । आत्मतत्त्वविवेकटीकायां स्वयं क्षेमसाधारणफलसाधनताज्ञानस्य प्रवर्तकतां निराकृत्य दुःखसाधनगोचरद्वेषान्निष्फलेऽपि तदभावे इच्छा सम्भवति शत्रुवधादौ का-

---

(१) प्रायश्चित्तफलत्वात्–इति २ पु० पा० ।

Digitized by Arya Samaj Foundation Chennai and eGangotri

मनाया दुरपह्नवत्वात् इति युक्त्या पापध्वंसस्यापि प्रयोजनताया व्यवस्थापितत्वात् तन्मतमनुवर्त्तमान आह । दुःखसाधनेति । प्रवर्त्तनक्रियया समानकर्तृकतया उद्दिश्येति क्त्वाप्रत्ययः प्रायश्चित्तवैफल्ये तत्प्रवृत्त्यनुपपत्तेः प्रागभावसिद्धिरन्योन्याश्रयादसम्भवदुक्तिकैवेत्याह । मानान्तरेति । प्रवृत्तौ सत्यामेव तदनुपपत्तिर्ग्राह्या प्रवृत्तिश्च प्रयोजनसिद्ध्यधीना प्रमाणान्तरात् प्रयोजनसिद्धावेव सम्भवतीति प्रयोजनमन्तरेणानुपपद्यमानापि सा न प्रयोजनकल्पनायामुपयुज्यते अन्योन्याश्रयादित्यर्थः ।

न चान्यदीयप्रवृत्तिमवगत्य तदन्यथानुपपत्त्या प्रयोजनं परिकल्प्यान्यः प्रवर्त्तते इति नान्योन्याश्रय इति वाच्यम् । तथाप्यनवस्थाया दुर्वारत्वात् अन्यस्य प्रायश्चित्तप्रवृत्तिमजानतोऽपि तत्प्रवृत्तेश्च । इदन्त्वापाततः, प्रयोजनासिद्ध्या प्रवृत्त्युदयेऽपि विधितः प्रायश्चित्ते प्रवृत्तिसाध्यतामवगत्य तदन्यथानुपपत्त्या प्रयोजनकल्पनाया निराबाधत्वात् अन्यथा पापस्याप्रामाणिकत्वापत्तेः निषिद्धकर्मणः स्वध्वंसद्वारापि दुःखसाधनत्वसम्भवेन प्रायश्चित्तफलध्वंसप्रतियोगितयैव तत्सिद्धेः किं तु दुःखात्यन्ताभावादेः फलत्वसम्भवेन प्रागभावरूपफलापर्यवसाने एव निर्भरः ।

न चैवमपि पापध्वंसस्य फलत्वपक्षे पापे युक्त्यन्तराभावेन पापं कल्पयित्वा तद्ध्वंसस्य फलत्वमुपेयते दुःखप्रागभावं कल्पयित्वा तस्य नेत्यत्र विनिगमनाविरहात् प्रागभावसिद्धिरिति वाच्यम् । यतो दुःखप्रागभावानुवृत्तेः फलत्वेऽपि पापध्वंसस्य तन्निर्वाहकस्य फलत्वमावश्यकं पापसत्त्वे दुःखोत्पत्तेरावश्यकतया तदनिर्वाहादिति पापध्वंसफलत्वध्रौव्ये किं प्रागभावेन पापध्वंसस्येष्टान्तरासाधनत्वेऽपीष्टतोपपत्तेर्दर्शितत्वात् । एवं प्रायश्चित्तोत्तरं निषिद्धानाचरणस्थले प्रागभावोऽपि न सम्भवति प्रतियोगिनो दुःखस्यानुत्पत्स्यमानत्वात् । न चान्यत्रोत्पत्स्यमानं दुःखं प्रतियोगि, प्रागभावस्य प्रतियोगिसमानदेशवृत्तित्वादित्यादि तत्त्वम् ।

ननु प्रागभावानङ्गीकारे जातेऽपि घटज्ञानशब्दादिरूपकार्ये तदुत्पत्त्यादिप्रयोजकतत्सामग्र्या अक्षतत्वात् पुनस्तत्कार्योत्पत्तेस्तत्कार्यस्यैव वा आपत्तिरिति तदानीं सामग्र्यभावनिर्वाहकव्यतिरेकप्रतियोगिनः प्रागभावरूपकारणस्य कल्पनमावश्यकमिति युक्ति

Digitized by Arya Samaj Foundation Chennai and eGangotri

दूषयति । उत्पन्नपुनरुत्पादेति । तत्र कार्यं तदुत्पत्त्यनन्तरोत्पादापत्तिरित्यर्थः । आपाद्यप्रसिद्धिश्च कार्यान्तरे । प्रसङ्गाकारस्तु अयं घटो यदि तदुत्पत्तिक्षणवृत्तिसामग्रीकः स्यात् तदा तत्क्षणानन्तरमुत्पद्येतेति ।

न चोत्पत्तेः स्वत्वघटितत्वेनाननुगततया आपादकाननुगमे मूलशैथिल्यं आपादकस्य स्वसामग्रीघटिततया अननुगमे च दृष्टान्तासिद्धिस्वरूपासिद्ध्योरन्यतरप्रसङ्ग इति वाच्यम् । एतत्क्षणावृत्तिस्वसामग्रीकं यद्यत्तद्भेदकूटेनानुगतेन एतत्क्षणानुत्तरस्वोत्पत्तिकं यद्यत्तद्भेदकूटस्यापादनीयत्वात् ।

केचित्तु उत्पन्नस्य कार्यस्य द्वितीयादिक्षणे उत्पादप्रसङ्ग उत्पन्नपुनरुत्पादप्रसङ्गः । आपादनाकारश्च एतद्घटाद्युत्पत्तिद्वितीयादिक्षणो यद्येतदुत्पत्तिप्रयोजकसामग्र्युत्तरः स्यात् एतदुत्पादाधिकरणं स्यात् प्रथमक्षण एव चापाद्यप्रसिद्धिरित्याहुः । कार्यादेः प्रतिबन्धकत्वेन कार्याभावादेर्हेतुत्वोपगमेन घटादिरूपकार्यस्य सामान्यतः कार्यत्वेन प्रतिबन्धकत्वमसम्भवि तत्पूर्वं तदधिकरणे संयोगादिरूपकार्यस्यावश्यकत्वात् अपि तु समवायेन जन्यद्रव्यत्वावच्छिन्नं प्रति द्रव्यत्वादिना ज्ञानादिरूपकार्यं प्रति च ज्ञानत्वादिना अनुगतरूपेण प्रतिबन्धकत्वासम्भवादगत्या तत्तद्व्यक्तित्वेनैव प्रतिबन्धकता वाच्या घटादिनाशोत्तरं तदधिकरणे खण्डघटाद्युत्पाददशायां तदुत्पादापत्तेः कार्यप्रतिबन्धकताया दुर्वारत्वात् तत्तद्घटादिव्यक्तिनाशस्यापि प्रतिबन्धकत्वं वक्तव्यमिति कार्यध्वंसपरिग्रहायादेरित्युक्तम् ।

न च यत्संयोगादिव्यक्तिनाशात् महाघटादिव्यक्तिनाशस्तद्व्यक्तेरपि तद्घटव्यक्तिहेतुतया तदभावादेव न पुनस्तदुत्पादप्रसङ्ग इति किं तत्र नाशप्रतिबन्धकतयेति वाच्यम् । तत्संयोगादिव्यक्तीनां तत्तद्व्यक्तित्वेन हेतुत्वस्य सर्वत्रासिद्धेस्तस्य प्रामाणिकत्वेऽपि धारावहनस्थले प्राथमिकनिर्विकल्पकस्य चतुर्थादिक्षणे आपत्तिवारणाय तत्र कार्यध्वंसस्य प्रतिबन्धकताया आवश्यकत्वाच्चेति ।

न चैवमनन्तप्रतिबन्धकताकल्पनापेक्षया प्रागभावहेतुत्वे लाघवात् तत्सिद्धिरिति वाच्यम् । तत्कार्ये उत्पन्नेऽपि कार्यान्तरप्रागभाववालत् तत्कार्योत्पादवारणाय तत्कार्यं प्रति तत्कार्यप्रागभा-

Digitized by Arya Samaj Foundation Chennai and eGangotri

धन्वेन प्रागभावस्वीकर्त्रापि अनन्तकारणतानामनन्तप्रागभावानां च कल्पनीयत्वात् ।

न च तादात्म्यसम्बन्धेन कार्यसामान्यं प्रति प्रतियोगितासम्बन्धेन प्रागभावत्वेन एकहेतुतयैव सर्वत्रोत्पन्नपुनरुत्पादवारणं सम्भवति उत्पन्नप्रतियोगिकप्रागभावस्य विनाशादुत्पन्नकार्ये प्रतियोगितया प्रागभावस्यासत्त्वादिति वाच्यम्। उत्पन्नव्यक्तौ प्रतियोगितया प्रागभावासत्त्वेऽपि तस्याः समवायिदेशे पुनरनुत्पादप्रयोजकस्य दुर्वारत्वात्तदुत्पादप्रयोजकसामग्र्यास्तत्प्रागभावविनाशेऽप्यक्षतत्वात् ।

न च समवायेन कार्योत्पत्तौ सम्बन्धान्तरेण कार्योत्पादकसामग्रीसमवधानमप्यपेक्षितमिति तादात्म्येन कार्योत्पादकसामग्र्यभावान्नानुपपत्तिरिति वाच्यम् । तादृशसामग्रीसमवधानस्याव्यवहितप्राक्क्षणे एवापेक्षितत्वात् तदा च कार्यान्तरप्रागभावस्यैव सत्त्वात् इति ।

ननूत्पत्तिराद्यक्षणसम्बन्धः आद्यत्वं च स्वाधिकरणक्षणवृत्तेः स्ववृत्तेर्वा प्रागभावस्य प्रतियोगित्वमिति प्रागभावघटितोत्पत्तिप्रत्यय एव तत्साधक इत्याशङ्क्य प्रागभावमन्तरेणोत्पत्तिं निर्वक्ति । तदुत्पत्तिश्चेति ।

(दी०) तदुत्पत्तिश्च महाप्रलयमनङ्गीकुर्वतां मते स्वाधिकरणसमयध्वंसानधिकरणसमयसम्बन्धः, तदुक्तम् 'अध्वस्तक्षणयोगस्य क्षणयोगो जनिर्मतेति' । क्षणः समयः ।

(गा०) महाप्रलयाङ्गीकारे चरमध्वंसरूपतदुत्पत्तावव्याप्तिस्तदधिकरणसमयस्य महाकालस्य ध्वंसस्य च ध्वंसाप्रसिद्धेरिति तदनङ्गीकारपक्षावलम्बनम् । स्वाधिकरणेति । स्वमुत्पत्तिमत्त्वेनाभिमतम् । द्वितीयादिक्षणस्य स्वाधिकरणाद्यक्षणध्वंसाधिकरणतया न तत्सम्बन्ध उत्पत्तिः तदधिकरणसमयस्य तत्प्रकारेणैव निवेशो न तु तदीयाधिकरणताप्रकारेण गौरवात् । एवं च स्वविषयकातीतज्ञानस्य स्वानधिकरणत्वेऽपि विषयितासम्बन्धेन स्वावच्छिन्नतया तद्ध्वंसमादायासम्भवस्य संयोगादिना घटादिमतो यो ध्वंसस्तदवच्छिन्नभेदस्य द्वितीयक्षणादावपि सत्त्वेनातिव्याप्ते-

Digitized by Arya Samaj Foundation Chennai and eGangotri

धारणाय कालिकसम्बधः स्वसम्बन्धतया प्रवेशनीयः तल्लाभायैव प्रथमं समयपदम् ध्वंसानधिकरणत्वं च कालिकसम्बन्धेन ध्वंसावच्छिन्नभिन्नत्वं कालिकसम्बन्धाप्रवेशे द्वितीयादिक्षणस्यापि विषयितासम्बन्धेन स्वाधिकरणसमयध्वंसावच्छिन्नज्ञानादिभिन्नतया अतिप्रसङ्गादिति तन्निवेशलाभाय द्वितीयं समयपदम्। स्वपूर्वोत्पन्नस्य विषयकज्ञानादिनिष्ठस्वीयविषयितादिसम्बन्धस्यानुत्पत्तितया तादृशसमयसम्बन्धोऽपि कालिको ग्राह्यः तल्लाभोऽपि द्वितीयसमयपदादेव ।

एतादृशोत्पत्तिपदार्थ आचार्याणामप्यनुमत इत्याह । तदुक्तमिति । अध्वस्तेति । अध्वस्तः यत्क्षणेऽविनष्टःक्षणयोगः क्षणनिष्ठतत्स्वरूपसम्बन्धो यस्य यदीयक्षणयोगध्वंसानाधिकरणं यत्क्षण इति यावत् तस्य तादृशतत्सम्बन्धो जनिरुत्पत्तिरित्यर्थः । यदीयक्षणयोगे यत्क्षणनिष्ठध्वंसाप्रतियोगित्वं तस्य तत्क्षणयोग इति यथाश्रुतार्थो नादरणीयः । तदीयाद्वितीयादिक्षणयोगस्य द्वितीयादिक्षणवृत्तिध्वंसाप्रतियोगितया द्वितीयादिक्षणसम्बन्धेऽतिव्याप्तेः यदीयक्षणयोगत्वावच्छेदेन यत्क्षणवृत्तिध्वंसाप्रतियोगित्वविवक्षयाऽतिप्रसङ्गवारणे गौरवात् महाप्रलयानङ्गीकारे स्वीयक्षणयोगध्वंसाधिकरणत्वसामान्याभावस्यैव लाघवेन लक्षणे निवेशौचित्यात तदङ्गीकारे तदुत्पत्तावप्रसिद्धिनिबन्धनाव्याप्तेर्वारणाय यथाश्रुतार्थविवक्षयैव क्वचित्रपीत्यादिलक्षणं वक्ष्यते । आद्यक्षणे स्वाधिकरणक्षणध्वंसानधिकरणत्वस्येव स्वीयकालसम्बन्धध्वंसाधिकरणत्वसामान्याभावस्यापि सत्त्वात् द्वितीयादिक्षणे स्वीयाद्यक्षणसम्बन्धध्वंसवति स्वीयकालसम्बन्धध्वंसाधिकरणत्वसामान्याभावस्यासत्त्वात्प्रथमक्षणस्य द्वितीयक्षणपर्यन्तावस्थायिस्थूलकालस्य स्वीयकालसम्बन्धध्वंसाधिकरणत्वात् प्रथमक्षणपर्यन्तावस्थायिस्थूलकालस्य चान्त्यक्षणावच्छिन्न एव सम्बन्धत्वेन तत्सम्बन्धस्योत्पत्तित्वव्यवहारस्येष्टत्वात् द्वितीयस्यापि क्षणस्य क्षणत्वप्रवेशो वृथेत्याशयेनाह । क्षणैः समय इति ।

न च तादृशस्थूलकालसम्बन्धस्योत्पत्तित्वे तस्य तादृशकालस्वरूपस्य स्वपूर्वक्षणेऽपि सत्त्वात्स्वस्मिन्स्वपूर्वक्षणोत्पन्नत्वव्यवहारप्रसङ्गः घटादेः कालसम्बन्धस्य घटादिस्वरूपत्वे च द्वितीयादि-

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्षणेऽपि तत्स्वरूपाद्यक्षणसम्बन्धसत्त्वेन तत्र तद्द्वितीयक्षणानुत्पन्नत्वव्यवहारप्रसङ्गः। द्वितीयक्षणादेस्तदीयकालसम्बन्धध्वंसाधिकरणत्वानुपपत्त्या अध्वस्तक्षणयोगस्येत्यनेन द्वितीयक्षणसम्बन्धव्यावर्त्तनायोगाच्चेति वाच्यम्। तदीयकालसम्बन्धस्य तत्तदधिकरणकालोभयरूपत्वात् अन्यथा स्वानधिकरणकाले स्वाधिकरणकालात्मकस्वीयसम्बन्धसत्त्वेन स्वस्मिन् स्वानधिकरणकालवृत्तित्वप्रसङ्गस्य भवतोऽपि दुर्वारत्वात्।

अथोत्पत्त्यर्थकपदस्योत्पत्तिमत्तत्तत्पदार्थान्तर्भावेण शक्त्युपगमे शक्त्यानन्त्यप्रसङ्गः अपूर्वपदार्थीयोत्पत्तौ प्राक्शक्त्यग्रहेण तत्प्रतीत्यनुपपत्तिश्च। न च तत्पदार्थानन्तर्भावेणैव शक्तिः तत्तत्पदार्थाधिकरणसमयध्वंसानधिकरणत्वलाभश्च तत्तत्पदसमभिव्याहारादिति वाच्यम्। घट उत्पद्यते इत्यादौ धात्वर्थैकदेशसमयविशेषणतया नामार्थघटादीनामन्वये आकाङ्क्षावैचित्र्येण तदन्वयोपगमेऽपि घटत्वादिनैव तस्यान्वयो वाच्यो न तु तत्तद्व्यक्तित्वेन तेन तेन रूपेण घटादिपदादनुपस्थितेः तथा च तत्र सामान्यतो घटादिमत्समयध्वंसानधिकरणत्वं समये प्रत्येतव्यं तथा च बाधः समयमात्रस्यैव पूर्वपूर्वघटादिमत्समयध्वंसवत्त्वात्।

एतेन समभिव्याहृतपदार्थतावच्छेदकत्वोपलक्षितधर्मवदधिकरणसमयध्वंसानधिकरणसमयसम्बन्धत्वेन सर्वनामवदेकशक्तिस्वीकारेऽपि न निस्तार इति चेत्? सत्यम्। स्वप्रतियोगिवृत्तित्वसम्बन्धावच्छिन्नप्रतियोगिताकध्वंसाभावविशिष्टस्वप्रतियोगिकसमयसम्बन्धोऽनुगत एवोत्पत्तिपदार्थः द्वितीयादिक्षणोत्पत्तिकध्वंसप्रतियोगिनि काले स्वस्ववृत्तेः द्वितीयादिक्षणे न स्वस्य तादृशसम्बन्धावच्छिन्नध्वंससामान्याभावविशिष्टत्वमिति तादृशाभावविशिष्टस्वप्रतियोगिकसम्बन्ध आद्यक्षण एवेति नातिप्रसङ्गः प्रतियोगी च उपलक्षणविधया सम्बन्धघटक इति ध्वंसकाले तत्प्रतियोग्यसत्त्वेऽपि न तद्घटितसम्बन्धावच्छिन्नध्वंसाभावो द्वितीयक्षणे।

न च ध्वंसकाले तत्प्रतियोगिसमयवृत्तित्वस्याप्यसत्त्वात् कथं तत्सम्बन्धावच्छिन्नाभावदौर्लभ्यं तत्सम्बन्धासत्त्वे सम्बन्धावच्छिन्नाभावस्याप्यावश्यकत्वात् कालान्तरीणसम्बन्धाश्रयेऽप्यवर्त्तमानस्योपलक्षणभूतसम्बन्धावच्छिन्नाभावस्य प्रामाणिकत्वादिति वा-

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्यम् । स्वप्रतियोगिवृत्तितादात्म्यस्य सम्बन्धतास्वीकारेणानुपपत्त्यनवकाशात् स्वतादात्म्यस्य स्वस्मिन्सर्वदैव सत्त्वात् ।

(दी०) तदङ्गीकारे तु क्वचिदपि यदीयसमयसम्बन्धे यत्समयवृत्तिध्वंसप्रतियोगित्वं नास्ति तस्य तत्समयसम्बन्धः तदधिकरणक्षणावृत्तित्वव्याप्यस्ववृत्तिध्वंसप्रतियोगिताकसमयवृत्तित्वं वा । क्षणत्वं च स्ववृत्तिध्वंसप्रतियोग्यनाधारत्वं स्ववृत्तिध्वंसप्रतियोगिप्रतियोगिकयावद्ध्वंसविशिष्टसमयत्वं स्ववृत्तियावद्ध्वंसविशिष्टसमयत्वं स्ववृत्तियावदभावविशिष्टसमयत्वं स्वस्वपूर्ववर्तियावत्पदार्थविशिष्टसमयत्वं वा ।

(गा०) तदङ्गीकारे तु । महाप्रलयाङ्गीकारे तु । क्वचिदपीति । यदीयसमयसम्बन्धसामान्ये यत्समयवृत्तिध्वंसप्रतियोगित्वाभाव इत्यर्थः । स्ववृत्तिध्वंसाप्रतियोगितदीयसमयसम्बन्धसामान्यकसमयानुयोगिकस्तत्सम्बन्ध उत्पत्तिरिति समुदायार्थः । तदीयसमयसम्बन्धस्य कस्याप्याद्यक्षणे ध्वंसासत्त्वात्तत्सम्बन्धसामान्यस्याद्यक्षणवृत्तिध्वंसाप्रतियोगितया आद्यक्षण एवेदृशं स्वमिति तत्सम्बन्ध उत्पत्तिः । चरमध्वंसीयसमयसम्बन्धस्याप्रसिद्धावपि तदीयसम्बन्धसामान्ये प्रलयवृत्तिध्वंसाप्रतियोगित्वसत्त्वात्प्रलयसम्बन्ध एव तदुत्पत्तिः द्वितीयादिक्षणसम्बन्धस्य द्वितीयादिक्षणवृत्तिध्वंसाप्रतियोगितया तत्सम्बन्धातिप्रसङ्गवारणाय सामान्यपदं तदुपादाने च सामान्यान्तर्गतप्रथमक्षणसम्बन्धस्य द्वितीयादिक्षणवृत्तिध्वंसाप्रतियोगित्वविरहान्न द्वितीयक्षणादि तादृशं स्वमिति नातिप्रसङ्गः । तदीयसमयसम्बन्धाप्रतियोगिकस्ववृत्तिध्वंससामान्यकसमयानुयोगिकस्तत्सम्बन्ध उत्पत्तिरित्यपि लक्षणं सम्भवति सामान्यपदमनन्तर्भाव्य स्ववृत्तिध्वंसप्रतियोगिसम्बन्धाप्रतियोगितत्कसमयानुयोगिकस्तत्सम्बन्धस्तथेत्यपि शक्यते वक्तुं उत्पत्तिनिर्वचनोपयोगितयैव क्षणलक्षणमवतारयितुं गुरुशरीरामपि क्षणघटितामुत्पत्तिं निर्वक्ति । तदधिकरणेति । व्याप्यत्वं स्वव्यापकतत्कत्वं तथा च स्ववृत्तिध्वंसप्रतियोगिताव्यापकतदधिकरणक्षणवृत्तित्वा-

Digitized by Arya Samaj Foundation Chennai and eGangotri

भावकसमये तत्सम्बन्ध उत्पत्तिरित्यर्थः । तदीयाद्यक्षणवृत्तिध्वंसप्रतियोगिमात्रस्यैव तदधिकरणक्षणे अवृत्तेस्तत्सम्बन्धसङ्ग्रहः । द्वितीयादिक्षणोत्पत्तिकध्वंसप्रतियोगिनस्तदधिकरणाद्यक्षणादौ वृत्तेर्नातिप्रसङ्गः द्वितीयादिक्षणवृत्तिकध्वंसप्रतियोगिनश्चिरविनष्टस्य तदधिकरणक्षणावृत्तितया अतिप्रसङ्गवारणाय ध्वंसप्रतियोगिवृत्तित्वमुपेक्ष्य ध्वंसप्रतियोगिताव्यापकत्वमभावविशेषणमुपात्तं प्रतियोगितायां तदधिकरणक्षणवृत्त्यवृत्तित्वरूपताद्दशक्षणावृत्तित्वव्याप्तिनिवेशे चिरविनष्टनिष्ठद्वितीयादिक्षणवृत्तिध्वंसप्रतियोगितायां तत्सत्त्वेनातिप्रसङ्गः ताद्दशप्रतियोगितासामान्ये तथाविधव्याप्तिनिवेशे सामान्यपदार्थस्य व्यापकताघटिततया गौरवमिति स्वव्यापकतत्कत्वरूपव्याप्तेरेव निवेशः ।

न च याद्दशक्षणद्वयाद्यात्मककालमध्ये न कस्यापि विनाशो जातस्तत्रातिव्याप्तिरिति वाच्यम् । प्रतिक्षणं कस्यचिदुत्पत्तिः कस्यचिद्विनाश इति नियमात् आद्यक्षणवृत्तिध्वंसप्रतियोगिनोऽपि तदधिकरणस्थूलकालवृत्तितया असम्भवादित्यतः क्षणनिवेशनम् । तदधिकरणक्षणावृत्तित्वस्थले कालिकसम्बन्धेन तदवृत्तित्वानिवेशेनाप्युपपत्तौ उक्तयुक्त्या क्षणघटनानुरोधेन गुरुतरारम्भः ।

नन्वत्र क्षणत्वं स्ववृत्तिप्रागभावप्रतियोग्यनधिकरणत्वं स्ववृत्तिप्रतियोगिकप्रागभावानाधारत्वं वा प्रागभावघटितमेवेत्यत आह । क्षणत्वं चेति । स्ववृत्तीति । ध्वंसतत्प्रतियोगिनोरेकक्षणावृत्त्योरधिकरणं स्थूल एव कालो न तु क्षण इति स्ववृत्तिध्वंसप्रतियोग्यनधिकरणत्वं तस्य सुघटम् । न च क्षणिकपदार्थानङ्गीकारे कर्मादेरेव याद्दशविशेषणविशिष्टस्य क्षणमात्रस्थायिता ताद्दशविशेषणविशिष्टस्य क्षणतयोक्तलक्षणासम्भवः कालमात्रस्यैव स्ववृत्तिध्वंसप्रतियोग्याधारत्वादिति वाच्यम् । प्रतियोग्यनधिकरणत्वं हि न प्रतियोग्याधारभिन्नत्वं किं तु प्रतियोग्याधारताविरहः प्रतियोगिविरह एव वा उपान्त्यादिक्षणावच्छेदेन स्ववृत्तिध्वंसप्रतियोग्यधिकरणस्यापि कर्मादेरन्त्यक्षणावच्छिन्नस्य ताद्दशाभावविशिष्टत्वान्न दोषः तदधिकरणक्षणावृत्तित्वत्यादिलक्षणे च तदधिकरणतावच्छेदकस्ववृत्तिध्वंसप्रतियोग्याधारताविरहवैशिष्ट्यरूपक्षणत्वावच्छिन्नावृत्तित्वमेव विवक्षितं तेन घटाद्यधिकरणस्थलकाले उक्तविशेषणावच्छिन्नतया क्षणा-

Digitized by Arya Samaj Foundation Chennai and eGangotri

रूपे तदीयाद्यक्षणवृत्तिध्वंसप्रतियोगिनां वृत्तावपि नासम्भवः स्वप्रतियोगिकध्वंसवत्तादात्म्यसम्बन्धावाच्छिन्नप्रतियोग्यभावविशिष्टत्वमनुगतं क्षणत्वं सम्बन्धमध्ये स्वपदार्थानिवेशे क्षतिविरहादित्यवधेयम् । अत्र यथाश्रुते स्ववृत्तिध्वंसप्रतियोग्यनाधारत्वं यदि तादृशाधारताप्रतियोगिकाविरहो विवक्षितस्तदा स्ववृत्तिध्वंसप्रतियोगिपूर्वविनष्टपदार्थाधारताविशेषविरहविशिष्टत्वं कर्मादीनां सर्वदैवेत्यतिप्रसङ्गात्तादृशाधारतात्वावच्छिन्नाभावस्तादृशप्रतियोगित्वावच्छिन्नाभावो वा विवक्षणीयः तथा च महाप्रलयात्मकक्षणेऽव्याप्तिः तद्वृत्तिध्वंसप्रतियोग्याधारतात्वादेः स्वसमनियतध्वंसप्रतियोग्याधारतात्वापेक्षया गुरुत्वेन तदवच्छिन्नाभावाप्रसिद्धेः । न च महाप्रलयस्य क्षणत्वाभाव इष्ट एवेति वाच्यम् । तथा सति चरमध्वंसाधिकरणक्षणाप्रसिद्धेस्तदुत्पत्तावुक्तलक्षणाव्याप्तिरिति स्ववृत्तिध्वंसप्रतियोगित्वाद्यवच्छिन्नाभावमुपेक्ष्य तादृशप्रतियोगिकाभावकूटं निवेश्य लक्षणान्तरमाह । स्ववृत्तीति । अभावकूटान्तर्गतध्वंसभिन्नाभावनिवेशे प्रयोजनाभावः प्रागभावस्य प्रामाणिकत्वमते प्रागभावादिघटितकूटनिवेशेऽसम्भवात् सर्वमतसाधारण्यानुरोधाच्च यावन्तो ध्वंसा एव निवेशिताः स्ववृत्तिध्वंसप्रतियोगिपूर्वविनष्टप्रतियोगिकध्वंसवैशिष्ट्यस्य कर्मादौ सर्वदा सत्त्वाद्यावत्त्वं ध्वंसविशेषणम् । यावद्ध्वंसवैशिष्ट्यं प्रलयान्यक्षणमात्राव्याप्तमतः स्ववृत्तिध्वंसप्रतियोगिप्रतियोगिकत्वं यावत्त्वविशेष्यतावच्छेदकतया निवेशितं यावद्ध्वंसविषयकज्ञानादेर्विषयितालक्षणवैशिष्ट्यं द्विक्षणावच्छिन्नस्येति कालिकसम्बन्धात्मकवैशिष्ट्यनिवेशलाभाय समयपदम् । वस्तुतः स्ववृत्तिध्वंसप्रतियोगिशब्दादिप्रतियोगिकया ध्वंसविशिष्टत्वं गगनादेरपि महाप्रलये न च तस्य क्षणत्वं कालत्वविरहादिति तद्वारणाय समयपदम् ।

न च कालिकसम्बन्धेन स्ववृत्तित्वनिवेशादेव न गगनादावतिप्रसङ्गप्रसङ्गः तत्र कालिकसम्बन्धानिवेशात् तन्निवेशलाभस्यैव वा समयपदप्रयोजनत्वात् ।

एतेन पापध्वंसविषयकत्वस्य ज्ञानादौ द्विक्षणावच्छिन्ने सत्त्वेऽपि अन्त्यक्षणोत्पन्नध्वंसस्य प्राक्क्षणेऽसत्त्वेनोपलक्षणतया यावद्ध्वंसरूपविशेषणावच्छिन्नस्य क्षणिकत्वमेवेति पूर्वोक्ताव्याप्त्यसङ्गतावपि

Digitized by Arya Samaj Foundation Chennai and eGangotri

न क्षतिः। स्ववृत्तियावद्ध्वंसवैशिष्ट्यस्य लक्षणत्वसम्भवेऽपि गुरुण्युक्तलक्षणे यथासन्निवेशे वैयर्थ्यविरहः पूर्वलक्षणानुसारेण गुरुलक्षणमभिधाय पर्यवसितस्योक्तस्यैव लक्षणरूपतामाह। स्ववृत्तीति। ध्वंसत्वं यदि जन्याभावत्वं तदा प्रागभावानङ्गीकारे जन्यत्वांशवैयर्थ्यं अत्यन्तान्योन्याभावयोः सर्वदैव सत्त्वेन तद्व्यावृत्तेर्विफलत्वात् अन्त्यक्षणावच्छिन्नस्ववृत्तिध्वंसप्रतियोगिस्ववृत्तिभाववैशिष्ट्यस्यान्त्यक्षणावच्छिन्नेऽप्यसत्त्वेनाभावत्वस्य भावभिन्नत्वरूपस्यैव सफलत्वादिति यावद्भावघटितमेव लक्षणमाह। स्ववृत्तीति। अन्त्यक्षणावच्छिन्नस्य कर्मादेः क्षणत्वमते लक्षणान्युक्त्वा आद्यक्षणावच्छिन्नानां तेषां क्षणत्वमतेनान्यल्लक्षणमाह। स्वस्वपूर्वेति। स्वस्मिन् स्वपूर्वकाले च वर्त्तते ये तादृशयावद्विशिष्टत्वमर्थः पदार्थत्वं न निविष्टं अव्यावर्त्तकत्वात् कर्मादीनां द्वितीयादिक्षणेऽपि स्वस्वपूर्ववर्त्तियत्किञ्चिद्वस्तुविशिष्टत्वाद्यावादिति। तथा च द्वितीयक्षणे विनष्टतथाविधपदार्थवैशिष्ट्यस्याद्यक्षण एव सत्त्वान्नातिप्रसङ्गः स्वपूर्ववर्त्तिनां स्वोत्पत्तिकालीननाशप्रतियोगिनां वैशिष्ट्यस्य काप्यसत्त्वादसम्भव इति स्ववृत्तित्वं पदार्थविशेषणम्। स्ववृत्तीनां द्वितीयादिक्षणोत्पन्नानामाद्यक्षणावच्छिन्नेऽपि स्वस्मिन्वैशिष्ट्याभावादसम्भव इति स्वपूर्ववर्त्तित्वं विशेषणम्।

अत्र प्राङ्निरुक्तस्य स्वोत्पत्तिकालीनध्वंसप्रतियोगित्वरूपकालनिष्ठपूर्वत्वस्य निवेशे उत्पत्तिघटकक्षणत्वे उत्पत्तिनिवेशादन्योन्याश्रय इत्याशङ्क्य उत्पत्त्यघटितपूर्वत्वं निर्वक्ति। स्वपूर्वत्वं चेति।

(दी०) स्वपूर्वत्वं च स्वाधिकरणयावत्कालवृत्तिध्वंसप्रतियोगित्वं जन्यमात्रस्यैव कालोपाधित्वाददोषः। यो यत्कालवृत्तिध्वंसप्रतियोग्यवृत्तिस्तस्य तद्वृत्तित्वमुत्पत्तिरित्यपि केचित् इति चेत्? नैवमपचीयते किञ्चिदस्माकमित्येकदेशिनो वर्णयन्ति।

(गा०) स्वद्वितीयादिक्षणोत्पन्नानामपि वस्तूनां स्वाधिकरणतृतीयादिक्षणावृत्तिध्वंसप्रतियोगिद्वितीयक्षणादिपर्यन्तकालवृत्तित्वात् क्षणलक्षणेऽसम्भव इति यावत्त्वं कालविशेषणम्। द्वितीयादिक्षण-

Digitized by Arya Samaj Foundation Chennai and eGangotri

पर्यन्तस्थायिकालध्वंसश्च तृतीयक्षणादावेव वर्त्तत इति न स्वाधिकरणयावत्कालवृत्तिध्वंसप्रतियोगीति न दोषः । स्वानधिकरणत्वे सति स्ववृत्तिध्वंसप्रतियोगित्वं स्वपूर्वत्वमिति तु ज्यायः । स्ववृत्तिप्रतियोगिकध्वंसाधारत्वाभावविशिष्टत्वं स्वप्रतियोगिमत्तादात्म्यसम्बन्धावच्छिन्नध्वंसाभावविशिष्टत्वात्मकं प्रलयसाधारणमप्याद्यक्षणावच्छिन्नकर्मादिसाधारणं क्षणत्वमित्यवधेयम् ।

ननु क्रियाचरमध्वंसैतदुभयमात्रस्य कालोपाधित्वे यस्य द्वितीयक्षणे क्रियाध्वंसो न जातस्तस्य द्वितीयक्षणसम्बन्धोऽप्युत्पत्तिः स्यात् द्वितीयक्षणस्यापि तदधिकरणकालध्वंसानधिकरणत्वात अन्त्यक्षणावच्छिन्नवस्तुनः क्षणत्वमते यदुत्तरक्षणे क्रियाध्वंसो न जातस्तदा क्षणव्यवहारानुपपत्तिः एवमाद्यक्षणावच्छिन्नस्य क्षणत्वमते यदा क्रियोत्पत्तिर्न जाता तदाद्यक्षणव्यवहारानुपपत्तिः न हि प्रतिक्षणे क्रियोत्पत्तिः क्रियाविनाश इति नियमः किं तु प्रतिक्षणं कस्यचिदुत्पत्तिः कस्यचिद्विनाश इत्येवेत्यत आह । जन्यमात्रस्येति । केषाञ्चित्क्षणाघटितं चरमध्वंसोत्पत्तिसाधारणमुत्पत्तिलक्षणान्तरमुपन्यस्यति । यो यदिति । स्ववृत्तिध्वंसप्रतियोगिकालावृत्तिनिष्ठं स्ववृत्तित्वमुत्पत्तिरित्युत्पत्तिलक्षणसम्भवेऽपि क्षणव्यवहारानुरोधेनैव प्रागभावाघटितक्षणनिर्वचनमावश्यकमित्यनादरसूचनाय केचिदिति । प्रागभावोऽपि न स्वीकार्य इत्याशयेन सिद्धान्तिमुखेनैव तत्प्रयोजनमन्यथोपपाद्य तमाशयं स्फुटयति । नैवमिति ।

सामान्यप्रत्यासत्तिं प्रमाणपदवीमारोहन्तीमनुयान्तं प्रागभावमालोक्यातिव्याकुलं सिद्धान्तितामुपेक्ष्य प्रागभावमेव साधयितुं तत्र प्रमाणमाशङ्कते । अथेति ।

(दी०) अथ पटस्य स्वानधिकरणेषु तन्तुषूत्पत्तिवारणाय सहस्रादीनां तत्तत्तन्तुत्वेन तत्तत्पटजनकत्वं वाच्यम्, तथा च लाघवादेक एव प्रागभावः कल्प्यते स च स्वाश्रय एव प्रतियोगिजनक इति नातिप्रसङ्गः । इत्थं चानेकत्र प्रागभावसिद्धौ प्रागभावत्वेन प्रतियोगिजनकत्वाद्बितन्तुकेऽपि तत्सिद्धिरिति चेत् ?

(गा०) पटस्य । सहस्रादितन्त्वारभ्यस्य । स्वानधिकरणेषु ।

Digitized by Arya Samaj Foundation Chennai and eGangotri

तदानीं मिथः संयुक्तेषु । उत्पादवारणायेति । तत्तन्तुत्वेन तत्पटत्वावच्छिन्नं प्रत्यहेतुत्वे प्रागभावासत्त्वे सामान्यसामग्रीशालिनि तन्त्वन्तरे तद्व्यक्त्यनुत्पादप्रयोजकस्य दुर्वचत्वात् कार्यानुत्पत्तौ कारणतावच्छेदकावच्छिन्नाभावस्यैव प्रयोजकत्वादिति भावः । तत्पटजनकत्वम् । तादात्म्यसम्बन्धेन तत्पटत्वावच्छिन्नजनकत्वं

न च तत्पटत्वावच्छिन्नस्य तत्तत्तन्तुत्वावच्छिन्नव्यभिचारिणः तज्जन्यतेति वाच्यम् । तत्तन्तुसमवेतत्वविशिष्टस्य तत्तन्तुत्वव्यभिचारितया तादृशविशेषणावच्छिन्नस्य तज्जन्यत्वे बाधकाभावात् । तत्तन्तुत्वविशिष्टसमवायः कार्यतावच्छेदकसम्बन्धः तेन च सम्बन्धेन तत्पटस्य तत्तन्तुत्वव्यभिचारितैवेत्यप्याहुः ।

तच्च विशेषरूपेण समवायादेः सम्बन्धतायाः प्रामाणिकत्व एवोपपद्यते । न च तत्तन्तुत्वेन तत्पटहेतुत्वे स्वाधिकरणतन्त्वन्तर एव तत्पटानुत्पादापत्तिः, तत्प्रयोजककारणतावच्छेदकावच्छिन्नाभावसत्त्वात् न हि यावत्कारणतावच्छेदकावच्छिन्नाभावसत्त्वमेव कार्यानुत्पत्तिप्रयोजकं दण्डादिमति चक्रादिविरहिणि घटाद्यनुत्पादानुपपत्तेः किंतु किञ्चित्कारणतावच्छेदकावच्छिन्नाभाव एवेति वाच्यम् । यतस्तत्सम्बन्धेन तद्धर्मावच्छिन्नानुत्पादे तत्सम्बन्धेन तद्धर्मावच्छिन्ननिरूपितकिञ्चित्कारणतावच्छेदकावच्छिन्नाभाव एव प्रयोजकः स्वाधिकरणतन्त्वन्तरे तत्तत्तन्तुसमवेतत्वविशिष्टतत्पटत्वावच्छिन्नस्य तत्तन्तुवृत्तित्वविशिष्टसमवायेन तत्पटत्वावच्छिन्नस्य वा ऽनुत्पाद इष्ट एव । एवं सामान्यधर्मावच्छिन्नकार्यव्यतिरेके सामान्यसम्बन्धावच्छिन्नतद्व्यतिरेके च विशेषधर्मावच्छिन्नकार्यतानिरूपितकारणतावच्छेदकसकलधर्मावच्छिन्नतत्तन्तुवृत्तिव्यतिरेकानिकरो विशेषसम्बन्धावच्छिन्नकार्यतानिरूपितकारणतावच्छेदकसकलधर्मावच्छिन्नव्यतिरेकानिकरश्च प्रयोजकः स्वाधिकरणतन्त्वन्तरे चैतत्तन्तुभेदसत्त्वेऽपि तत्तन्तुसमवेतत्वविशिष्टपटत्वावच्छिन्नजनकतावच्छेदकावच्छिन्नस्य तत्तन्तुवृत्तिसमवायसम्बन्धावच्छिन्नजन्यतानिरूपितजनकतावच्छेदकावच्छिन्नस्य वा व्यतिरेकासत्त्वान्न तत्र सामान्यतः समवायेन तत्पटत्वावच्छिन्नानुत्पादः विशिष्टतत्पटत्वतत्पटत्वयोरभेदेऽपि कथञ्चित्सामान्यविशेषभावः समर्थनीयः ।

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथ तद्धर्मावच्छिन्नोत्पत्तौ तद्धर्मावच्छिन्नसामग्री तद्व्यतिरेके च तद्धर्मावच्छिन्नसामग्रीव्यतिरेकः प्रयोजकः यत्किञ्चित्कारणतावच्छेदकावच्छिन्नाभावस्य च सामग्रीविरहनिर्वाहकत्वेनैव कार्यानुत्पादप्रयोजकत्वं तद्धर्मावच्छिन्नसामग्री च तद्धर्माश्रययत्किञ्चिद्व्यक्तिनिरूपितकारणतावच्छेदकसकलधर्मावच्छिन्नसमुदायः तत्समुदायविरहश्च प्रकृते केवलान्वयीति स्फुटतरोऽनिर्वाहः यत्किञ्चिदेकधर्मावच्छिन्ननिरूपितकारणतावच्छेदकसकलधर्मावच्छिन्नसमुदायश्च न सामग्री सामान्यविशेषसामग्र्योः परस्परापेक्षानुपपत्तेरिति चेत् ? तत्तन्तुवृत्तित्वविशिष्टसमवायस्य तत्तन्तुजन्यतावच्छेदकसम्बन्धत्वमते समवायस्यानुयोगिभेदेन भेदोपगमे च न काप्यनुपपत्तिः । तद्धर्मवद्यत्किञ्चिदेकव्यक्तिनिष्ठयत्किञ्चिदेकतादृशसम्बन्धावच्छिन्नकार्यतानिरूपितकारणतावच्छेदकावच्छिन्नस्तोमस्यैव तादृशतद्रूपावच्छिन्नसम्बन्धेन तद्धर्मावच्छिन्नोत्पादकसामग्रीत्वात् तादृश्याः समवायेन तत्पटत्वावच्छिन्नोत्पादप्रयोजकसामग्र्याः प्रत्येकं तत्समवायिसकलतन्तुष्वेव सत्त्वात् समवायेन तदनुत्पत्तौ प्रयोजकस्य तादृशसामग्रीविरहकूटस्यान्यत्रैव सत्त्वात् । विशिष्टतत्पटत्वस्य तत्तन्तुजन्यतावच्छेदकत्वमते च समवायस्यानुयोगिभेदेन भेदेऽपि समवायत्वेनैकतन्तुनिष्ठसमवायस्याप्यपरतन्तुनिरूपितकार्यतावच्छेदकसम्बन्धत्वादेकसमवायसम्बन्धावच्छिन्नकार्यतानिरूपितकारणतावच्छेदकयावद्धर्मेषु तत्पटारम्भकसकलतन्तुनिष्ठतत्तद्व्यक्तित्वानां चान्तर्भावात् तदवच्छिन्नसमुदायव्यतिरेकः सर्वत्रैवेति दर्शितदोषस्य दुर्वारतया तद्धर्मवद्यत्किञ्चिदेकव्यक्तिनिरूपिततत्सम्बन्धावच्छिन्नयत्किञ्चिदेकाधिकरणताघटिता यावत्यः कारणतास्तत्र तदवच्छेदकावच्छिन्नसमुदायस्यैव तेन सम्बन्धेन तद्धर्मावच्छिन्नोत्पादकसामग्रीत्वमुपेयं तत्तत्तन्तुत्वावच्छिन्नजनकताघटकोत्पत्तिशरीरे तत्तद्व्यक्तिसमवेतत्वविशिष्टनिरूपिता कार्याधिकरणतैव निवेश्यते अन्यथा व्यभिचारेण तादृशव्यापकत्वानिर्वाहात् समवायिभेदभिन्नानां तादृशाधिकरणतानां च एकैकाधिकरणतामुपादाय निरुक्तसामग्रीसमवधानं तत्पटारम्भकतत्तत्तन्तुषु सुघटमेव । विजातीयसंयोगादिरूपसामान्यकारणनिरूपितकार्यताशरीरेऽपि जन्यद्रव्यत्वादिरूपसामान्यधर्मावच्छिन्नाधिकरणता-

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्वेन दर्शितविशिष्टाधिकरणतानामस्त्येव निवेशः । विशेषधर्माव-च्छिन्नाधिकरणताभ्यः सामान्यधर्मावच्छिन्नाधिकरणताया अतिरिक्ताया अनभ्युपगमात् क्लृप्ताधिकरणताकूट एव सामान्यधर्मावच्छिन्ननिरूपितत्वोपगमादिति तत्तत्तन्तुरूपविशेषसामग्र्या पटजनने उक्तसामान्यसामग्र्यपेक्षा तत्तत्कारणताया अपि तत्तन्तुसमवेतत्वविशिष्टाधिकरणताघटितयावत्कारणतान्तर्गतत्वादित्यलं विस्तरेण ।

यत्किञ्चिदधिकरणतामन्तर्भाव्य दर्शितरीत्या सामग्रीनिर्वचने च शुद्धं तत्पटत्वमेव कार्यतावच्छेदकं शुद्ध एव समवायः कार्यतावच्छेदकसम्बन्धः ।

न चोक्तव्यभिचारान्न तत्सम्बन्धेन तद्रूपेण कार्यत्वनिर्वाह इति वाच्यम् । यत्र कार्यतावच्छेदकं तत्र स्वावच्छिन्नाव्यवहितपूर्ववर्त्तिनः कारणतावच्छेदकावच्छिन्नस्य सामानाधिकरण्यमिति नियमस्यैव कार्यकारणभावघटकतोपगमेन तादृशनियममखण्डयत उक्तव्यभिचारस्याकिञ्चित्करत्वादित्यप्याहुः । लाघवात्सहस्रादिकारणत्वकल्पनमपेक्ष्य तत्पटकारणत्वेन एकतत्प्रागभावकल्पने लाघवात् । कल्प्यत इति । कारणत्वेनेत्यादिः । तथापि कुतो नातिप्रसङ्ग इत्यत आह । स चेति । स्वाश्रय एव प्रतियोगिजनक इति । सामानाधिकरण्यप्रत्यासत्त्यैव तस्य प्रतियोगिहेतुत्वादिति भावः ।

ननूक्तयुक्त्या द्वितन्तुकपटादेः प्रागभावो न सिद्ध्यति अत्रातिरिक्तैकप्रागभावस्य तत्रानन्यथासिद्धत्वनियतपूर्ववर्त्तित्वयोश्च कल्पनामपेक्ष्य क्लृप्तस्य क्लृप्तनियतपूर्ववर्त्तित्वकस्य तन्तुद्वयादेरनन्यथासिद्धत्वमात्रकल्पने लाघवात् तत्र एकस्याः संयोगव्यक्तेरेव वा देशनियमाय हेतुताकल्पनादित्यत आह । इत्थं चेति । प्रतियोगिजनकत्वात् । जन्यत्वावच्छिन्नप्रतियोगिजनकत्वात् । येषां विशेषरूपेण कार्यकारणभावस्तेषां सामान्यरूपेणापीति नियमानुरोधादिति भावः।

न चोक्तयुक्त्या सिद्धस्य पदार्थस्य विनाशित्वे सप्रतियोगिकत्वे च मानभाव इति वाच्यम् । तत्तत्पटादिनाशानन्तरं तदाश्रयतत्तत्तन्तुषु पटान्तरोत्पत्तिसमये पूर्वपटव्यक्तेरापत्तिवारणानुरोधेन तस्य विनाशिताया आवश्यकत्वात् अन्यथा तादृशकारणस्य सामान्यसामग्रीसहितस्य सत्त्वेन तदापत्तेः तत्पटादिव्यक्तिध्वंसस्य

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रतिबन्धकतामन्तरेण दुर्वारत्वात्, एवं च सप्रतियोगिकत्वमप्यावश्यकं अन्यथा अनुगतप्रागभावनाशकस्य दुर्वचत्वात् सप्रतियोगिकत्वे च स्ववृत्तिप्रतियोगिकत्वसम्बन्धेन कालत्वेनैव सामान्यतः प्रागभावनाशकतासम्भवात् ।

न चैवं प्रतियोगिपूर्वमेव कथं प्रागभावो न नश्येत् प्रतियोग्यधिकरणस्थूलकालस्य सर्वदैव सम्भवादिति वाच्यम् । स्वप्रतियोग्यधिकरणत्वस्ववृत्तिप्रतियोगिकध्वंसवत्त्वोभयसम्बन्धेन ध्वंसवदन्यत्वस्य कालविशेषणत्वोपगमात् द्विक्षणमात्रावस्थायिन एव कालस्य तथात्वात् क्षणत्रयावस्थायिनस्तादृशोभयसम्बन्धेन द्वितीयादिक्षणोत्पन्नध्वंसवत्त्वात् ।

प्रागभावहेतुत्वेऽपि तावत्तन्तूनां कारणत्वमावश्यकं अन्यथाऽतिप्रसङ्गादिति प्रागभावकल्पनमनर्थकमित्याह । त्रिचतुरेष्वेवेति ।

(दी०) त्रिचतुरेष्वेव तन्तुषूत्पन्नेषु संयुक्तेषु च तत्पटोत्पत्तिप्रसङ्गः । तावत्तन्तुवृत्तेः पटस्य कतिपयविरहे कथमुत्पत्तिरिति चेन्न । कार्यानुत्पादस्य विनाकारणविरहमनभ्युपगमात्, सामग्रीसत्त्वेऽग्रिमक्षणे कार्यसत्त्वस्यावश्यकत्वाच्च ।

(गा०) असमवायिकारणसमवधानाय संयुक्तेष्वेति ।

न च चरमतन्तुकारणतयैवायमतिप्रसङ्गो वार्यतां किं सकलतन्तुहेतुतया ? एकप्रागभावहेतुतयैव च देशनियम उपपद्यतामिति वाच्यम् । प्रथमोत्पन्नतन्तुद्वयसंयोगोत्तरं यत्रापरसकलतन्तूनां चरमात्मकतत्संयोगानां वा एकदा उत्पादस्तत्र विनिगमनाविरहेण तावतां तन्तूनां तत्संयोगानां वा कारणताया आवश्यकत्वात् प्रागभावादिकल्पनामपेक्ष्य प्राथमिकस्य तन्तुद्वयस्य तत्संयोगस्य वा देशनियमाय हेतुताया एवोचितत्वात् ।

यद्यप्येवमपि यत्र क्रमेणैव सहस्रादितन्तूनां तत्संयोगानां वोत्पत्तिस्तत्र चरमव्यक्तिहेतुतया पूर्वं पटोत्पादवारणसम्भवे सर्वव्यक्तीनां हेतुत्वमनावश्यकमिति प्रागभावस्यैकहेतुताकल्पनमेव दैशिकातिप्रसङ्गवारणायोचितम् । एवं यत्र युगपदेव सकलतन्तूनां संयोगानां वोत्पत्त्या पटोत्पादस्तत्रापि तावतां तन्तूनां संयोगानां

Digitized by Arya Samaj Foundation Chennai and eGangotri

वा विशिष्य कारणत्वं नावश्यकमिति तत्रापि प्रागभावकारणत्वं निष्प्रत्यूहम् । तथापि तत्र तावद्वृत्तिसंख्याविशेषहेतुतयैवातिप्रसङ्गवारणं सम्भवतीति किं प्रागभावेनेति पश्चाद्व्यक्तीभविष्यति ।

अथ यत्र क्रमेण तन्तूनां संयोगोत्पत्त्या सहस्रादितन्तुकपटोत्पत्तिस्तत्र कतिपयसंयोगानन्तरमेव तत्पटोत्पत्तिवारणाय तत्पटं प्रति तावतां संयोगानां हेतुत्वेऽपि तदानीं पटसामान्योत्पत्तिर्दुर्वारैव सामान्यसामग्र्या अक्षतत्वात् ।

न च तदानीं द्वितन्तुकादिपटोत्पाद इष्ट एवेति वाच्यम् । तथा सति द्रव्यवति द्रव्यान्तरानुत्पत्त्या सहस्रतन्तुकपटोत्पादानुपपत्तेः सहस्रतन्तुकपटपूर्वं द्वितन्तुकादिपटनाशकसामग्रीसमवधानानियमात् ।

न च तत्तत्पटव्यक्त्यतिरिक्तपटसामान्यासिद्धेस्तत्र च प्रसिद्धपटव्यक्तीनां सामग्रीविरहेण न पटसामान्यापत्तिस्सहस्रतन्तुकपटनाशे सत्युत्पत्स्यमानद्वितन्तुकादिखण्डपटस्य समवायिकारणासमवायिकारणयोः सत्त्वेऽपि सहस्रतन्तुकपटनाशरूपतन्निमित्तकारणासत्त्वेन तत्सामग्र्या महापटपूर्वमसत्त्वात् महापटनाशस्य प्रतिबन्धकसंसर्गाभावमुद्रया सामान्यहेतुतावत् खण्डपटादिव्यक्तिं प्रति विशिष्य तत्पटनाशत्वेनापि हेतुताया अपि पूर्वं तदापत्तिवारणानुरोधेन कल्पनीयत्वादिति वाच्यम् । तत्तद्व्यक्तिसामग्रीबाधेन सामान्यकार्यवारणसम्भवेन सामान्यकार्यकारणतोच्छेदापत्तेरिति चेत् ? यत्र सामान्यकार्यकारणभावकल्पनया अतिप्रसङ्गवारणसम्भवस्तत्र तत्तद्व्यक्तिसामग्रीविरहकूटस्य सामान्यकार्यानुत्पादप्रयोजकता नोपेयते गत्यन्तरविरहे च तादृशविशेषसामग्रीविरहकूटस्यापि तथात्वकल्पनं निराबाधमेव । अत एव स्मृताबुद्बोधकविशेषाणामनुगमासम्भवेन तत्तद्व्यक्तित्वेनैव हेतुत्वेऽपि तदभावात् स्मृतिसामान्यानुत्पादः । एवं चागत्योक्तस्थले तत्तत्पटसामग्रीविरहकूटस्यैव सामान्यकार्यानुत्पादप्रयोजकत्वमुपगन्तव्यमिति नातिप्रसङ्गः ।

अस्तु वा तत्तन्महापटसामग्रीपूर्वकालावच्छिन्नतत्तत्पटारम्भकसंयोगरूपप्रतिबन्धकाभाव एव पटसामान्यसामग्री पूर्वत्वं च प्रागभावाघटितमेव निरुक्तरूपं ग्राह्यमिति दिक् ।

तावत्तन्तुवृत्तेः पटस्य तावत्तन्तुविरहदशायामुत्पत्तौ तस्य तावत्त-

Digitized by Arya Samaj Foundation Chennai and eGangotri

न्तुवृत्तित्वानुपपत्तिरित्यत एव न तदापत्तिरिति शङ्कते । तावदिति । आपत्तौ बाधोऽनुगुण एवेत्याशयेनाह । कार्यानुत्पादस्येति । कारणविरहम् । कारणतावच्छेदकावच्छिन्नाभावम् । अनभ्युपगमादिति । तदभ्युपगमे कार्यानुत्पादे कारणतावच्छेदकावच्छिन्नाभावाधीनत्वनियमभङ्गापत्तिरिति भावः । उक्तापत्तिमूलीभूतव्याप्तिमाह । सामग्रीति ।

आपत्तिवारणं पुनः शङ्कते । तत्पटेति ।

(दी०) तत्पटप्रागभावाश्रययावत्तन्तुत्वेन तत्पटजनकत्वमिति चेत् ? अवच्छेदककोटौ प्रागभावस्य प्रवेशाप्रवेशयोः कारणत्वे प्रमाणाभावः । परस्परासंयुक्तेषु कतिपयतन्तुषु तत्पटो जायेत । न च तत्पटप्रागभावव्याप्ययावत्संयोगानामपि जनकत्वं कतिपयतन्तुसंयोगेष्वतीतेषु अनागतेषु वा तत्पटानुत्पत्तिप्रसङ्गात् । तत्पटप्रागभावमपेक्ष्य स एव पटो लघीयान्, यावत्त्वानिरुक्तेश्च । एतेन त्रित्वाद्युत्पत्तिर्व्याख्यातेति ।

(गा०) तावत्तन्तूनामनेन रूपेण हेतुत्वे तावतैव दैशिकातिप्रसङ्गवारणसम्भवेन प्रागभावहेतुताया अप्रामाणिकत्वेऽपि तादृशकारणतावच्छेदकतयैव प्रागभावः सेत्स्यतीत्यभिमानः । अवच्छेदकतया सिद्धस्य प्रतियोग्यजनकत्वे प्रतियोगिजनकाभावलक्षणः प्रागभावोऽसिद्ध एवेत्याशयेनाह । प्रवेशाप्रवेशयोरिति । यावत्त्वविशेषस्य ताद्रूप्येणावच्छेदकत्वे प्रागभावाप्रवेशोऽपि सम्भवतीत्याशयेन प्रागभावप्रवेशेऽनास्था सूचिता । उक्तहेतुतयापि न कालिकातिप्रसङ्गवारणं सम्भवतीत्याह । परस्परेति । तावत्तन्तुषु । उत्पन्नेष्वपीत्यादिः । तत्पटो जायेतेति । उक्तयावत्तन्तुरूपकारणसत्त्वादिति भावः ।

न चेति । विनष्टानामनागतानां च तन्त्वन्तरसंयोगानामुदासीनतन्तुसंयोगानां च तत्पटपूर्वमसत्त्वेन तत्साधारणयावत्त्वस्य कारणतावच्छेदकता न सम्भवतीति व्याख्यान्तम् । व्याप्यत्वनिवेशेऽपि तत्पटारम्भकतन्तुमात्रसमवेतानामपि तत्पटानारम्भकसंयोगानां

Digitized by Arya Samaj Foundation Chennai and eGangotri

तत्पटपूर्वसत्त्वानियमेन उक्तरूपेण हेतुत्वासम्भव इत्याशयेनाह । कतिपयेति । तत्पटसमानकालवृत्तित्वे सति तत्पटप्रागभावकालीनत्वस्यापि संयोगविशेषणत्वे नोक्तदोषावसर इत्यत्राह । तत्पटेति । स एव पट इति । तथा चोक्तविशेषणसहितं तत्पटव्याप्यत्वमेव निवेश्यतां किं तत्पटप्रागभावव्याप्यत्वनिवेशनेन ।

ननु तत्पटव्याप्यत्वेन संयोगनिवेशेऽन्यत्र तत्पटोत्पत्तावन्यतन्तुसंयोगानामपि तत्पटव्याप्यत्वसम्भवेन तन्त्वन्तरमन्तर्भाव्य तत्पटोत्पत्त्यापत्तेर्दुर्वारत्वमिति चेत् ? प्रागभावव्याप्यत्वेन संयोगनिवेशेऽपि स्वारम्भककतिपयसंयोगपूर्वं तत्पटोत्पत्तौ तत्संयोगानां तत्पटप्रागभावकालीनत्वविशेषणाक्रान्तत्वानुपपत्तेः । पूर्वं निरुक्तकारणासत्त्वं कार्यानुत्पादाधीनमेवेति पूर्वं तत्पटोत्पादोऽपि दुर्वार एवेति भावः ।

ननु तावत्तन्तूनां तावत्संयोगानां वा यावत्त्वेन कारणत्वं न दैशिकातिप्रसङ्गवारकं यावत्त्वावच्छिन्नस्य एकदेशे क्वचिदप्यप्रत्यासन्नतया कालिकातिप्रसङ्गवारणाय यावत्त्वावच्छिन्नस्य हेतुत्वोपगमात् दैशिकातिप्रसङ्गभङ्गाय च प्रागभावहेतुत्वमावश्यकमित्यत आह । यावत्त्वेति ।

न चापेक्षाबुद्धिविशेषविषयतापर्याप्त्याश्रयत्वम् । तद्विशेषपदार्थस्य दुर्निरूपत्वात् । तत्पटप्रागभावव्याप्यनिरुक्तसंयोगत्वव्यापकविषयताकत्वं विशेषपदार्थ इति चेत् ? तथाविधयत्किञ्चित्संयोगविषयकबुद्धिविषयताया अपि बुद्धिविषयतात्वादिना तथाविधसंयोगत्वं व्यापकत्वाद्यत्किञ्चित्संयोगानन्तरं तत्पटोत्पत्त्यापत्तेर्दुर्वारत्वात् तादृशयावत्संयोगविषयकबुद्धिविशेषं तद्व्यक्तित्वेनोपादाय तद्विषयतात्वेन तद्व्यापकत्वनिवेशे तद्विषयतापर्याप्त्याश्रयत्वमेव यावत्त्वं किमिति न रोचयेः ? न वा तदपि साधीयः, तावत्तन्तुसंयोगविषयकबुद्धीनां पुरुषादिभेदेन भिन्नानां सर्वासामेव तत्तद्व्यक्तित्वेन विनिगमनाभावान्निवेशनीयतया तदपेक्षया यावत्तन्तुसंयोगानां तत्तद्व्यक्तित्वेन हेतुताया एव देशकालनियमाय कल्पयितुं युक्तत्वात् ।

द्वित्वादेर्देशनियमाय प्रागभावसिद्धिरित्यपि दूषयति । एतेनेति कस्यचित्समवायिकारणस्यासमवायिकारणस्य वा अनुत्पाद-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दशायामेव द्वित्वाद्युत्पत्तिवारणाय यावतां समवायिनां तदेकत्वानां वा कारणताया आवश्यकत्वे तत एव तदुत्पत्तिदेशनियम इति भावः ।

प्रागभावस्य प्रत्यक्षत्वाभिमानेन तत्कारणत्वं क्वचिदुत्पन्नस्य पुनरुत्पादप्रसङ्गवारकतया व्यवस्थापयतां मतमाह । परे पुनरिति ।

(दी०) परे पुनरिहेदानीं घटध्वंस इतिवदिहेदानीं घटप्रागभाव इति साधारणमेव लोकानां प्रत्यक्षं कल्पयन्तस्तद्बलात् प्रागभावं सामान्यलक्षणां च व्यवस्थापयन्तो वर्णयन्ति ।

अव्याप्यवृत्तेः कार्यस्य द्वितीयक्षणे धारावाहिकस्थले च प्राथमिकनिर्विकल्पकस्य चतुर्थक्षणे उत्पत्तिवारणाय एकावच्छेदादिना कार्याभावस्य च कारणत्वं वाच्यं तथा च लाघवात् प्रागभावस्य तत्त्वं कल्प्यते स्वभावाधीनत्वाच्च तत्पादेशिकत्वात्मदेशनियमः संयोगादीनामिति ।

(गा०) तद्बलात् । तादृशप्रत्यक्षबलात् । सामान्यलक्षणां चेति । तां विना प्रतियोगिभासकाभावेन तादृशप्रत्यक्षानुपपत्तेरिति भावः । प्रागभावस्य वर्णनीयार्थमाह । अव्याप्येति । कार्यस्य संयोगादेर्द्वितीयक्षणे उत्पत्तिवारणायेत्यग्रिमेणान्वयः । उत्पन्नेऽपि तस्मिँस्तदत्यन्ताभावस्यान्यावच्छेदेन सत्त्वात्कार्यात्यन्ताभावहेतुतया पुनस्तदुत्पादवारणासम्भवादिति भावः । सयोगं प्रति क्रियाया विभागं प्रति च संयोगस्य कार्यसहभावेन हेतुत्वेन कर्मजसंयोगस्य संयोगजविभागस्य च स्वजनकक्रियासंयोगनाशोत्पत्त्यधिकरणद्वितीयक्षणे आपत्तिवारणसम्भवेऽपि संयोगजसंयोगस्य द्वितीयक्षणादावुत्पादप्रसङ्गो दुर्वारः ।

यदि सामग्र्यनन्तरक्षणे कार्यमित्येव नियमः न तु कार्योत्पत्त्यधिकरणत्वमित्यपि सामग्रीबलादाद्यक्षणे कार्याधिकरणत्वनिर्वाहेणैवानुगतकार्योत्पत्तिनिर्वाहात् । एवं च द्वितीयक्षणे कार्यवत्त्वमिष्टमेव कार्योत्पत्तावापादकविरह इत्युच्यते तदापि न निर्वाह इति दर्शयति । धारेति । अन्तरा निर्विकल्पकोत्पादकचक्षुःसंयोगादिव्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्तिविगमे तत्पूर्वं चक्षुःसंयोगादिव्यक्त्यन्तरात्तन्निर्विकल्पकापत्तिवारणाय कल्पनीयहेतुताकतच्चक्षुःसंयोगादिव्यक्तिविरहादेव न चतुर्थक्षणे तदुत्पादसम्भव इति प्राथमिकचक्षुःसंयोगादिव्यक्तीनां तावत्पर्यन्तस्थायितालाभाय धारावहनानुसरणं तत्तद्विशेषणज्ञानव्यक्तिविनाशेन तत्तद्विशिष्टबुद्धिव्यक्तीनां चतुर्थक्षणे नापत्तिसम्भव इत्यतो निर्विकल्पकानुसरणम् । कार्यस्य प्रतिबन्धकतया तृतीयक्षणे उत्पादवारणसम्भवात् चतुर्थक्षणानुसरणम् ।

प्रथमातिप्रसङ्गवारकमाह । एकावच्छेदादिनेति । तृतीयार्थो वैशिष्ट्यं तथा च तत्तत्कार्यावच्छेदकावच्छिन्नत्वादिविशिष्टतत्तत्कार्याभावस्येत्यर्थः । आदिपदात्सम्बन्धविशेषावच्छिन्नत्वपरिग्रहः । उत्पन्नस्य संयोगादेरन्यावच्छेदेनाभावसत्त्वेऽपि तदवच्छेदकावच्छिन्नत्वविशिष्टतदभावासत्त्वादतिप्रसङ्गवारणासम्भवो बोध्यः । द्वितीयातिप्रसङ्गवारकमाह । उत्तरज्ञानाभावस्येति । अत्र तज्ज्ञानध्वंसाभाव एव तात्पर्यं तत्र चैकज्ञाननाशेऽपि पञ्चमादिक्षणे प्राथमिकनिर्विकल्पकाद्यापत्तिवारणाय उत्तरज्ञानस्य तज्ज्ञानध्वंसविशिष्टज्ञानत्वेनैव प्रतिबन्धकतायाः वक्तव्यत्वात् तदपेक्षया तज्ज्ञानध्वंसाभावस्य लघुत्वात् । चकारेण विशिष्टस्य कार्याभावस्यापि निर्विकल्पकरूपव्याप्यवृत्तिकार्यहेतुतासमुच्चयः । तेन सामग्र्यानन्तर्यस्य कार्याधिकरणत्वमात्रनियतत्वेऽपि न तृतीयक्षणे तदापत्तिः ।

लाघवादिति । कारणतावच्छेदकस्य तत्प्रागभावत्वस्य एकावच्छेदकावच्छिन्नत्वविशिष्टतदत्यन्ताभावत्वापेक्षया शरीरलाघवात् कारणताद्वयकल्पनापेक्षया एककारणताकल्पने च लाघवादित्यर्थः । प्रागभावस्य प्रमाणान्तरासिद्धत्वे च प्रागभावरूपातिरिक्तधर्मिणस्तत्रानन्यथासिद्धत्वनियतपूर्ववृत्तित्वयोश्च कल्पनामपेक्ष्य संयोगादौ गुरोरपि नियतपूर्ववर्त्तित्वेन क्लृप्तस्य तदीयावच्छेदकावच्छिन्नत्वादिविशिष्टतदभावस्यानन्यथासिद्धत्वमात्रकल्पने निर्विकल्पकस्थले नियतपूर्ववर्त्तितया क्लृप्तयोस्तादृशकार्याभावोत्तरज्ञानाभावयोरनन्यथासिद्धत्वमात्रकल्पने च लाघवमिति प्रत्यक्षतः प्रागभावसिद्धिः प्रागभिहिता ।

ननु संयोगादेरवच्छेदकतानियमाय तत्तदवच्छेदकावच्छिन्नसंयोगं प्रति तत्तदवच्छेदकावच्छिन्नत्वविशिष्टतदभावस्य हेतुत्वमा-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वश्यकमित्यत आह । स्वभावाधीनत्वाच्चेति । इतरानधीनत्वरूपं स्वभावाधीनत्वं प्रागभावप्रादेशिकत्वविशेषणं प्रागभावस्य देशविशेषावच्छिन्नत्व एव किं नियामकमित्यनुयोगसमाधानाय प्रदर्शितम्। अजन्यस्याधिकरणत्वमिवावच्छेदकत्वमपीतरानधीनमित्यभिप्रायः। प्रदेशनियमः । अवच्छेदकतानियमः । एकैकसंयोगावच्छेदकनानाप्रदेशान्निवेश्य उक्तरूपेणात्यन्ताभावहेतुतामपेक्ष्य समानावच्छेदकत्वसामानाधिकरण्यप्रत्यासत्त्या प्रागभावस्य हेतुत्वमेवोचितमिति तदवच्छेदकत्वमेव प्रतियोग्यवच्छेदकत्वनियामकमिति समुदायार्थः।

न च कारणप्रादेशिकत्वस्य कार्यप्रादेशिकत्वानियामकत्वेऽसमवायिकारणकपालद्वयसंयोगस्य प्रादेशिकत्वाद् घटस्य प्रादेशिकत्वप्रसङ्ग इति वाच्यम् । यादृशकारणतावच्छेदकताप्रत्यासत्तिघटिता तत्कारणप्रादेशिकत्वस्यैव कार्यप्रादेशिकत्वनियामकत्वात् कपालद्वयसंयोगस्य समवायमात्रघटितेति न दोषः । अत्र अत्यन्ताभावप्रत्यय इव विलक्षणप्रागभावप्रत्यय एव सिद्ध इत्यस्वरसबीजम् । एवं निर्विकल्पकं प्रति तत्तद्व्यक्तिप्रागभावत्वेन नानाकारणताकल्पनमपेक्ष्य तत्र विशेषणज्ञानत्वेनैकप्रतिबन्धकत्वकल्पनमेवोचितं प्रतिबध्यतावच्छेदकं च निष्प्रकारकज्ञानत्वं संसर्गानवच्छिन्नविषयताशालिज्ञानत्वं वेत्यन्यदेतत् ।

न च संयोगादीनामवच्छेदकत्वनियमाय प्रागभावस्य समानावच्छेदकत्वप्रत्यासत्त्या हेतुत्वमेवोचितमिति प्रागभावसिद्धिः,एकैकसंयोगस्यैवानेकावयवावच्छिन्नतया एकैकव्यक्तिं प्रति अनेकेषामवच्छेदकानां तत्तद्व्यक्तित्वेन हेतुत्वे महागौरवादिति वाच्यम् । तावदवच्छेदकवृत्तिसंख्याविशेषहेतुतयैवावच्छेदकनियमोपपत्तेरित्यादिकमपि बोध्यम् ।

आश्रयाणां क्रमोत्पादस्थले कतिपयतन्तूत्पन्नेष्वेव पटादेर्वारणाय तावत्तन्त्वादिव्यक्तीनां तत्संयोगादिव्यक्तीनां वा विशिष्य कारणत्वकल्पनमावश्यकमित्युक्त्वा पटाद्युत्पादनियामकतया प्रागभावसिद्धिः पूर्वं निराकृता तावता युगपदुत्पन्ननानाश्रयसमवेतकार्योत्पादानियामकतया प्रागभावसिद्धिर्न निराकर्त्तुं शक्यते इत्याशयेन प्रागभावं व्यवस्थापयतां मतमुपन्यस्यति । अन्ये त्विति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(दी०) अन्ये तु सर्वत्र तत्तत्संख्याविशेषाणां विशिष्य हेतुत्वोपगमेनैव तत्तद्द्रव्योत्पादानियमसम्भवेऽपि युगपदुत्पन्नेषु नित्येषु च नित्याद्युत्पत्तिनियामकत्वेन प्रागभावः कल्प्यते इत्याहुः।

(गा०) तत्र पटादिस्थलमुपेक्ष्य संख्यास्थलपर्यन्तानुधावनबीजं प्रथमतो दर्शयति। सर्वत्रेति। सर्वत्र। युगपदुत्पन्नाश्रयकद्रव्यस्थले। संख्याविशेषाणाम्। स्वसमनियतसहस्रत्वादिसंख्यानाम। हेतुत्वोपगमेनेति। कारणत्वस्य समवायिकारणतावच्छेदकत्वस्य वा उपगमेनेत्यर्थः।

एतेन समनियतसंख्याव्यक्तीनां कारणत्वं कल्प्यते इत्यत्र विनिगमनाविरहात् प्रागभावासिद्धिः गगनादौ असमवायिविलक्षणसंयोगाविरहेण द्रव्यारम्भकतावच्छेदकस्पर्शवत्त्वादिविरहेण च द्रव्योत्पादापत्तिविरहेण तत्साधारणसंख्याहेतुतयापि घटादेर्देशानियम उपपद्यते इति निरस्तम्। कारणतावच्छेदकत्वकल्पे व्यापकसंख्याया अन्यथासिद्धिनिरूपकत्वेन विनिगमनाविरहानवकाशात्।

(१) (क्रमिकनानावस्तुसमवेतकार्यसमवायिनामसमवायिनां वा तत्तद्व्यक्तित्वेन हेतुतायाः प्राग्व्यवस्थापिततया देशानियामकत्वेऽपि अतथाभूतवस्तुसमवेतकार्योत्पत्तेर्देशानियामकतया प्रागभावसिद्धिर्निष्प्रत्यूहैवेत्यन्येषां मतमुपन्यस्यति। अन्येति। क्रमोत्पन्नद्रव्यस्थले नैतद्युक्त्यवकाश इति विशेषं प्रथमतो दर्शयति। सर्वत्रेति। तत्तत्संख्याविशेषाणामिति। तत्तत्पटारम्भकयावत्तन्तुसमवेतसहस्रादिसंख्यानामित्यर्थः)।

न चानेकाश्रितसंख्याया अपेक्षाबुद्ध्यधीनतया यत्र द्रव्योत्पादपूर्वं तदवयवेषु संख्या न जाता तत्र का गतिरिति वाच्यम्। न्यायमते ईश्वरापेक्षाबुद्धिजन्यसंख्यायाः सर्वत्र सम्भवात्। मीमांसकमते चापेक्षाबुद्धेः संख्याव्यञ्जकतया तामनपेक्ष्यैव संख्योत्पत्तेर्द्रव्योत्पत्तिपूर्वं तदाश्रयसंख्याविशेषविरहस्य दुर्घटत्वात्। न चारम्भस्वरूपयोग्यगगनादिसाधारणव्यापकसंख्यानामपि हेतुत्वं विनिगमनाविरहेणापद्येतेति प्रागभावकल्पनमेवोचितमिति वाच्यम्। संख्याविशेषाणां

(१) ( ) एतदन्तर्गतः पाठः पुस्तकान्तरे नास्ति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समवायिकारणतावच्छेदकतायाः एवोपगमात् गगनादिसाधारणसंख्यानां व्यापकधर्मत्वेनान्यथासिद्धिनिरूपकतया विनिगमनाविरहानवकाशात् ।

न च व्यासज्यवृत्तिसंख्याविशेषावच्छिन्नानां प्रत्येकं न क्वचिदपि समवायिनि प्रत्यासन्नतेति कथं तदवच्छिन्नस्य कारणत्वं देशनियामकमिति वाच्यम् । तादृशधर्मस्योपलक्षणतया कारणतावच्छेदकत्वात् प्रत्येकं तद्विशिष्टनिरूपिततादात्म्यस्य सत्त्वेऽपि तदुपलक्षिततादात्म्यस्याक्षततया तस्यैव देशनियामकत्वासम्भवात् ।

यत्तु एते दशेत्यादिप्रतीतेर्व्यवहारस्य चोपपत्तये शतत्वादिपर्याप्त्याश्रयं प्रत्येकमपि तद्विशिष्टनिरूपिततादात्म्यमवश्यमेवोपगन्तव्यमिति संख्याविशेषस्य विशेषणतयाप्यवच्छेदकत्वसम्भवः । एवं च क्रमोत्पन्नवृत्तिकार्यस्थले कतिपयसमवाय्यनुत्पादसमये आपत्तिवारणमपीदृशकारणबलात्सम्भवतीति तत्र प्रत्येकस्मिन् संख्याविशेषविशिष्टभेदशालिनि कार्यद्रव्यपर्याप्त्यनुपपत्तेः ।

(१)(युगपदिति । युगपदुत्पन्नेषु च समवेतं यत्त्रित्वादिकं तस्योत्पाददेशनियमायेत्यर्थः । यस्याः संख्याया एकं द्वयं वा समवायिद्रव्यमासीत् अनन्तरं च युगपदेव समवायिनामुत्पत्तिः तेषामनुत्पाददशायामेव तत्तत्संख्योत्पादवारणाय चरमोत्पन्नसमवायिनां तत्र विशिष्य हेतुतायाः आवश्यकत्वात् देशनियमायातिरिक्तप्रागभावतद्धेतुत्वकल्पनापेक्षया पूर्वावस्थितस्यैकस्योभयस्य वा समवायिनो हेतुत्वे लाघवात् तत्प्रागभावासिद्धिरिति तादृशसंख्यातिरिक्तत्रित्वादिसंख्याया एवोपलक्षणमेतत् । तेन यत्र क्रमश एव सर्वसमवायिनामुत्पत्तिस्तत्समवेतचतुष्ट्वादौ कालनियमाय चरमसमवायिना देशनियमाय च पूर्वोत्पन्नत्रिचतुरादिसमवायिनां हेतुतामपेक्ष्य प्रागभावस्य तद्धेतुताकल्पने गौरवाभावात् प्रागभावसिद्धेर्निष्प्रत्यूहतया यत्र वा युगपदेव त्रिचतुरादिसमवायिनां प्रागुत्पत्तिरनन्तरं चापरस्य तत्रापि प्रागुत्पन्नानां कारणतापेक्षया प्रागभावस्य तद्धेतुताकल्पने गौरवाभावात् तत्सिद्धेरावश्यकतया तत्स्थलेऽनुपदर्शनान्न्यूनताया अनवकाशः । क्रमोत्पन्नेषु यत्त्रित्वादिकं तत्र समवायिनामसमवायिकारणानां वा पूर्वोक्तयुक्त्या विशिष्य हेतुताया आवश्यकत्वात्तत एव तेषां देशनियमोपपत्तिसम्भवात् युगपदु-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्पन्नेष्वित्युक्तम् । स्वपूर्ववर्त्तिद्रव्यमन्तर्भाव्य युगपदुत्पन्नानि यानि त्र्यादिद्रव्याणि स्वोत्तरोत्पन्नद्रव्यान्तरमनन्तर्भाव्य प्रकृतसंख्यामुत्पादयन्ति तदन्यत्र्यादिद्रव्यान्यूनवृत्तिसंख्याया नित्यत्रयसमवेतात्रित्वादेश्च उत्पाददेशानियमायेत्यर्थः ।

एतेन यत्र प्रथमत एकं द्वयं वा द्रव्यमासीदनन्तरं च द्रव्यत्रयं युगपदुत्पन्नं तावत्सु चतुष्ट्वं पञ्चत्वं वा जातं तत्र तेषां त्रयाणां विशिष्य कारणताया आवश्यकत्वात्तत्र प्रागभावासिद्धावपि न क्षतिः यत्र पूर्वावस्थितद्रव्यमिव स्वोत्तरोत्पन्नद्रव्यान्तरं चान्तर्भाव्य युगपदुत्पन्नानि त्रिचतुराणि संख्यामुत्पादयन्ति तत्र चरमद्रव्यहेतुतयैव कालनियमेऽपि देशनियामकतया प्रागभावसिद्धेरावश्यकतया तादृशस्थलसङ्ग्रहाय स्वोत्तरद्रव्यान्तरानन्तर्भावो भेदप्रतियोगिको वा युक्तः । द्वित्वस्थले क्लृप्तनियतपूर्ववर्तिताकसमवायिद्वयानन्यथासिद्धत्वकल्पनैवातिरिक्तप्रागभावरूपधर्मितन्नियतपूर्ववर्तिताऽनन्यथासिद्धत्वकल्पनापेक्षया लघीयसीति त्रित्वाद्यनुसरणम् ।

न च द्वित्वस्थले समवायिनोस्तदेकत्वयोश्च विशिष्य कारणत्वं विनिगमनाविरहात्कल्पनीयमिति तत्रापि प्रागभावकल्पने लाघवमिति वाच्यम् । द्वित्वादेरसमवायिकारणानुपगमे एकत्वस्य सामान्यरूपेण द्वित्वादावहेतुतया समवायिनः क्लृप्तसामान्यरूपावच्छिन्नहेतुताकस्यैव विशिष्य हेतुतायां विनिगमकत्वात् त्रित्वस्थले कल्पनीयसाम्येऽपि विनिगमनाविरहात् प्रागभावसिद्धिः चतुष्ट्वादिस्थले तु प्रागभावहेतुतापक्ष एव लाघवं बोध्यम् ।

न च तत्तदपेक्षाबुद्धिव्यक्तेर्विषयतासम्बन्धेनैतात्रित्वादिव्यक्तिहेतुतयैव तदुत्पादनियमसम्भवे किं प्रागभावकल्पनयेति वाच्यम् । द्रव्यान्तरमन्तर्भाव्य चतुष्ट्वादिजनकबुद्धेरपि न्यूनवृत्तित्रित्वादिसंख्याजनकतया अतिरिक्तायास्तद्बुद्धिविषयतायास्तज्जन्यत्रित्वादिव्यक्त्युत्पादनियामकत्वासम्भवान्नानापुरुषीयापेक्षाबुद्धिभिरेकदैव संख्याजनने तत्रापेक्षाबुद्धिव्यक्तेस्तत्संख्याव्यक्तिहेतुत्वं विनिगमनाविरहान्नानाव्यक्तीनामेव तत्तद्व्यक्तित्वेन हेतुतायाः कल्पनीयतया तद्धेतुतया एकैकप्रागभावकल्पनाया एव उचितत्वाच्च ईदृशयुक्त्या सिद्धस्य वस्तुनो ऽभावत्वे सप्रतियोगिकत्वे विनाशित्वे वा मानाभाव

(१) ()एतदन्तर्गतः पाठः पुस्तकान्तरे नास्ति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इत्यस्वरससूचनायाहुरिति ।

सामान्यप्रत्यासत्तौ युक्त्यन्तरमुपन्यस्यति । यद्विति । ज्ञानेच्छेति । इच्छां प्रति ज्ञानस्य कृतिं प्रति इच्छायाश्च कारणत्वग्रह इत्यर्थः । तदुपस्थितिमिति । तत्कार्योपधायकज्ञानेच्छाव्यक्त्युपस्थितिमित्यर्थः । विनेति । सम्भवतीति शेषः । अन्वयसहचारनिरूपककारणव्यक्तिग्रहं विना तद्घटितान्वयव्यतिरेकग्रहस्य ज्ञानसत्त्वे तदधिकरणे तदग्रिमक्षणे इच्छा न तेन विनेत्याकारकस्यासम्भवादिति भावः । सामान्यप्रत्यासत्तिं विना च नेच्छाद्युपधायकज्ञानादिव्यक्तिप्रत्यक्षमिति दर्शयितुमिच्छाद्युत्पत्तिकाले तल्लौकिकप्रत्यक्षं निराकुरुते । न चेच्छेति ।

यत्र त्रित्वाश्रयस्य क्रमेणोत्पादस्तत्र कतिपयाश्रयोत्पत्त्यनन्तरमेव तत्तत्त्रित्वादेरुत्पादवारणाय तदाश्रयव्यक्तीनां समवायिकारणानामसमवायिकारणानां तत्तदेकत्वव्यक्तीनां वा कारणताकल्पनमावश्यकमिति तत्कारणतयैव देशनियमोपपत्तिरन्यत्र तादृशकारणविरहादित्यतो युगपदुत्पन्नेषु नित्येषु वेति । तत्रोक्तातिप्रसङ्गविरहेणाश्रयादिव्यक्तीनां विशिष्य कारणताया अनावश्यकतया देशनियामकैकप्रागभावैकैकतत्कारणताकल्पनस्यैवोचितत्वादिति भावः ।

यद्यपि क्रमोत्पन्नेष्वपि त्र्यादिव्यक्तीनां त्र्यादिकारणतापेक्षया चरमोत्पन्नव्यक्तेः कालनियमाय एकैकप्रागभावव्यक्तेश्च देशनियमाय कारणताकल्पने न गौरवं तथापि यत्र एका आश्रयव्यक्तिः प्रथममुत्पन्नाऽनन्तरं च युगपदपरसकलाश्रयोत्पत्तिरीदृशक्रमोत्पादस्थले चरमोत्पन्नसकलव्यक्तीनां विनिगमनाविरहेण विशिष्य कारणताया आवश्यकत्वादतिरिक्तप्रागभावहेतुतामपेक्ष्य प्रथमोत्पन्नव्यक्तेरेव विशिष्य हेतुतया देशनियमोपपादनमुचितमित्याशयेनेदृशक्रमोत्पादव्यावर्त्तनाय युगपदित्युक्तम् । द्वित्वस्थले क्लृप्तस्याश्रयद्वयस्यानन्यथासिद्धत्वमात्रकल्पनामपेक्ष्यातिरिक्तस्य प्रागभावस्य तत्रानन्यथासिद्धत्वनियतपूर्ववृत्तित्वयोश्च कल्पने गौरवमिति द्वित्वोपेक्षा । त्रित्वस्थले व्यक्तित्रयस्यानन्यथासिद्धत्वकल्पनं एकस्य प्रागभावस्य तत्रानन्यथासिद्धत्वनियतपूर्ववृत्तित्वयोश्च कल्पनं यद्यपि तुल्यं तथापि विनिगमनाविरहेणापि प्राग-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भावसिद्धिर्दुर्धरैव चतुष्ट्वादिस्थले च प्रागभाववादिमते लाघवमित्याशयः। उत्पादनियामकत्वेन । उत्पादस्य दैशिकनियमनिर्वाहकत्वेन। अन्ये त्वाहुरित्यस्वरससूचनाय, स चैतादृशयुक्त्या सिद्धस्य पदार्थस्याभावत्वे सप्रतियोगिकत्वे विनाशित्वे च मानाभावे ज्ञेयः। मिश्रमतं दूषयितुमुपन्यस्यति। यत्त्विति।

(दी०) यत्तु ज्ञानेच्छाकृतीनां कार्यकारणभावग्रहो न तदुपस्थितिं विनेति, न चेच्छाकृतिकाले ज्ञानेच्छासाक्षात्कारौ, योग्यविशेषगुणयौगपद्यस्यात्मनि निषेधात् अतो ज्ञानाद्यन्तरसाक्षात्कार एव ज्ञानत्वादिनेच्छाजनकज्ञानादिकं गृह्णातीत्यभ्युपेयमिति। तन्न।

(गा०) तदुपस्थितिं विना। इच्छोपधायकज्ञानकृत्युपधायकेच्छाव्यक्तीनामुपस्थितिं विना। ज्ञानसत्त्वे तदुत्तरक्षणे इच्छा ज्ञानं विना नेत्यन्वयव्यतिरेकग्रहस्य कार्यकारणभावग्राहकतया तत्र च फलोपधायकव्यक्तिमादायैवान्वयांशस्य ग्राह्यतया तदुपस्थितेरपेक्षणीयत्वादिति भावः।

न चेच्छाकृतिकाले ज्ञानेच्छासाक्षात्काराविति। इच्छोत्पादकाले तज्जनकज्ञानस्य कृत्युत्पादकाले च तज्जनकेच्छायाः साक्षात्कारो न सम्भवतीत्यर्थः। योग्यविशेषगुणेति। एकयोग्यविशेषगुणोत्पत्तिक्षणे तद्वत्यात्मनि योग्यविशेषगुणान्तरानुत्पादनियमादित्यर्थः। अदृष्टसंस्कारोत्पादकाले ज्ञानादेर्ज्ञानाद्युत्पादकाले च अदृष्टादेरुत्पादमादाय व्यभिचारवारणायोभयत्र योग्यतानिवेशः। योग्यत्वं च न लौकिकसाक्षात्कारविषयत्वं तथा सति निर्विकल्पकेन समं विशेषगुणान्तरयौगपद्यनिराकरणासम्भवात् किं तु लौकिकसाक्षात्कारविषयसंस्कारत्वान्यगुणत्वव्याप्यजातिमत्त्वं तथा चात्मनि संयोगद्वित्वादेर्युगपदुत्पादाद्व्यभिचार इति विशेषगुणोपादानम्। चक्षुरादिना वेगे गृह्यमाणायाः संस्कारत्वजातेर्भावनायां सत्त्वात्तद्व्यावृत्तिर्न स्यादिति संस्कारत्वान्यत्वनिवेशनम्।

न च लौकिकमानसविषयजातिमत्त्वमेव निवेश्यतां संयोगत्वादेश्चाक्षुषादिविषयत्वेऽपि लौकिकमानसाविषयत्वान्नोक्तव्यभिचार इति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

किं विशेषगुणविशेषणेनेति वाच्यम् । मनोयोग्यजातिमत्त्वनिवेशे आत्मैकत्वप्रत्यक्षत्वमते संख्यात्वस्य मनोयोग्यतया तद्बहूनां द्वित्वादीनामात्मनि युगपदुत्पादेन विशेषगुणान्तर्भावं विना व्यभिचारानुद्धारात् ।

न च योग्यजातिमत्त्वनिवेशे जीवनयोनिकृतेरपि यत्नत्वादिरूपयोग्यजातिमत्त्वाज्ज्ञानादिना समं तस्य युगपदुत्पादानुपपत्तिरिति वाच्यम् । गुणत्वव्याप्यत्वस्थाने जीवनयोनिकृत्यवृत्तित्वस्यैव जातिविशेषणतया निवेश्यत्वात् प्रवृत्तित्वादिजातिमादायैव तदितरकृतेर्योग्यतानिर्वाहात् । विशेषगुणत्वं चात्रानेकावृत्तित्वमेव आत्मपरिमाणादेरुत्पादविरहेण तत्साधारण्यस्य व्यभिचाराप्रसञ्जकत्वात् । रूपरसादेः शब्दादेश्चैकत्र युगपदुत्पादादात्मनीति । योग्यत्वस्य मनोयोग्यगुणत्वव्याप्यजातिमत्त्वरूपत्वे तदनुपादेयमेव । अतः । उक्तकार्यकारणभावग्रहानुरोधात । ज्ञानाद्यन्तरेति । इच्छाद्यनुपधायकज्ञानादीत्यर्थः । ज्ञानत्वादिनेति । सामान्यप्रत्यासत्त्येति शेषः । इच्छादिजनकम् । इच्छाद्युपधायकम् । गृह्णाति । अवगाहते ।

(दी०) पौर्वापर्यापरिचये धर्मिस्वरूपग्रहेऽपि कारणत्वग्रहासम्भवात् । इच्छाकृत्यनुत्पादस्थले ज्ञानेच्छयोः साक्षात्कारात् ज्ञानेच्छासामान्यव्यतिरेकानियतेच्छाकृतिव्यतिरेकग्रहे मनसा कार्यकारणभावग्रहस्यावश्याभ्युपेयत्वात् । कृत्यनुत्पादस्थले ज्ञानेच्छयोः कृत्यनन्तरमिच्छाकृत्योः समूहालम्बने साक्षात्कारस्य स्मरणेन च ज्ञानानुमानस्य च सम्भवात्, विंशत्यङ्गुल्यवच्छेदेन युगपद्विंशतिप्रयत्नोत्पादवदिच्छाकृतिकाले ज्ञानोत्पादस्याविरोधाच्च ।

(गा०) पौर्वापर्यापरिचय इति । तत्तज्ज्ञानतत्तदिच्छाव्यक्त्योरव्यवहितपूर्वापरीभावाग्रह इत्यर्थः । तद्ग्रहश्च न सामान्यलक्षणयापि तत्तद्व्यक्तिनाशाधिकरणसमयध्वंसानधिकरणत्वरूपाव्यवधानशरीरे तत्तद्व्यक्तित्वेन कारणव्यक्तीनां निवेशाच्चादृशरूपेण व्यक्तीनां ग्रहस्य सामान्यलक्षणयाप्यनिर्वाहादिति भावः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कारणत्वग्रहासम्भवादित्यस्यान्वयांशग्रहस्य कारणताग्राहकत्वो-पगम इत्यादिः। इच्छाकृत्यनुत्पादस्थले ज्ञानेच्छयोः साक्षात्कारा-दिति यथासंख्यमन्वयो बोध्यः। एतच्च ज्ञानत्वेच्छात्वावच्छिन्नाभा-वग्रहे हेतुः। व्यतिरेके। व्यतिरेकग्रहस्थले। नियतेच्छाकृति-व्यतिरेकग्रहे। इच्छाकृतिव्यतिरेकस्य नियमतो ग्रहे सति।

एतेन व्यभिचारग्रहाभावः सम्पादितः। मनसेति। अन्वयांशग्र-हनिरपेक्षेणैवेत्यादिः। कार्यकारणभावग्रहस्य। उपनीतभानरूपस्य। ज्ञानेच्छयोरेकदा लौकिकप्रत्यक्षासम्भवेन तत्कार्यकारणभावस्या-पि तदसम्भवात्। तथा चालं सामान्यप्रत्यासत्त्येति भावः।

अभ्युपेत्य फलोपधायकज्ञानेच्छयोरपि प्रत्यक्षमुपपादयति। कृत्यनुत्पादस्थल इति। ज्ञानेच्छयोः समूहालम्बनसाक्षात्कारस्येत्य-नेनान्वयः। विनश्यदवस्थस्यापि विषयस्य हेतुत्वोपगमादिच्छोत्पत्त्य-नन्तरक्षणे ज्ञानस्य विनाशेऽपि न क्षतिरित्याशयः। तादृशश्च साक्षा-त्कारो जनकज्ञानस्य ज्ञानत्वावगाहित्वे ज्ञानत्वविशिष्टधीरूपः तस्य तदविषयकत्वे ज्ञानत्वांशे निर्विकल्पकरूपः, तदुत्तरमेव चोपनीतभा-नरूपो ज्ञानत्वविशिष्टतज्ज्ञानग्रह इति बोध्यम्। एवमग्रेऽपि। विषय-स्य कार्यसहभावेन हेतुत्वेऽपि इच्छोपधायकज्ञानग्रहमुपपादयति। स्मरणेनेति। इच्छाकालोत्पन्नसंस्काराधीनकालान्तरीणस्मरणरूप-कार्यलिङ्गेनेत्यर्थः। अनुमानं चाहं पूर्वकालीनैतद्विषयकानुभववान् एतद्विषयकवर्तमानस्मृतिमत्त्वादित्याकारकं व्याप्तिः सामान्यतो ग्राह्या। नानावयवेषु युगपन्नानाजातीयचेष्टास्थले तन्नियामकनाना-जातीयनानाकृतीनां युगपदुत्पादस्य नानावैभववादे मणिकारादिभिः स्वीकारात्तद्दृष्टान्तेन ज्ञानेच्छादियौगपद्यमभ्युपेत्य इच्छाद्युत्पाद-काले तज्जनकज्ञानेच्छासाक्षात्कारमुपपादयति। विंशतीति।

अथ विंशत्यङ्गुल्यवच्छिन्नादेकस्मादपि प्रयत्नाद्विंशत्यङ्गुलीषु विंशतेश्चेष्टानामुत्पादसम्भवात्किमर्थं कृतिभेदोपगमः?

न चैकजातीयचेष्टास्थले प्रयत्नैक्यसम्भवेऽपि यत्र विंशत्यङ्गुलीषु मिथो विलक्षणविंशतिचेष्टोत्पत्तिर्युगपदेव तत्र प्रयत्नवैजात्यस्याऽऽ-वश्यकतया प्रयत्नभेद आवश्यकः, एकस्य प्रयत्नस्य नानाजाती-यचेष्टोत्पादकत्वेन सर्वाङ्गुलीषु प्रत्येकं सर्वजातीयचेष्टोत्पादप्र-सङ्गादिति वाच्यम्। प्रयत्ने वैजात्यस्वीकारेऽपि एकस्यां यज्जातीयः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रयत्न उत्पद्यते अन्याङ्गुल्यां तदनुत्पादनियामकस्य दुर्वचतया सर्वत्र सर्वजातीयचेष्टोत्पादस्य दुर्वारत्वात् ।

न च चिकीर्षावैजात्यात् कृतिवैजात्यनियमः कृतिवच्चिकीर्षाणामपि यौगपद्यस्वीकारादिति वाच्यम् । विजातीयनानाकृतिस्थले तज्जनकनानाचिकीर्षाणां परस्परविलक्षणानां स्वीकारेऽपि तासां प्रत्यासत्तेः सर्वाङ्गुलीषु तुल्यतया एकजातीयप्रयत्नावच्छेदकाङ्गुलावन्यजातीयप्रयत्नस्यावच्छेदकतासम्बन्धेनानुत्पत्तौ प्रयोजकाभावात् ।

न च तत्तज्जातीयकृत्युत्पादनियामकं तत्तदङ्गुलीनिष्ठविजातीयचिकीर्षावच्छेदकत्वं प्रतिनियतमेवोपेयत इति नातिप्रसङ्ग इति वाच्यम् । तादृशावच्छेदकताया नियामकस्य दुर्वचत्वात् विजातीयकृत्याद्यवच्छेदकत्वेऽननुगततत्तच्चिकीर्षातत्तदङ्गुलीनां नियामकत्वे तत्तज्जातीयचेष्टासमवाय एव तत्तत्कृतिसहिततत्तदङ्गुल्या नियामत्वसम्भवेन कृतिभेदस्य निर्युक्तिकत्वापातात् ।

न च चेष्टागोचरकृतिसाध्यत्वप्रकारकेच्छाधीना कृतिः चेष्टाजननी कृतेश्चोपादाननिष्ठविलक्षणविषयतायां तत्तदङ्गुल्यां विजातीयचेष्टां कृत्या साधयामीत्याकारकचिकीर्षायास्तत्तदङ्गुल्यादिनिष्ठविलक्षणविषयता नियामिका । एवं च पुरुषान्तरीयावयवव्यावृत्तमवच्छेदकतासहितं तादृशेच्छाविषयत्वं विजातीयचेष्टाजनकविजातीयकृत्यवच्छेदकत्वनियामकं सम्भवति तत एवानुगततत्तज्जातीयचेष्टानियमः सम्भवतीति वाच्यम् । एवं सति तत्तज्जातीयचेष्टानिष्ठसाध्यतानिरूपितोपदर्शितविशिष्टावच्छेदकतासम्बन्धेन एकस्या एव कृतेः समवायेन तत्तज्जातीयचेष्टां प्रति हेतुतया तत्तज्जातीयचेष्टोत्पादनियमसम्भवेन कृतिभेदं विनाप्युपपत्तेरिति । मैवम् । उपदर्शितोपादानताविशिष्टावच्छेदकतासम्बन्धेन एकस्या एव कृतेर्विजातीयचेष्टां प्रति हेतुत्वे सम्बन्धगौरवाल्लाघवेन शुद्धावच्छेदकतासम्बन्धेन विजातीयकृतिहेतुतौचित्यात् कृतिवैजात्यस्य तद्भेदस्य च सिद्धेर्निष्प्रत्यूहत्वात् अवच्छेदकतासम्बन्धेना विजातीयकृतिं प्रति विजातीयचेष्टाविषयकचिकीर्षाया विजातीयचेष्टोत्पत्तिनिष्ठविशेष्यतानिरूपिताधेयतासम्बन्धावच्छिन्नप्रकारताविशिष्टावच्छेदकतासम्बन्धेन हेतुता वाच्या, परकीयाङ्गुल्यादिसाधारणोपादानताविशेषसम्बन्धेन कृतित्वावच्छिन्नं प्रत्यवच्छेदक-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तामनन्तर्भाव्य हेतुताया अतिरिक्तायाः कल्पनेनैतन्मते गौरवं तु फलमुखतया न दूषणावहमिति सङ्क्षेपः।

गोत्वादिहेतुकानुमाने गोत्वत्वादिकमेव हेतुतावच्छेदकं तच्च गवेतरावृत्तित्वे सति सकलगोवृत्तित्वरूपं तच्च सकलगवादिव्यक्तिविषयकज्ञानाविषय इति सकलगवादिज्ञानार्थं सामान्यलक्षणादर इति प्रगल्भयुक्तिं दूषयति। गोत्वे चेति।

(दी०) गोत्वे च गोनिष्ठात्यन्ताभावाप्रतियोगित्वेन समवेतत्वेन च विशेषितमविशेषितं वा गवेतरासमवेतत्वं व्याप्यतावच्छेदकं न तु सकलगोवृत्तित्वविशेषितं सामान्यलक्षणयापि ग्रहीतुमशक्यत्वात् न तु समानविषयकत्वेनापीति ।

(गा०) सास्नावत्त्वादौ साध्ये गवेतरासमवेतत्वमविशेषितमेव व्याप्यतावच्छेदकं गोपदप्रवृत्तिनिमित्तत्वे साध्ये तादात्म्येन गोत्वे हेतौ असमवेते व्यभिचारवारणाय समवेतत्वेन विशेषणीयं गोनिष्ठरूपादौ व्यभिचारवारणाय गोनिष्ठाभावाप्रतियोगित्वेन च तद्विशेषणीयम् ।

न चैवं सति समवेतत्वांशवैयर्थ्यं असमवेतस्य गोनिष्ठाभावप्रतियोगित्वेनैव वारणादिति वाच्यम् । द्वित्वाद्यवच्छिन्नगोत्वाभाववारणाय प्रतियोगिव्यधिकरणत्वेनाभावस्य विशेषणीयतया गगनाभावस्य प्रतियोग्यधिकरणाप्रसिद्ध्या प्रतियोगिवैयधिकरण्यासम्भवेन गगनादेरपि प्रतियोगिव्यधिकरणाभावाप्रतियोगितया तद्वारकतया समवेतत्वांशसार्थक्यादिति ।

न च स्वप्रतियोगिसमानाधिकरणो यो यस्तदन्यत्वेनाभावं विशेष्य द्वित्वाद्यवच्छिन्नगोत्वाद्यभाववारणसम्भवात् गगनाभावस्य चासङ्ग्रहात्समवेतत्वविशेषणमनर्थकमिति वाच्यम् । प्रतियोग्यधिकरणवृत्तिभिन्नस्याभावविशेषणत्वापेक्षया गवि प्रतियोग्यनधिकरणत्वस्य गवेतरासमवेते समवेतत्वस्य च निवेशे गौरवाभावात् ।

(दी०) स्यादेतत् समानप्रकारतामात्रस्य प्रयोजकत्वे क्वचिदेव रजतत्वप्रकारिकेच्छा क्वचिन्नेति नियमो न स्यात् तादृशप्रकाराश्रये एव तदुत्पादोपगमे कथमरजते रजतत्वप्रका-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रिकेच्छा अनुपस्थिते चासंसर्गाग्रहोऽपि न नियामकः । वस्तुतोऽसंसर्गाग्रहमपेक्ष्य लघीयसस्तद्विषयतामात्रस्यैव नियामकत्वमुचितं सामान्यतश्च तादिच्छायां व्यवस्थितहेतुभावस्य तद्विषयकज्ञानस्य तत्प्रकारकत्वमवच्छेदकं कल्प्यते लाघवात् ।

(मा०) क्वचिदेवेति । रजतत्वादिना रजतादिज्ञानाद्रजतत्वादिना रजतादिविशेषविषयिण्येवेच्छा जायते न तु तेन रूपेण प्रमेयमात्रविषयिणीति नियमो न स्यादित्यर्थः, ज्ञानस्य भवन्मते प्रकारतामात्रानियामकत्वादिति भावः ।

ननु तत्तद्धर्मप्रकारकस्य ज्ञानस्य तत्तद्धर्माश्रयविषयकतत्तद्धर्मप्रकारकेच्छात्वं कार्यतावच्छेदकमिति रजतत्वादिना रजतादिज्ञानान्न घटादिविषयकेच्छाप्रसङ्ग इत्यत आह । तादृशेति । तादृशप्रकाराश्रये । जनकज्ञानप्रकारीभूतरजतत्वादिरूपधर्माश्रये । कथमरजत इति । रजतत्वभ्रम इत्यादिः । भ्रमश्च विशिष्टज्ञानं ज्ञानद्वयं वेत्यन्यदेतत् ।

ननु रजतत्वाद्यसंसर्गग्रहविषयव्यावृत्तस्तदग्रहविषयत्वाभाव एव रजतत्वादिप्रकारकेच्छाविषयत्वनियामकस्तस्यैव विशेषणतासम्बन्धेन तादृशेच्छां प्रति हेतुत्वोपगमात् रजतत्वादिज्ञानमपि तत्सहकारि कल्प्यते अतो नानुपस्थितरजतत्वाद्यसंसर्गाग्रहात् तत्प्रकारकेच्छाप्रसङ्ग इत्यत आह । अनुपस्थिते चेति । अनुपस्थितविषयनिष्ठो रजतत्वाद्यसंसर्गाग्रहो न तत्प्रकारकेच्छाविषयताप्रयोजकः सम्भवति किं तु उपस्थितिविषयतासहकृत एव स तथा वाच्यः अन्यथा असंसर्गाग्रहस्यानुपस्थितयावद्वस्तुसाधारणतया तादृशयावद्वस्तूनामेव रजतत्वादिप्रकारकेच्छाविषयतापत्तेरित्यनागतेच्छाविषयोपस्थित्यर्थं सामान्यप्रत्यासत्तेरावश्यकतेति समुदिततात्पर्यार्थः । स्वसिद्धान्तसिद्धं विशिष्टज्ञानस्य हेतुत्वमपि व्यवस्थापयति । वस्तुत इति । लघीयसः । अतिलघुशरीरस्य । तद्विषयतामात्रस्य । रजतत्वादिप्रकारकज्ञानविषयतामात्रस्य । नियामकत्वम् । तत्प्रकारकेच्छाविषयताप्रयोजकत्वम् ।

ननु गौरवेऽपि क्लृप्तनियतपूर्ववर्तिताकस्यासंसर्गाग्रहस्यैव त-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हेतुत्वमुचितं न तु समानविषयकविशिष्टज्ञानस्येत्याशङ्कां निरा-
करोति । सामान्यतश्चेति । असंसर्गाग्रहाविषयानुपस्थितवस्तुनीच्छा-
वारणायेत्यादिः । सामान्यतः । सामान्यरूपेण । तद्विषयकज्ञानत्वेने-
ति यावत् । तदिच्छायाम् । तद्विषयकेच्छायाम् । व्यवस्थितहेतुभा-
वस्य । असंसर्गाग्रहहेतुत्ववादिनापि कल्पनीयकारणताकस्य । तत्प्र-
कारकत्वम् । फलीभूतेच्छाप्रकाररजतत्वादिप्रकारकत्वम् । अवच्छे-
दकमित्यस्य कारणतायामित्यादिः । लाघवादिति । कारणत्वान्तरक-
ल्पनामपेक्ष्य क्लृप्तकारणतायामवच्छेदकाभिवृद्धौ लाघवादित्यर्थः ।

नन्वनुपस्थितस्याप्यसंसर्गग्रहाविषयस्येच्छाविषयत्वमिष्टमेव,
नेष्यते परमसंसर्गग्रहविषयस्येति तद्विषयविषयकेच्छायां तद्विषय-
कत्वेन ज्ञानस्य हेतुत्वं नोभयसिद्धं कुत्रावच्छेदकाभिवृद्धिरित्यत
आह । अस्तु वेति ।

(दी०) अस्तु वा समानप्रकारकत्वेन व्यवस्थिते कार्य-
कारणभावेऽतिप्रसङ्गभङ्गाय सामानाधिकरण्यमिव समान-
विषयत्वमपि प्रत्यासत्तिः । असंसर्गाग्रहादेः कारणतामपेक्ष्य
समानविषयत्वस्यावच्छेदककोटिनिवेशोऽपि लघीयान् कार-
णयथार्थत्वायथार्थत्वाधीनस्तु कार्यस्य तथाविधो विशेषः ।

(गा०) व्यवस्थिते । उभयवादिसिद्धे । अन्यथानुपस्थित-
रजतत्वादेरपीच्छाप्रकारतापत्तेरिति भावः । अतिप्रसङ्गभङ्गायेति ।
यथा एकस्य पुंसो रजतत्वादिप्रकारकज्ञानादन्यस्य तादृशेच्छावा-
रणाय एकार्थसमवायरूपसामानाधिकरण्यं कार्यकारणभावघटक-
प्रत्यासत्तिरुपेयते तथा एकविषयनिष्ठविषयताद्वयरूपं समानविशे-
ष्यत्वमपि तादृशप्रत्यासत्तिरित्युपेयत इत्यर्थः । तावतैवासंसर्ग-
ग्रहविषय इच्छावारणसम्भवेनासंसर्गाग्रहस्य कारणत्वान्तरं न
कल्प्यते तदपेक्षया प्रत्यासत्तिवृद्धौ लाघवात् ।

न च प्रत्यासत्तिभेदात्कारणताभेदः, आवश्यकताद्वयघटिताया
एककारणताया अपि सम्भवात् । अन्यत्र यथा सामानाधिकरण्यं
प्रत्यासत्तिस्तथा प्रकृते समानविशेष्यकत्वमेव प्रत्यासत्तिरिति तु
नार्थः, प्रकृते सामानाधिकरण्यप्रत्यासत्त्यनादरे समवायेनोत्पत्तिनि-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ग्रमाय तत्पुरुषीयत्वस्यावश्यं निवेशनीयतया पुरुषभेदेनानन्तकारणताप्रसङ्गात् सामानाधिकरण्यप्रत्यासत्त्यैव कारणतायाः फलसत्त्वात्तादृशप्रत्यासत्तिपरित्यागासम्भवाच्च ।

न च प्रत्यासत्तिद्वयादेरपि विभिन्नपुरुषयोर्विभिन्नधर्मिकज्ञानदशायां वैपरीत्येन प्रत्येकमुभयधर्मिविषयकेच्छाप्रसङ्गः । उभयप्रत्यासत्तिघटितैककारणताश्रयस्य एकस्य उभयकारणतावच्छेदकप्रत्यासत्त्या उभयदेशे प्रत्यासन्नीभूय कार्यतावच्छेदकसम्बन्धेन तदुभयदेशप्रत्यासन्नैककार्योत्पादकत्वस्याभाव्यात् । तत्तदात्मसमवेतज्ञानाविषये तदात्मसमवेतेच्छाया विषयतया उत्पत्त्यसम्भवात् ।

न चास्तूभयप्रत्यासत्त्यैकं कारणत्वं तथापि विषयनिष्ठप्रत्यासत्त्या व्यापकत्वं ज्ञानस्य कल्पनीयम्, असंसर्गाग्रहस्य तु तत् क्लृप्तमिति न लाघवमिति वाच्यम् । गुरुधर्मावच्छिन्ने असंसर्गाग्रहे अनन्यथासिद्धत्वकल्पनामपेक्ष्य लघुरूपावच्छिन्ने अनन्यथासिद्धज्ञाने उक्तव्यापकताकल्पने लाघवस्य दुर्वारत्वात् विषयप्रत्यासन्नासंसर्गाग्रहप्रतियोगिनि तत्तत्पुरुषीयत्वस्यावश्यं निवेशनीयतया असंसर्गाग्रहनिष्ठावच्छेदकस्यानन्त्याच्च । समानविषयकत्वस्यावच्छेदककोटिनिवेशेऽपि समीहितसिद्धेः समानविशेष्यकत्वस्य प्रत्यासत्तित्वेऽतिनिर्बन्धोऽयुक्त इत्याशयेन समानविषयकत्वेन हेतुतायामपि लाघवं दर्शयति । असंसर्गाग्रहादेरिति । आदिना रजतभेदाग्रहरजतत्वासंसर्गादिव्याप्यतदवच्छेदकनानाधर्माग्रहपरिग्रहः । लघीयानिति ।

यद्यपि समानविशेष्यकत्वस्य कारणतावच्छेदककोटौ विशेषणतया प्रवेशे विशेष्यतत्तद्व्यक्तिभेदेन कारणताभेदस्तथापि रजतत्वादिविशिष्टबुद्धिविरोधिदर्शितनानाविधज्ञानाभावानां पुरुषभेदेन भिन्नकारणताकल्पनापेक्षया लाघवमक्षुण्णमेवेति बोध्यम् ।

नन्विच्छायाः संवादित्वविसंवादित्वयोर्धर्मिण्यविद्यमानविद्यमानासंसर्गग्रहविरहोऽवश्यं प्रयोजको वाच्य इत्यसंसर्गाग्रहकारणत्वमावश्यकमित्याशङ्कां निरस्यति । कारणेति । कारणीभूतरजतत्वादिप्रकारकज्ञानस्य यथार्थत्वं फलीभूतेच्छाया याथार्थ्ये तस्यायाथार्थ्यं च तस्या अयाथार्थ्ये प्रयोजकं तेनैव रूपेण ज्ञानेच्छयोर्विशेषकार्यकारणभावान्नोक्तासंसर्गाग्रहविशेषस्य तत्प्रयोजकत्वमिति भावः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(दी०) एतेन रजतत्वप्रकारकेच्छायां तत्प्रकारकज्ञानं संवादिन्यां तस्यां दोषाभावसहितम्, विसंवादिन्यां तूपस्थितरजतगतभेदाग्रहसहितं हेतुरिति परास्तम् । त्वद्दिशापि च संवादिन्यामुपस्थितरजतभेदाग्रहस्यैव हेतुत्वौचित्यात् । दोषाणां रजतभेदग्रहप्रतिबन्धकानामभावमपेक्ष्य लघुत्वात् ।

(गा०) एतेनेति । लघीयसोः समानविशेष्यकज्ञानयाथार्थ्यायाथार्थ्ययोरिच्छासंवादविसंवादप्रयोजकत्वसम्भवेनेत्यर्थः । इति परास्तमित्यग्रेतनेनान्वयः । तत्प्रकारकं ज्ञानमिति । समानविषयकत्वविशेषणानवच्छिन्नमिति शेषः । हेतुरित्यग्रेतनेनान्वयः । दोषाभावसहितमिति । अरजते रजतत्वभ्रमजनकदोषाभावसहितमित्यर्थः । तथा च संवादीच्छायां तादृशदोषाभावो विशेषसामग्रीति समानविषयकज्ञानाभावान्न तादृशभ्रमस्थले संवादीच्छाविरहोऽपि तु तादृशदोषादेवेति संवादीच्छायामनागतभानानुरोधेन नानागतज्ञानापेक्षा, यदा यत्र रजते रजतभेदभ्रमः तदापि रजतत्वेन रजतान्तरज्ञाने रजतत्वेन तद्रजतेच्छा स्वीक्रियते रजतान्तरे रजतत्वग्रहाविरोधितो विपरीतज्ञानस्य तद्रजतेऽपि तद्ग्रहाविरोधितया व्यवस्थापितत्वात तत्र समानविषयकत्वविशिष्टज्ञानस्यापि सम्भवेन भवतोऽपि तदावश्यकत्वादिति भावः । उपस्थितारजतेति । उपस्थित यदरजतं तन्निष्ठरजतभेदाग्रहसहितमित्यर्थः । अनुपस्थितवस्तुमात्रे रजतत्वप्रकारकेच्छाप्रसङ्गस्य पूर्वोपदर्शितस्यैव वारणायोपस्थितेति । न चैनावता सामान्यप्रत्यासत्तिसिद्धिः, विसंवादीच्छायां सिद्धस्यैवारजतस्य विषयत्वोपगमादित्याशयः । रजते विसंवादिरजतत्वप्रकारकेच्छावारणायारजतेति । अन्यथाख्यातिमनङ्गीकुर्वतां अरजते रजतत्वविशिष्टज्ञानाप्रसिद्धेस्तत्कार्यकारिभेदाग्रहानुसरणम् । भेदाग्रहश्च दोषप्रयोज्यो विवक्षणीयः अतो रङ्गरजतेइति(१) समूहालम्बनस्मरणादिकाले भेदाग्रहसत्त्वेऽपि नाभ्रान्तस्य विसंवादीच्छा, भेदाग्रहपदेन भेदग्रहविरोधिदोष एव वा विवक्षितः । उपस्थितरजतेति ।

(१) अन्यथा रङ्गरजतेइति–पु० पा० ।

CC-0. In Public D

Digitized by Arya Samaj Foundation Chennai and eGangotri

उपस्थितरजतनिष्ठरजतभेदाग्रहस्येत्यर्थः । रजतभेदग्रहप्रतिबन्धकानाम् । रजतभेदग्रहप्रतिबन्धकत्वेनानुगतानाम् । लघुत्वादिति । उक्तप्रतिबन्धकत्वापेक्षया भेदग्रहत्वरूपप्रतियोगितावच्छेदकस्य लघुशरीरत्वादिति भावः । लाघवमुपलक्षणम् । दोषाभावस्य हेतुत्वे प्रमाभ्रमोभयरूपज्ञानात्संवादीच्छानुपपत्तेस्तदनुरोधोऽपि द्रष्टव्यः । तथा च संवादीच्छायामनागतविषयकत्वनिर्वाहकतदुपस्थित्यर्थं सामान्यप्रत्यासत्तेरावश्यकतेति भावः ।

न चात्रोपस्थितिर्नापेक्ष्यत इति वाच्यम् । तथा सति संवादिभिन्नाया इच्छाया भेदाग्रहदशायामनुपपत्तेः संवादिच्छासामग्र्या नियतत्वात् उपस्थित्यपेक्षायां रजतानुपस्थितिदशायामेव भ्रमात्तादृशेच्छोत्पत्तेः । एतच्चापाततः, संवादीच्छायां स्वप्रकारीभूतरजतत्ववत्त्वसम्बन्धेन रजतत्वज्ञानत्वेन हेतुताया एवोपस्थितरजतनिष्ठरजतभेदाग्रहहेतुतापेक्षया लाघवात्कल्पयितुमुचितत्वमिति सिद्धरजतज्ञानादेवानागतरजतगोचरसंवादीच्छोपपत्तेः सामान्यप्रत्यासत्त्यसिद्धेः ।

किं तु इदमत्र तत्त्वम्, संवादीच्छात्वादिकं न कस्यचित्कार्यतावच्छेदकं प्रमात्वादिवदर्थसमाजग्रस्तत्वादतः संवादिविसंवादिसाधारणरजतत्वादिप्रकारकेच्छां प्रति तत्प्रकारकज्ञानत्वेन सामान्यतः एकहेतुतैव कल्प्यते अत्र च प्रमात्मकज्ञानाद्विसंवादीच्छाया रङ्गादिविषयकज्ञानाच्छुक्त्यादिगोचरेच्छायाश्च वारणाय समानविशेष्यत्वं प्रत्यासत्तिरुपेयते अतो ऽनागतगोचरेच्छानुरोधेन सामान्यप्रत्यासत्त्यादरः । समानविषयकत्वं च न विशेषणमुपेयते विषयभेदेन कारणताबाहुल्यप्रसङ्गादिति समानविषयकत्वविशेषणस्य तत्तद्व्यक्तिविषयकत्वपर्यवसानेन भ्रमप्रमाभेदेन कारणताभेदस्यावश्यकत्वात् भ्रमस्यैव तत्तद्व्यक्तिविषयकत्वात् भ्रमस्यैव तत्तद्व्यक्तिविषयकत्वेन तदवच्छिन्नेच्छाहेतुत्वमुपेयते प्रमायां तु सामान्यतो रजत्वज्ञानत्वेनैव रजतविषयकेच्छात्वावच्छिन्नं प्रति हेतुतेति न सामान्यप्रत्यासत्त्यवकाश इति पूर्वपक्षानवकाशः ।

न च समानविशेष्यत्वं समानप्रकारकत्वं वा प्रत्यासत्तिरित्यत्र विनिगमनाविरह इति वाच्यम् । विनिगमनाविरहेणोभयप्रत्यासत्त्या

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ज्ञानहेतुत्वेऽपि सामान्यप्रत्यासत्तेरावश्यकत्वादितीच्छायां समानविषयकज्ञानापेक्षामङ्गीकृत्यैव सामान्यप्रत्यासत्तिं स्वयं प्रकारान्तरेण खण्डयितुमुपक्रमते अत्राहुरिति ।

(दी०) अत्राहुः सिद्धे एव सुखे सुखत्वेन रूपेणेच्छा लाघवात्तत्प्रकारकेच्छायां तत्प्रकारावच्छेदेन सिद्धत्वज्ञानमेव हि विरोधि न च तत् प्रकृते, तत्सत्त्वे इच्छोत्पत्तेस्त्वयाऽप्यनङ्गीकारात् । कथमन्यथा चिरप्रोषितस्याज्ञातकान्तामरणस्य तत्कान्तावलोकनादाविच्छा, जातावलोकनादीनां सिद्धत्वज्ञानात् अतिरिक्तस्य चासत्त्वादित्यादि बहुतरमूहनीयम् ।

(गा०) सिद्ध एवेत्येवकारेण अनागतव्यवच्छेदः अतो न तज्ज्ञानानुरोधेन सामान्यप्रत्यासत्तिरिति भावः ।

ननु सिद्धत्वज्ञानरूपप्रतिबन्धकसत्त्वेन सिद्धसुखे नेच्छासम्भव इत्याशङ्क्याह । लाघवादिति । सिद्धत्वज्ञानमेवेत्येवकारेण सुखत्वादिसामानाधिकरण्यमात्रावगाहिसिद्धत्वबुद्धेः सुखत्वादिप्रकारकेच्छाप्रतिबन्धकत्वव्यवच्छेदः । तत्सुखत्वादिप्रकारावच्छेदेन सिद्धत्वज्ञानं प्रकृते सुखत्वादिप्रकारकेच्छापूर्वकाले कुत इत्याकाङ्क्षायामाह । तदिति । तत्सत्त्वे । तादृशसिद्धत्वज्ञानसत्त्वे । अनङ्गीकारादिति । अनुभवविरोधेनेत्यादिः । समानविषयकसिद्धत्वज्ञानमात्रस्य विरोधित्वे बाधकमाह । कथमन्यथेति । ज्ञातकान्तामरणस्य तत्कान्तावलोकनत्वावच्छेदेनापि सिद्धत्वज्ञानसम्भवान्न तत्कान्तावलोकने इच्छा कस्यचिदप्यनुमता इत्यज्ञातकान्तामरणस्येति । प्रोषितस्येति । कान्तामरणाज्ञाने हेतुः ।

न च कान्तामरणज्ञाने कान्तावलोकनेच्छानुत्पत्तौ विनष्टपुत्रशोकार्तस्य पुत्रदर्शनेच्छोत्पत्त्यभिधानं मिश्राणां विरुध्येतेति वाच्यम् । तदभिधानस्य पुत्रो दर्शनविषयो भवत्वित्याकारकदर्शनत्वावच्छिन्नविषयकेच्छापरत्वात् तादृशेच्छायां च दर्शनत्वावच्छेदेनैव सिद्धत्वज्ञानस्य विरोधितया तत्पुत्रदर्शनत्वावच्छेदेन सिद्धत्वज्ञानसत्त्वेऽपि बाधबुद्धेरिच्छायामविरोधित्वे तदुत्पादे बाधकाभावात् । अतिरिक्तस्य । सिद्धत्वज्ञानाविषयतत्कान्तावलोकनादेः । असत्त्वात् । अप्रसि-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्धत्वात् । तथा च सामान्यलक्षणोपगमेऽपि नेच्छानिर्वाह इति भावः ।

न च तत्कान्ताविषयकत्वेनान्यावलोकनाविषयिण्यैवेच्छा भविष्यतीति वाच्यम् । तेन रूपेण तद्विषयकभ्रमं विना तदनुपपत्तेः ।

(दी०) अथ सिद्धत्वनिश्चयाभावापेक्षया लाघवादसिद्धत्वज्ञानमेव हेतुः । न च सिद्धत्वेन ज्ञाते तत् सम्भवतीत्यसिद्धत्वज्ञानार्थं सामान्यलक्षणेति चेन्न । विशेषरूपावच्छेदेन सिद्धत्वेन ज्ञाते एव सामान्यरूपेणासिद्धत्वग्रहसम्भवात्, तदेकं ज्ञानं ज्ञानद्वयं वेत्यन्यदेतत्, सामान्यलक्षणासहस्रेणाप्यसिद्धत्वस्य ज्ञातुमशक्यत्वाच्च ।

(गा०) लाघवादिति । निश्चयत्वानिवेशात् वर्त्तमानप्रागभावाप्रतियोगित्वरूपाद् वर्त्तमानकालध्वंसानुत्पत्तिकत्वरूपाद्वा सिद्धत्वात् तत्प्रतियोगिनोऽसिद्धत्वस्य लघुशरीरत्वाच्चेति भावः । तदसिद्धत्वज्ञानं सम्भवतीति । विपरीतज्ञानस्य विरोधिनः सत्त्वादिति भावः । असिद्धत्वज्ञानार्थम् । असिद्धत्वज्ञाने विशेष्यीभूतासिद्धव्यक्तिभानार्थम् ।

यद्यप्यसिद्धत्वज्ञानस्य हेतुत्वे अप्रामाण्यनिश्चयाभावस्यावच्छेदकतया वाच्यत्वात् सिद्धत्वज्ञानप्रतिबन्धकत्वे चाप्रामाण्यज्ञानाभावस्यैव तथात्वात् तत्प्रतिबन्धकत्वमेव कल्पयितुमुचितमिति तथाप्यसिद्धत्वज्ञानहेतुत्वाभ्युपगमेनैव सामान्यप्रत्यासत्तिं खण्डयति । विशेषेति । विशेषरूपम् । तत्तत्सुखत्वादिकम् । असिद्धत्वग्रहसम्भवादिति । तथा च सिद्धसुख एवासिद्धत्वभानादिच्छाप्रवृत्तिनिर्वाहान्न सामान्यलक्षणादर इति भावः ।

नन्वन्यथाख्यातिमनङ्गीकुर्वतां गुरूणां मते सिद्धेऽसिद्धत्वज्ञानं न सम्भवतीत्यसिद्ध एव तत् ज्ञानमङ्गीकार्यमित्यत आह । तदेकमिति । एकज्ञानम् । अन्यथाख्यातिरूपम् । ज्ञानद्वयम् । ज्ञानान्तरविषयधर्मिसाकाङ्क्षासिद्धत्वज्ञानं न तु ज्ञायमानधर्म्यगृहीतासंसर्गकासिद्धत्वविषयकं ज्ञानान्तरं सिद्धत्वज्ञानाभावहेतुतायामेव पर्यवसानप्रसङ्गात् । आकाङ्क्षा च धर्मधर्मिणोर्विशेष्याविशेषणभावः स च

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

न्यायमते एकधीविषययोरेव, गुरुमते च भ्रमस्थले विभिन्नज्ञानवि-
षययोरपि धर्मधर्मिणोरित्येव विशेषः स पुनः स्वरूपसम्बन्धविशेषः
पदार्थान्तरं वेत्यन्यदेतत् । तस्य च ज्ञानेनापि समं निरूप्यनिरूप-
कभावः सम्बन्धो न्यायमतसाधारण एव अतो असंसर्गाग्रह-
कालीनधर्मधर्मिविषयकज्ञानयोरपि वस्तुगत्या विशेष्यविशेषण-
भाववद्धर्मधर्मिविषयकतया ततो ऽपीच्छाद्यापत्तिरिति परास्तम् ।
धर्मधर्मिणोः परस्पराकाङ्क्षानिरूपकज्ञानस्यैव विशिष्टज्ञानकार्यकारि-
तोपगमात् असंसर्गाग्रहकालीनज्ञानयोर्धर्मधर्मिसाकाङ्क्षत्वानिरूप-
कत्वात् इत्यन्यत्र विस्तरः ।

नन्वेवमभ्रान्तस्येच्छानुपपत्तिरिति सामान्यप्रत्यासत्तेरावश्यकतेत्यत आह । सामान्येति । अशक्यत्वादिति । सामान्यलक्षणायाः सुखत्वादिसामान्यप्रकारेणैवासिद्धभानप्रयोजकत्वान्न त्वसिद्धत्वेनेति भावः ।

ननु सामान्यप्रत्यासत्त्या भासमानेऽसिद्धसुखे सामान्यलक्षणाजन्यज्ञानोपनीतानामासिद्धत्वघटकपदार्थानां विशेष्ये विशेषणमित्यादिरीत्या भानेनैवासिद्धत्वप्रकारकासिद्धज्ञाननिर्वाहः ।

न च इच्छालक्षणक्षणस्य तत्क्षणत्वेन वर्तमानत्वघटितासिद्धत्वघटकत्वादिच्छापूर्वं च तेन रूपेण तस्य कथञ्चिदपि ज्ञानं सम्भवतीति वाच्यम् । तथा सतीच्छाक्षणापेक्षायां सिद्धत्वस्यापि प्राग् दुर्ग्रहतया तज्ज्ञानस्य प्रतिबन्धकताया अप्यसम्भवित्वापातात् । क्रियादिरूपतादृशक्षणस्य प्रागपि सत्त्वेन तत्तद्व्यक्तित्वेन तदंशे लौकिकस्य तद्वृत्तिप्रतियोगिकप्रागभावाधारत्वाभाववत्स्वरूपतदीयक्षणत्ववैशिष्ट्यांशे प्रत्येकपदार्थोपस्थितिमूलकोपनीतभानात्मकसिद्धत्वज्ञानस्य कथञ्चित्सम्भवे त्वसिद्धत्वज्ञानस्यापि तथा सम्भवादित्याशङ्क्य विनापि सामान्यलक्षणामनुमानेनासिद्धविषयकासिद्धत्वज्ञानमुपपादयति । वस्तुतस्त्वित्यादि ।

(दी०) वस्तुतस्तु सामान्यलक्षणां विनाऽप्ययं कालः सुखप्रागभाववान् सुखोत्पादकालीनध्वंसप्रतियोगी वा कालत्वादेतादृशकालत्वाद्वेत्यनुमानादसिद्धसुखस्य तदसिद्धत्वस्य

Digitized by Arya Samaj Foundation Chennai and eGangotri

च ज्ञानं सुलभमेव, निपुणतरमुपपादयिष्यते चेदं शब्दमणिदीधिताविति कृतं पल्लवितेन ।

(गा०) अयं काल इति । अयं क्षण इत्यर्थः । तेन वर्तमानस्थूलकालवृत्तिप्रागभावप्रतियोगित्वस्य सिद्धसाधारण्येऽपि न क्षतिः । सुखप्रागभाववानिति । प्रागभावमभ्युपेत्य । तावतापि सामान्यप्रत्यासत्त्यसिद्धेर्व्यक्तीकरणीयत्वात् ।

न चानागतस्यैतादृशानुमानादेव सिद्धावीदृशानुमानपूर्वं साध्याप्रसिद्धिरेव दुर्लभा, प्रतियोगिभासकाभावेन सुखप्रागभावस्य प्रत्यक्षासम्भवादिति वाच्यम् । अभावत्वं विनाशिवृत्ति पदार्थविभाजकोपाधित्वाद्भावत्ववदित्यनुमानाद्विनाशित्वसमानाधिकरणाभाववत्त्वरूपप्रागभावत्वसिद्धौ सुखं प्रागभावप्रतियोगि उत्पत्तिमत्त्वादित्यनुमानेन सुखप्रागभावरूपसाध्यप्रसिद्धेः ।

न चानुमाने तुल्यवित्तिवेद्यतया भानस्य निर्युक्तिकत्वादुक्तप्रयासेनापि न साध्यतावच्छेदकावच्छिन्नप्रसिद्धिनिर्वाह इति वाच्यम् । उक्तानुमानाद्विपरीतविशेष्यविशेषणभावापन्नप्रकृतसाध्यतावच्छेदकावच्छिन्नघटकपदार्थानां सिद्धौ विपरीतशङ्कोत्पत्त्यसम्भवे ज्ञानप्रत्यासत्तिसहितमनसैव प्रकृतज्ञानजननसम्भवात् तादृशरीत्यैव प्रकृतानुमानेनाप्यसिद्धत्वधीनिर्वाहो बोध्यः । प्रागभावानङ्गीकारपक्षे स्वीकार्यप्रागभावाघटितमसिद्धत्वं साधयति । सुखोत्पादेति । महाप्रलयोपगमे तत्र व्यभिचार इत्यतो हेत्वन्तरमाह । एतादृशेति । असिद्धत्वस्य । वर्त्तमानप्रागभावप्रतियोगित्वादिरूपस्य । शब्दमणिदीधिताविति । पाकानुमानव्याख्यायामिति शेषः । सिद्धे प्रवर्त्तकेदानीन्तनकृतिसाध्यत्वव्याप्यवत्ताया बाधितत्वेन अन्यथाख्यातिमनङ्गीकुर्वतां असिद्ध एव पाके परामर्शस्य स्वीकरणीयत्वादनागतभानासम्भवे प्रवर्त्तकानुमानस्य दुर्घटत्वादिति भावः ।

(चि०) यत्तु पाकादौ चिकीर्षा सुखादौ इच्छा न स्यात् सिद्धे इच्छाविरहात् असिद्धस्याज्ञानात् तस्मात्सुखत्वादिना ज्ञातेषु सर्वेषु सिद्धं विहायासिद्धे इच्छा भवतीत्यभ्युपेयम् १ तन्न । असिद्धस्याज्ञा-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नेऽपि सिद्धगोचरज्ञानादेव इच्छाप्रवृत्तिस्वाभाव्याद-सिद्धे तयोरुत्पत्तेः । न चातिप्रसङ्गः, समानप्रकारकत्वेन ज्ञानेच्छाकृतीनां कार्यकारणभावात् न तु समानविषयकत्वेनापि क्वचिदप्यकल्पनात्, समानविषयकत्वे सत्यपि समानप्रकारकज्ञानाभावेनेच्छाकृत्योरभावात् तस्यावश्यकत्वेन गौरवाच्चेति परसिद्धान्तात् । न च सर्वज्ञत्वे संशयो न स्यादिति दोषः, घटः स इति घटत्वप्रकारकं हि ज्ञानं संशयविरोधि तच्च न वृत्तं स्वसामग्रीविरहात् अतो घटत्वादिसकलविशेषज्ञानेऽपि स घटो न वेति संशय इति ॥

(दी०) घटः स इत्यादिसंशयसमानाकारो हि निश्चयस्तद्विरोधी घटो न वेति संशयः कोटितावच्छेदके घटत्वांशे निष्प्रकारकश्च,न च प्रमेयवानिति प्रत्ययस्तथा । अत एव जातिमानिति निश्चयेऽपि घटो न वेति संशयः घटत्ववन्निश्चयस्तु घटतरावृत्तित्वविशिष्टमवगाहमानो घटान्यतासन्देहं विरुणद्धि, पुरुषावृत्तिवक्रकोटरादिनिश्चय इव पुरुषत्वसंशयम् । स्वसामग्रीविरहादिति । घट इति निश्चयं प्रति घटत्वांशे निर्विकल्पकं ज्ञानं कारणं जातित्वादिना घटत्वादिज्ञानेऽपि तदनुदयात् सामान्यलक्षणायाश्च सामान्यप्रकारकज्ञानजनकत्वानियमात् विशिष्टज्ञानसामग्रीसत्त्वात् ॥

(गा०) घटत्वप्रकारकस्य घटः स इति ज्ञानस्यैव स घटो न वेति संशयविरोधिता न तु तादृशस्यापि प्रमेयवान् स इत्यस्येति मूलोक्तविशेषस्य बीजं स्फुटयति । संशयेति ।

समानाकार इति । निश्चयः । अभेदेन घटत्वावच्छिन्नप्रकारकः समवायेन घटत्वप्रकारको वा समानधर्मितावच्छेदकनिश्चयः । तद्विरोधी । घटभेदसंशयविरोधी एकजातीयविषय-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ताक इत्यर्थः । कोटितावच्छेदके । ग्राह्यघटभेदप्रतियोगिनिष्ठप्रकारतावच्छेदकांशे तत्प्रतियोगितावच्छेदकांशे वा । घटत्वाद्यंशे निष्प्रकारक इति । प्रकारानवच्छिन्नघटत्वादिविषयताक इत्यर्थः । तथा । निष्प्रकारकघटत्वादिविषयताकः । तथा च नासौ स घटो न वेति संशयविरोधीति भावः । अत एव । असमानाकारकनिश्चयस्य संशयाविरोधित्वादेव ।

न चैवं घटो न वेति संशये घटत्ववानयमिति निश्चयस्याप्यविरोधितया तदुत्तरं तादृशसंशयस्यापत्तिस्तस्य कोटितावच्छेदकांशे घटत्वत्वप्रकारकतया तदंशे निष्प्रकारकत्वविरहादित्यत आह । घटत्ववानिति । अवगाहमान इत्यन्तं हेतुगर्भविशेषणम् । तथा च घटान्यावृत्तित्वविशिष्टवत्तावगाहितया ग्राह्यविरोधविशिष्टवत्तानिश्चयमुद्रया घटान्योन्याभावकोटिकमुक्तसंशयं विरुणद्धि न तु प्रतियोगितावच्छेदकप्रकारकज्ञानविधयेत्यर्थः । तथा च तस्य धर्मिविशेषणतापन्ने कोटीभूतघटभेदप्रतियोगितायाः स्वरूपतो ऽवच्छेदके घटत्वे इतरप्रकारकत्वेऽपि विरोधप्रतियोगितया भासमानग्राह्यघटभेदांशे संशयीयतद्विषयतातोऽविलक्षणविषयताकतया विरोधित्वमक्षतमेवेति भावः । विरोधप्रकारकज्ञानविरोधितां दृष्टान्तेन द्रढयति । पुरुषेति ।

ननु प्रमेयवानित्यादिनिश्चयस्थले विशेषणधीतत्सन्निकर्षादिसत्त्वात्कथं स घट इत्यादिनिश्चयसामग्रीविरह इत्याकाङ्क्षायामाह । घट इतीति । निश्चयमित्यत्र निश्चयत्वस्य जन्यतावच्छेदकत्वमविवक्षितम्, विशेषणान्तरानवच्छिन्नघटत्वप्रकारताशालिज्ञानत्वस्यैव तादृशघटत्वविषयिताशालिज्ञानजन्यतावच्छेदकत्वात् निर्विकल्पकं प्रकारानवच्छिन्नविषयताकमतो घट इत्यादिबुद्धेरपि तादृशबुद्ध्यन्तरजनकत्वोपपत्तिः । एतादृशविशिष्टबुद्धिविशेषणज्ञानविशेषयोः कार्यकारणभावे मानमाह । जातित्वेति । तदनुदयात् । घट इत्याकारकविशिष्टबुद्ध्यनुदयात् ।

न च घटत्वांशे सप्रकारकत्वप्रयोजकसामग्र्यभावस्तदंशे निष्प्रकारकत्वप्रयोजकः तत्प्रयोजकाभावस्य तदभावप्रयोजकत्वादिति जातित्वाद्युपस्थितिदशायां घटत्वांशे तत्प्रकारकत्वप्रयोजकसामग्रीसत्त्वान्न तदंशे निष्प्रकारकस्य घट इति ज्ञानस्यापत्तिरिति वाच्यम् । जातित्वादिरूपेण घटत्वोपस्थितिघटितसामग्रीदशायाम-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पि कदाचिज्जातिमान् घट इति ज्ञानोत्पत्त्या घटत्वांशे सप्रकारकत्वप्रयोजकसामग्र्यभावस्यानवच्छिन्नघटत्वविषयत्वाप्रयोजकतया प्रमेयत्वादिसामान्यलक्षणयापि प्रमेयः स घट इत्याकारकार्निश्चयसम्भवस्य दुर्वारत्वात् तादृशकार्यकारणभावानभ्युपगमे जातित्वाद्युपस्थितिकालीनतदवच्छिन्नघटत्वादिविशिष्टज्ञाने विशेषणानवच्छिन्नघटत्वादिप्रकारताविरहप्रयोजकस्य दुर्लभतया जातिमानित्याकारकधियो नियमतो जातिमान्घट इत्याकारकतापत्तेश्च ।

न च घटत्वादेः स्वरूपतः प्रकारता क्वचिज्ज्ञाने समवायेनैव क्वचिच्च कालिकादिनैवेत्यत्र न स्वरूपतस्तज्ज्ञानं नियामकं तादृशप्रयोजकस्य साधारण्यात् अतो अननुगतमेव तन्नियामकं वाच्यं तथा च तावतैव तादृशप्रकारतासामान्यनियमोऽप्युपपद्यते विशेषप्रयोजकसामग्र्याः सामान्यप्रयोजकत्वात् तादृशसामग्र्यभावकूटस्यैव सामान्यविरहप्रयोजकत्वादिति वाच्यम् । यत्र सामान्यकार्येऽनतिप्रसक्तसामान्यकारणविरहस्तत्रैवागत्या विशेषसामग्रीविरहकूटस्य सामान्यकार्याद्यभावप्रयोजकत्वात् । एवं च विशेषणज्ञानस्य सामान्यकारणस्य सम्भवेनानन्तानामननुगतविशेषप्रयोजकाभावानां निरुक्तप्रकारताद्विविरहप्रयोजकताया गौरवेणानभ्युपगमात् ।

न चोक्तकार्यकारणभावोपगमे जातित्वाद्युपस्थितिकालीनलौकिकसन्निकर्षात् जातित्वादिनैव घटत्वादिज्ञानस्य प्रथमं जनने निर्विकल्पकासम्भवाच्चिरनिरीक्ष्यमाणस्यापि घट इति प्रत्यक्षानुपपत्तिरिति वाच्यम् । तत्रापि फलानुरोधेन निर्विकल्पकोपगमात् जातित्वादिविशिष्टज्ञानेऽपि क्वचिन्निर्विकल्पकविषयताभ्युपगमे बाधकविरहात् ।

एतेन विशेषणान्तरविशिष्टविशेषणकबुद्धिसामान्यं प्रति विशेषणज्ञानसामान्यहेतुतायाः पूर्वं निराकृतत्वेन निर्विकल्पकबुद्धौ मानाभाव इति पूर्वपक्षोऽपि निरस्तः । एतादृशकार्यकारणभावानुरोधेनैव निर्विकल्पकोपगमस्यावश्यकत्वात् ।

न च घटत्वादिव्यञ्जकविलक्षणसन्निकर्षाद्यधीनघटत्वादिविशिष्टबुद्धौ नियमत एव घटत्वादेः स्वरूपतः प्रकारत्वमानुभविकमित्युपनीतभान एव स्वरूपतो घटत्वादिज्ञानस्य प्रत्यासत्ति-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तया हेतुत्वमुपेयते न तु लौकिकप्रत्यक्षेऽपीति न निर्विकल्पकसिद्धिरिति वाच्यम् । लाघवेन लौकिकालौकिकसाधारणस्य विशेषणानवच्छिन्नतद्धर्मविशिष्टबुद्धित्वस्य विशेषणानवच्छिन्नविशेषणज्ञानजन्यतावच्छेदकत्वोपगमात् गोत्वादिनिर्विकल्पकदशायां च जातित्वादिविशिष्टगोत्वाद्युपनीतभाने गोत्वादेः स्वरूपतः प्रकारत्वमिष्टमेव निर्विकल्पकोपलायकतावादिनां मतेन तद्वारणाय स्वरूपतो गोत्वाद्युपनीतभाने स्वरूपतस्तत्प्रकारकधियो हेतुत्वान्तरस्यावश्यकत्वे किं लौकिकालौकिकसाधारणविशिष्टबुद्धौ विशेषणज्ञानहेतुतयेति पूर्वपक्षानवकाश इत्यलमधिकेन ।

ननु लौकिकसन्निकर्षादिव सामान्यलक्षणातोऽपि निर्विकल्पकसम्भवेन दुष्परिहरमेव सार्वज्ञ्यमित्यत आह । सामान्येति । सामान्यप्रकारकज्ञानजनकत्वनियमात् । सामान्यधर्मावच्छिन्नविषयतामात्रप्रयोजकत्वात् । तादृशविषयताया एव तज्जन्यतावच्छेदकत्वादिति भावः ।

ननु सामान्याश्रये धर्मिणि सामान्यधर्मविशिष्टज्ञानसामग्र्यसत्त्वे सामान्यधर्मानवच्छिन्नविषयताशालिप्रत्यक्षमपि सामान्यप्रत्यासत्तितोऽगत्या स्वीकरणीयं तत्कुतस्तादृश्येव विषयता तज्जन्यतावच्छेदिकेत्यत आह । विशिष्टेति । सामान्यज्ञानस्यैव प्रत्यासत्तितया सामान्यजप्रत्यक्षपूर्वं धर्मिणि विशेषणज्ञानादिघटितसामान्यविशिष्टबुद्धिसामग्रीसत्त्वादित्यर्थः ।

यद्यपि प्रमेयत्वादिसामान्यप्रत्यासत्त्युपस्थापितघटत्वादेः स्वरूपतो विशिष्टबुद्ध्युपगमेऽपि यदा तस्य परकीयज्ञानविषयत्वादिरूपतत्त्वादिविशिष्टबुद्धिरुत्पद्यते तदैव घटान्यत्वादेरपि तत्र भानं सम्भवति निश्चयस्य प्रागसत्त्वात् तुल्यबलविरोधिभासकसामग्र्याश्चाप्रतिबन्धकत्वादिति संशयोपपत्त्या उक्तप्रयासो निष्फलः । तथापि यत्र पूर्वं घटान्यत्वमनुपस्थितं प्रमेयवानिति ज्ञानानन्तरमेव तदुपस्थितिस्तत्र स्वरूपतस्तद्विशिष्टबुद्धौ स्वरूपतस्तज्ज्ञानानपेक्षायां स घट इति निश्चयस्य प्राक् सम्भवेन तादृशनिश्चयेऽप्रामाण्यशङ्कामन्तरेणाप्यानुभविकस्य स घटो न वेति संशयस्यानुपपत्त्या सामान्यलक्षणातः सर्वज्ञादीनामिवास्मदादीनां स्वरूपतो निखिलजातिप्रकारिकाया आनुभविकधियोऽप्यापत्त्या

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तत्र तदपेक्षा तदवस्थेत्यवधेयम् ॥

गिरीन्द्रदुहितुर्नमत्सुरवरावतंसीभव-
त्पदाम्बुजरजःकृपाकलिततीक्ष्णधीसम्पदाम् ।
गदाधरविनिर्मिता विषमतर्कदुर्गाटवी
नवीनपदवीमुदं वितनुतां सतां धीमताम् ॥

इति श्रीयुतगदाधरभट्टाचार्यचक्रवर्त्तिविरचिता सामान्यलक्षणादीधितिटिप्पणी समाप्ता ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथ उपाधिप्रकरणम् ॥

(चि०) उपाधिज्ञानाद्व्यभिचारज्ञाने सति न व्याप्तिनिश्चय इत्युपाधिर्निरूप्यते । तत्रोपाधिः साध्यत्वाभिमतव्यापकत्वे सति साधनत्वाभिमताव्यापकः । अनौपाधिकत्वज्ञानं च न व्याप्तिज्ञाने हेतुः, अतो व्यापकत्वादिज्ञाने नान्योन्याश्रयः । यद्वा व्यापकत्वं तद्वन्निष्ठात्यन्ताभावाप्रतियोगित्वम्, तत्प्रतियोगित्वञ्चाव्यापकत्वम् । प्रतियोगित्वं च तदधिकरणानधिकरणत्वमिति वदन्ति तन्न, साधनपक्षधर्मावच्छिन्नसाध्यव्यापकोपाध्यव्याप्तेः । न च तयोरनुपाधित्वम्, दूषकताबीजसाम्यात् ।

(दी०) प्रसङ्गादुपाधिं निरूपयितुमाह उपाधीति । सोपाधौ साध्यत्वसाधनत्वे न सम्भवतोऽत अभिमतेति । यो यद्व्यापकत्वे सति यदव्यापकः स तत्रोपाधिरिति निर्गलितोऽर्थः । व्यापकत्वाव्यापकत्वे एकरूपेण विवक्षिते ।

(गा०) उपाधिज्ञानाद्व्यभिचारज्ञाने सति न व्याप्तिनिश्चय इत्यत्र मूले व्यभिचारज्ञाने सत्युपाधिज्ञानादिति योजनायां व्यभिचारज्ञानस्य हेतुज्ञानविधया उपाधिज्ञापकत्वलाभादुपाधेर्व्यभिचारव्यापकताऽर्थतो लभ्यते, तद्व्यापकतां विना तज्ज्ञानज्ञाप्यत्वानुपपत्तेः; तथासत्युपाध्यभावस्य व्यापकाभावविधया व्यभिचाराभावज्ञापकत्वलाभात् उपाधेः प्रतियोगितया तदभावज्ञानजनकज्ञानविषयतायाः स्वरसत एव लाभेन प्रकृतस्य व्यभिचाराभावरूपव्याप्तिज्ञानस्य प्रयोजकज्ञानविषयत्वरूपोपपादकत्वमुपा-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

धेर्लभ्यत इति उपोद्घातसङ्गतिप्रदर्शनपरं तादृशमूलमिति मिश्राः । तत्र न व्याप्तिनिश्चय इत्यनेनोपाधिज्ञानस्य व्याप्तिनिश्चयाभावप्रयोजकत्वकथनमनुपयुक्तमिति यथाश्रुतयोजनायां उपाधेर्व्याप्तिनिश्चयप्रतिबन्धकव्यभिचारज्ञानजनकज्ञानविषयत्वरूपव्याप्तिनिश्चयसम्बन्धलाभेन व्याप्तिग्रहोपाये सा च क्वचिदुपाधिसन्देहादित्यादिग्रन्थेन स्मृतत्वलाभात् स्मृतस्योपेक्षानर्हत्वरूपप्रसङ्गसङ्गतिप्रदर्शनपरतैव तादृशमूलस्येत्याशयेन दीधितिकृदाह । प्रसङ्गादिति ।

केचित्तु व्यभिचारज्ञाने न सतीति योजनया उपाधिरूपप्रतियोगिज्ञानादुपाध्यभावज्ञानेन तादृशव्यावर्तकधर्मदर्शनरूपप्रतिबन्धकवशाद्व्यभिचारज्ञानाभावे सति व्याप्तिनिश्चय इत्यर्थलाभात्प्रकृतव्याप्तिनिश्चयप्रयोजकत्वरूपप्रकृतोपपादकत्वलाभेनोपोद्घातप्रदर्शनपरता मूलस्येत्याहुः ।

वस्तुतश्शिष्यस्योपाधिज्ञाने तदुद्भावनेन मध्यस्थस्य व्यभिचारज्ञानं सम्पाद्य वादिसिषाधयिषितसाध्यानुमित्यौपयिकव्याप्तिनिश्चयप्रतिबन्धात् वादिविजयो भवतीत्युपाधिनिरूपणस्य प्रयोजनवत्तेति मूलाभिप्रायः । सोपाधौ साध्यत्वसाधनत्वे न सम्भवत इति । साध्यत्वं सिद्धिविषयत्वयोग्यत्वं सिद्धिविषयताप्रयोजकधर्मवत्त्वरूपम्, तादृशो धर्मो व्यापकत्वमेव, साधनत्वमपि सिद्धिजननयोग्यत्वं तज्जननौपयिकव्याप्तिपक्षधर्मत्वे इति भावः । यद्यपि परस्परनिरूपितसाध्यसाधनभावाविवक्षणे नासम्भवः, तथापि सामान्यतस्साध्यत्वसाधनत्वयोरव्यावर्त्तकतया तदीयसाध्यव्यापकत्वे सति तदव्यापकत्वं तद्धेतुकोपाधित्वम्, तदीयसाधनाव्यापकत्वे सति तद्व्यापकत्वं तत्साध्यकोपाधित्वमिति यदि विवक्ष्यते तदभिप्रायेणासम्भवप्रदर्शनम् ।

ननु धूमादिसाध्यताभिमानविषयघटादिव्यापकतामादाय तद्व्यापकधूमाद्यव्यापके वह्न्यादिसाधनत्वाभिमानविषयद्रव्यत्वाद्यव्यापकतामादाय तदव्यापकवह्न्यादिव्यापके वह्न्यादिसाध्यकधूमादिहेतुकोपाधित्वं दुर्वारम्, उपाधित्वस्य साध्यसाधनविशेषद्वयनियन्त्रितत्वानुपपत्तिश्च, विशिष्य साध्यसाधनयोर्निवेशे च अभिमानपर्यन्तानिवेशो वृथैवेत्याशयेनाभिमतत्वनिवेशोऽपि वि-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शिष्य साध्यसाधननिवेशाभिप्रायक इत्याशयेनाह । यो यदिति । यत्पदं यद्धर्मावच्छिन्नपरम् , तत्पदमपि तद्धर्मावच्छिन्नपरम् ।

अनौपाधिकत्वं यदि साध्यव्यापकानां यावतामव्याप्यत्वसम्बन्धावच्छिन्नाभावः यद्व्यापकं तद्व्यापकं तद्भिन्नप्रकृतसाध्यकत्वं वा तदा धूमादिनिष्ठार्द्रेन्धनादिनिरूपितव्याप्तिग्राहकार्द्रेन्धनादिनिरूपितानौपाधिकत्वशरीरे धूमादिनिष्ठार्द्रेन्धनादिव्याप्तेर्न निविशते किन्तु आर्द्रेन्धनादिनिष्ठा द्रव्यत्वादिव्याप्तिरेवेत्यन्योन्याश्रयानवकाशात् अनौपाधिकत्वज्ञानस्य व्याप्तिग्राहकतामनुपगम्य मूलकृतो ऽन्योन्याश्रयनिराकरणासङ्गतिरित्यतो ऽन्यादृशानौपाधिकत्वाभिप्रायेण अन्योन्याश्रयाशङ्कया मूलमवतारयति नन्वित्यादिना ।

(दी०) ननूपाधिः साध्यव्यापकत्वं साध्यनिष्ठव्याप्तिनिरूपकत्वम्, सा च यावदुपाधिव्यापकव्यापकत्वरूपानौपाधिकत्वज्ञानादेव ग्राह्या, उपाधिव्यापकयावदर्थान्तर्गतस्य चोपाधेस्साध्यव्यापकत्वग्रहश्च साध्यनिष्ठव्याप्तिग्रहात् इत्यन्योन्याश्रय इत्यत आह । अनौपाधिकत्वेति । व्यापकत्वं व्याप्तिनिरूपकत्वम्, सा चानौपाधिकत्वग्रहाद् गृहीतव्या, तत्प्रविष्टव्याप्तिज्ञानमपि अनौपाधिकत्वान्तरग्रहादित्यनवस्थेत्यत आह । अनौपाधिकत्वेति । अन्योन्याश्रयपदमनवस्थापरमिति सम्प्रदायः ।

(गा०) तत्समानाधिकरणाभावाप्रतियोगित्वरूपव्यापकताग्रहे नानौपाधिकत्वधर्मो हेतुः किन्तु व्याप्तिज्ञान एव, अत एव अनौपाधिकत्वधियो व्याप्तिग्राहकत्वाभ्युपगमेन यद्वेत्यादिमूलेन तादृशव्यापकता निरुक्ता, अतो व्याप्तिघटितव्यापकत्वमुपाधिताघटकमिति दर्शयति । साध्यव्यापकत्वं साध्यनिष्ठव्याप्तिनिरूपकत्वमिति । सा च । साध्यनिष्ठोपाधिव्याप्तिश्च । यावदुपाधिव्यापकव्यापककत्वरूपानौपाधिकत्वज्ञानादिति । सिद्धसिद्धिव्याघातवारणाय तन्निरूपितव्याप्तिग्राहकतया यावत्तद्व्यापकव्यापककत्वरूपानौपाधिकत्वस्यैवाहतत्वादिति भावः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उपाधीति । आर्द्रेन्धनादिरूपप्रकृतोपाधीत्यर्थः । उपाधेरिति । तदुपाधेरित्यर्थः। साध्यव्यापकत्वग्रहः। धूमादिनिष्ठार्द्रेन्धनादिनिरूपितव्याप्तिग्रहार्थमनौपाधिकत्वज्ञानरूपतया अपेक्षित इति पूरणीयम् । साध्यनिष्ठव्याप्तिग्रहादिति । प्रकृतसाध्यनिष्ठप्रकृतोपाधिनिरूपितव्याप्तिग्रहादित्यर्थः । तादृशव्याप्तेस्तादृशव्याप्तिनिरूपकत्वरूपप्रकृतसाध्यव्यापकत्वघटकतया विशेषणज्ञानादिविधया तज्ज्ञानस्य तादृशव्यापकत्वग्राहकत्वादिति भावः । अन्योन्याश्रयेति । धूमनिष्ठव्याप्तिज्ञानाधीनस्य यावदार्द्रेन्धनव्यापकधर्मिकधूमव्यापकताज्ञानस्य धूमनिष्ठव्याप्तिज्ञाने अपेक्षितत्वादिति भावः ।

न चार्द्रेन्धननिष्ठधूमव्यापकताग्रहे विशेषणज्ञानादिविधया अपेक्षितं यद् धूमनिष्ठव्याप्तिज्ञानं तत्र नानौपाधिकत्वज्ञानं हेतुः प्रतियोग्युपरक्तव्याप्तिज्ञाने एव तद्धेतुत्वात्, प्रतियोग्यनुपरक्तव्याप्तिज्ञानस्यापि विशेषणज्ञानादिमुद्रया व्याप्तिनिरूपकत्वग्राहकतासम्भवादिति वाच्यम् । व्याप्तेस्साध्यमनन्तर्भाव्य निर्वक्तुमशक्यतया प्रतियोग्युपरागेणैव तद्भानात् ।

व्यापकत्वमित्यादि सम्प्रदाय इत्यन्तमन्यमतम् । व्यापकत्वमित्यादिना ऽनवस्थाङ्गतया व्याप्तिघटितव्यापकताप्रदर्शनम् । अनौपाधिकत्वेति । अव्याप्यत्वसम्बन्धावच्छिन्नसाध्यव्यापकाभावरूपेत्यादिः । सम्प्रदाय इत्यनेनोदक्षरतया अस्वरसस्सूचितः ।

(दी०) अव्याप्यवृत्तीनां व्यापकत्वमुपपादयितुमाह। प्रतियोगित्वं चेति। तदधिकरणानधिकरणत्वं तदधिकरणाधिकरणत्वविरोधि यत् प्रतियोगित्वं प्रतियोगिव्यधिकरणाभावप्रतियोगित्वं तदिह गृहीतव्यम् ।प्रतियोगिव्यधिकरणत्वेनाभावो विशेषणीय इति फलितोऽर्थः। साधनेति । अनयोरसङ्करोऽग्रे प्रदर्शयिष्यते ।

(गा०) अव्याप्यवृत्तीनामिति । द्रव्यत्वादिसाध्यकसंयोगाद्युपाधीनामिति शेषः । व्यापकत्वमुपपादयितुमिति । साध्यवन्निष्ठाभावाप्रतियोगित्वमुपपादयितुमित्यर्थः । इदमुपलक्षणम्, द्रव्यं गुणादित्यादौ संयोगादीनां गुणोऽभिधेयादित्यादौ संयो-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गाभावादीनाञ्च साधनाव्यापकत्वमपि निराकर्तुमित्यपि द्रष्टव्यम् ।

ननु संयोगाभावाधिकरणगुणाद्यनधिकरणकत्वस्य संयोगे
सत्त्वात्तदधिकरणानधिकरणकत्वरूपप्रतियोगित्वनिवेशेऽपि संयो-
गस्य द्रव्यत्वादिव्यापकत्वानुपपत्तिः, गुणादिरूपसाधनाव्यापक-
तापत्तिश्च । तदधिकरणयावदनधिकरणकत्वस्य विवक्षणे च संयो-
गादेस्सत्तादिव्यापकतापत्तिः, सत्तादिसमानाधिकरणसंयोगा-
भावाधिकरणयावदन्तर्गतस्य द्रव्यस्य संयोगाधिकरणत्वेन तादृ-
शाभावाप्रतियोगित्वात् ।

अथ सत्तादिसमानाधिकरणद्रव्यत्वाद्यभावीययावदधिकर-
णानधिकरणकत्वस्य सत्त्वेन तादृशाभावाप्रतियोगित्वं दुर्घटमि-
ति चेत् ? एवमपि यावत्त्वरूपव्यापकत्वान्तरघटिततयाऽतिगौरवम्,
तदधिकरणावृत्तित्वरूपसामान्याभावविवक्षणे च द्रव्यं सत्त्वादि-
त्यादौ पृथिव्यन्यत्वविशिष्टद्रव्यत्वत्वादिना उपाधितापसङ्गः
विशिष्टद्रव्यत्वाद्यभाववति विशिष्टद्रव्यत्वादेर्द्रव्यत्वत्वादिना वृत्ते-
स्साध्यसमानाधिकरणाभावाप्रतियोगित्वाक्षतेः । सत्तादिस-
मानाधिकरणशुद्धद्रव्यत्वाद्यभाववदवृत्तित्वेन साधनाव्यापकत्व-
स्यापि सत्त्वात् ।

न च तस्य वक्ष्यमाणसिद्धान्तलक्षणाक्रान्ततया लक्ष्यत्वमेवे-
ति वाच्यम् । तत्समशीले धूमादिसाध्यकवह्न्यादिहेतुकमहानस-
त्वाद्युपाधौ एतल्लक्षणागमनेन इदानीं तादृशमहानसत्वाद्यु-
पाधेरिवोक्तस्थलीयविशिष्टद्रव्यत्वादेरपि लक्ष्यतानौचित्यात् । एवं
जातिमान्मेयत्वादित्यादौ समवायेन सत्ताद्युपाधावव्याप्तिः, उपा-
धिताघटकसम्बन्धेन वृत्तेरवश्यं विवक्षणीयतया सत्ताद्यभावाधि-
करणसामान्यादौ समवायेन वृत्तेरप्रसिद्ध्या साधनाव्यापकत्वस्य दुर्घ-
टत्वात्, इत्यतः प्रतियोगित्वं चेत्यादि मूलं न प्रतियोगित्वान-
र्वचनपरम् अपि तु स्वरूपसम्बन्धरूप एव प्रतियोगित्वेऽव्याप्य-
वृत्त्यभावीयप्रतियोगित्वव्यावर्त्तकविशेषणदानपरमित्याह । तद-
धिकरणेति । साध्यसामानाधिकरण्यविशिष्टाभावाधिकरणं य-
त्किञ्चिद्यद्विशिष्टानधिकरणं तदन्यधर्मवत्त्वं साध्यव्यापकत्वम्,
साधनसामानाधिकरण्यविशिष्टाभावाधिकरणं यत्किञ्चिद्रूपाव-
च्छिन्नानधिकरणं तद्रूपवत्त्वं साधनाव्यापकत्वमित्यभिप्रायकतया

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यथाश्रुतमूलस्यापि सङ्गतिर्बोध्या । तदधिकरणाधिकरणत्वविरोधीति । अधिकरणत्वाविरोधित्वं स्वावच्छेदकविशिष्टाधिकरणत्वग्रहप्रतिबन्धकग्रहविषयत्वम् । एवं प्रतियोगिता, विरोधित्वप्रविष्टज्ञाने विशेष्यतार्थकसप्तम्यन्ततदधिकरणपदार्थान्वयः, तत्पदमभावपरम्, तथा च तदभावाधिकरणविशेष्यकस्वावच्छेदकविशिष्टवत्ताग्रहप्रतिबन्धकप्रमाविषयीभूततदभावीयप्रतियोगित्वं इह गृहीतव्यमित्यर्थः । अनवच्छिन्नविशेषणतासंसर्गविषयकाभावज्ञानस्यैव प्रतियोगिमत्ताज्ञानप्रतिबन्धकतया तादृशसम्बन्धावगाहिन्या द्रव्ये संयोगाभावप्रमाया अप्रसिद्ध्या तत्प्रतियोगित्वमादाय न संयोगस्य द्रव्यत्वाद्यव्यापकतापत्तिः । साध्यसामानाधिकरण्योपलक्षितसंयोगाभावस्याधिकरणे अनवच्छिन्नविशेषणतासंसर्गकसंयोगाभावप्रमादिविषयत्वं तदीयप्रतियोगितायामक्षतमेवेति साध्यसामानाधिकरण्यविशिष्टाभावाधिकरणत्वमेव साध्यव्यापकतायां निवेश्यम् । एवं साधनाव्यापकत्वशरीरेऽपि साधनसामानाधिकरण्यविशिष्टाभावाधिकरणत्वं निवेश्यम्, अन्यथोक्तरीत्या साध्यव्यापकसंयोगादावतिव्याप्तिः ।

लाघवाय फलितार्थमाह । प्रतियोगीति । अत्र च साध्याधिकरणे प्रतियोगिव्यधिकरणत्वमवश्यमेव निवेश्यम् अन्यथा द्रव्यत्वादिसमानाधिकरणसंयोगाभावस्यापि गुणादौ प्रतियोगिव्यधिकरणतया उक्ताव्याप्तिवारणासम्भवात् । तथा च तादृशाभावीयत्वस्य अधिकस्य प्रतियोगित्वविशेषणत्वोपगमे मूलस्थाभावान्तव्यर्थत्वमित्याशङ्कां निराकरोति । प्रतियोगिव्यधिकरणत्वेनेति । अभाव इति । साध्यादिसमानाधिकरणाभाव इत्यर्थः । विशेषणीय इति । न तु तादृशाभावविशेषितं प्रतियोगित्वं प्रतियोगिव्यधिकरणाभावीयत्वेनेति शेषः । प्रतियोग्यनधिकरणत्वेन साध्याधिकरणं विशेषणीयमिति तु परमार्थः । उपाधिताघटकसम्बन्धसामान्ये यादृशप्रतियोगितावच्छेदकविशिष्टप्रतियोगिकत्वसाध्यवद्वृत्त्यनुयोगिकत्वोभयाभावः तादृशप्रतियोगित्वमेव प्रतियोगितान्तार्थनिष्कर्षः, तेन कालपरिमाणवान् द्रव्यत्वादित्यादौ कालिकसम्बन्धेन घटाद्युपाधेर्नासङ्ग्रहः, यथाश्रुते कालिकसम्बन्धेन प्रतियोग्यनधिकरणस्य साध्यवतोऽप्रसिद्ध्या तदसङ्ग्रहापत्तेः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ननु मित्रातनयपक्षकश्यामत्वसाध्यकमित्रातनयत्वहेतुके साधनावच्छिन्नसाध्यव्यापकशाकपाकजत्वोपाधिः पक्षधर्मावच्छिन्नसाध्यव्यापकोऽपि साधनस्यापि पक्षधर्मत्वात् । एवं वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वादित्यत्र पक्षधर्मबहिर्द्रव्यत्वावच्छिन्नसाध्यव्यापकमुद्भूतरूपवत्त्वं साधनावच्छिन्नसाध्यव्यापकमपीति मूले उभयोर्भेदेनोपादानमनुपपन्नमत आह । अनयोरिति । अनयोः । साधनपक्षधर्मावच्छिन्नसाध्यव्यापकोपाध्योः । असङ्करः । भेदः । अग्रे प्रदर्शयिष्यत इति । यत्र साधनशून्यस्य साध्यवतः काकादेः पक्षता तत्र शाकपाकजत्वादेः साधनावच्छिन्नसाध्यं प्रति व्यापकता न पक्षधर्मावच्छिन्नं प्रति, यत्र पक्षधर्मशून्ये साध्यवत्यपि साधनं द्रव्यत्वादिरूपं तत्र पक्षधर्मावच्छिन्नमेव साध्यं प्रत्युद्भूतरूपादेर्व्यापकता न तु साधनावच्छिन्नं प्रतीति उभयोपादानसङ्गतिरिति भावः ।

(चि०) मित्रातनयत्वेन श्यामत्वसाधने शाकपाकजत्वस्य प्रत्यक्षस्पर्शाश्रयत्वेन वायोः प्रत्यक्षत्वे साध्ये उद्भूतरूपवत्त्वस्य च शास्त्रे प्रयोजकत्वेनोपाधित्वस्वीकाराच्चेति पक्षेतरेऽतिव्याप्तिश्च । न च व्यतिरेके पर्वतेतरान्यत्वादित्यत्र इतरान्यत्वस्याप्रसिद्धिवारणार्थं पर्वतपदं विशेषणमिति व्यतिरेके व्यर्थविशेषणत्वान्न स उपाधिः, बाधोन्नीतस्याप्यनुपाधितापत्तेः । न चेष्टापत्तिः, इतरान्यत्वस्याप्रसिद्ध्या विशेषणं विना व्याप्त्यग्रहेण तत्सार्थक्यात् ।

(दी०) पक्षेतरेति । पक्ष इतरो यस्मादिति बहुव्रीहिः । भावप्रधानश्च निर्देशः । पक्षमितरयति व्यावर्तयतीति व्युत्पत्त्या तदवृत्तिधर्मवचन इत्यपि कश्चित् । तादात्म्येन धर्मिण एव व्यापकत्वमिति तु परमार्थः । अत एवाग्रे पर्वतेतरान्यत्वादि-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ति साधु सङ्गच्छते । इतरथा तु व्यापकाभावस्येव व्यापकवद्न्योन्याभावस्यापि गमकत्वमाश्रित्य सङ्गमनीयम् । व्यतिरेक इति । यद्यपि व्यापकाभावमुद्रया गमकत्वे तथा वैयर्थ्यं न दोषाय तथापि वास्तववैयर्थ्यशून्यत्वमेव विशेषणं देयमिति भावः ।

(गा०) ननु दूषकताबीजाक्रान्तत्वेऽपि शुद्धसाध्याव्यापकस्य तान्त्रिकव्यवहाराविषयतया न लक्ष्यतेत्यत आह मूले मित्रेति । प्रत्यक्षस्पर्शाश्रयत्वेनेति ।

न च प्रत्यक्षस्पर्शाश्रयत्वहेतुकस्योद्भूतरूपोपाधेस्साधनावच्छिन्नसाध्यं प्रत्यपि व्यापकतया द्रव्यत्वादिहेतुकतादृशोपाधेरेव पक्षधर्मावच्छिन्नसाध्यव्यापकत्वोपपादनं दीधितिकृत्सम्मतम् अतस्तन्मते तस्य लक्ष्यतासम्पादनं विरुध्यत इति वाच्यम् । अव्याप्त्यभिधानस्य प्रत्येकावच्छिन्नसाध्यव्यापकोपाधिपरतावत् उभयावच्छिन्नसाध्यव्यापकोपाधिपरताप्यावश्यकी तत्राव्याप्त्यप्रदर्शने न्यूनतापत्तेः, अतस्तस्यापि लक्ष्यतासम्पादनौचित्यात् । उभयावच्छिन्नसाध्यव्यापकोपाधेस्साध्यप्रयोजकतया उपाधित्वव्यवस्थापने प्रत्येकावच्छिन्नसाध्यव्यापकस्य तथात्वेनोपाधितायाः व्यवस्थापितप्रायतया तदव्यवस्थापनाधीनन्यूनताया अयोगाच्च ।

मिश्रैस्तु ज्ञानगर्भमादाय उभयोपादानमुपपादितम्, तन्मते साधनावच्छिन्नमेव पक्षधर्मावच्छिन्नमेव वा साध्यं प्रति गृहीतव्यापकत्वकस्य शाकपाकजत्वोद्भूतरूपाद्युपाधेः शुद्धसाध्यव्यापकताघटितनिरुक्तोपाधित्वज्ञानाविषयत्वादिति साधनपक्षधर्मावच्छिन्नसाध्यव्यापकोपाध्यव्याप्तिरिति मूलार्थः । तयोरनुपाधित्वमिति च तादृशतादृशसाध्यं प्रत्येव व्यापकत्वेन ज्ञातयोरनुमित्यविरोधित्वं उपाधिव्यवहाराविषयत्वं चेत्यर्थकम् । तयोरिति द्विवचनं नीलघटयोरभेद इत्यत्रेव प्रकृत्यर्थतावच्छेदकभेदात् । तथा च तत्र निरुक्तोपाधित्वाग्रहेऽपि न क्षतिरिति भावः । तादृशसाध्यव्यापकताग्रहदशायामपि व्यभिचाराद्युन्नायकत्वस्य च शास्त्रज्ञोपाधिव्यवहारस्य सत्त्वादिति दूषकतेत्यादेरर्थः । पक्षेतर इति मूले अतिव्या·

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सिपदं अनुमानमात्रोच्छेदकज्ञानातिव्याप्तिपरम्, इदानीं चायमाशयो न स्फुट इत्यग्रे शङ्कोत्तराभ्यां स्फुटयिष्यते ।

पक्षेतर इत्यत्र सर्वनामकार्यस्मिन्नादेशाभावमुपपादयति दीधितौ पक्ष इतर इति । बहुव्रीहिरिति । तथाच न बहुव्रीहावित्यनेन सर्वनामत्वनिषेध इति भावः । पक्षेतरस्य पर्वतत्वादेः पक्षे सत्त्वया साधनव्यापकत्वेन नातिव्याप्तिरिति शङ्कां निराकरोति । भावप्रधानश्चेति । प्राधान्येन पक्षनिष्ठभेदप्रतियोगित्वरूपबहुव्रीहिलभ्यतावच्छेदकधर्मपर इत्यर्थः ।

मिश्रास्तु पक्षभेदरूपभावपरतयैव प्रकृते सर्वनामकार्याभावः अर्थविशेषपरस्यैव सर्वादेः सर्वनामत्वात्, अन्यथार्थान्तरसङ्केतितसर्वादिपदेऽपि तत्कार्यापत्तिरित्याहुः । तन्न शोभनम् । संज्ञायां सर्वनामत्वनिषेधानुशासनेन तत्कार्याभावात्, लक्षणया भावप्रधानत्वे सर्वनामकार्यस्य दुर्वारत्वात् । सज्ञायां निषेधादाधुनिकसङ्केतसहकारेण अर्थबोधस्थले तादृशसङ्केतमूललक्षणास्थलेऽपि सङ्केतस्य लक्षणाघटकस्य सहकारितास्त्येवेति तत्कार्याभावः ।

यद्यपि दीधितिकारव्याख्यायामपि इतरपदस्य लक्षणया भेदार्थकत्वे भेदप्रतियोगित्वार्थकत्वे च उक्तबहुव्रीह्यर्थपरित्यागाद्बहुव्रीह्यनुपपत्त्या असङ्गतिः । तथापि अनेनैवाशयेन भावप्रधाननिर्देशमुपेक्ष्य तादात्म्यसम्बन्धेन धर्मिण उपाधित्वमङ्गीकृत्य साधनाव्यापकत्वस्योपपादनीयत्वाददोषः ।

व्युत्पत्त्यन्तरेण सर्वनामकार्याभावं साधनाव्यापकत्वं च साधयतो मतमुपन्यस्यति । पक्षमिति । व्यावर्तयतीति । स्वाश्रयरूपपक्षे भासमानभेदप्रतियोगितया ज्ञापयतीत्यर्थः । तदवृत्तीति । पक्षावृत्तीत्यर्थः । कश्चिदित्यस्वरससूचनाय । तद्बीजं तु पर्वतेतरान्यत्वादित्यग्रिमग्रन्थे पर्वतेतरपदस्योक्तव्युत्पत्त्या पर्वतावृत्तिधर्मार्थकत्वेऽपि तदन्यत्वस्याश्रयत्वरूपोपाधिताघटकसम्बन्धावच्छिन्नोपाध्यभावानात्मकतया तेन सम्बन्धेन तदन्यत्वानात्मकतया च तद्ग्रन्थासङ्गतिः । धर्मिण एवेति । पक्षनिष्ठभेदप्रतियोगिन एवेत्यर्थः । व्यापकत्वम् । साध्यव्यापकत्वम् । तथा च येन सम्बन्धेन साध्यव्यापकता तेनैव सम्बन्धेन साधनाव्यापकत्वमपि तस्याक्षतमिति भावः । अत एव । तादात्म्यसम्बन्धेन धर्मिण उपाधित्वस्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अभिप्रेतत्वादेव । साधु सङ्गच्छत इति । पर्वतेतरान्यत्वस्य उपाधितावच्छेदकसम्बन्धावच्छिन्नोपाधिव्यतिरेकरूपतया साध्याभावानुमाने तस्य हेतुताप्रदर्शनौचित्यादिति भावः । भावप्रधाननिर्देशपक्षेऽपि तादृशहेतुप्रदर्शनं कथञ्चित्सङ्गमयति । इतरथा त्विति । गमकत्वमाश्रित्येति । गमकतायां विशेषणवैयर्थ्यस्यानुपाधितावीजत्वपरतामाश्रित्येत्यर्थः । व्यतिरेके व्यर्थविशेषणत्वादिति मूलम्, पक्षेतरान्यत्वस्य साध्याभावव्याप्यतानवच्छेदकपक्षरूपविशेषणघटितत्वादित्यर्थः। अप्रसिद्धिवारकस्यापि व्यभिचाराधारकतया व्याप्यतावच्छेदकाघटकत्वमित्यभिमानः । अप्रसिद्ध्या पक्षाघटितस्य इतरान्यत्वत्वस्य तद्व्याप्यतावच्छेदकत्वासम्भवात् व्याप्यतावच्छेदकधर्मान्तराघटितत्वेन पक्षेतरान्यत्वत्वस्य व्याप्यतावच्छेदकत्वमावश्यकमित्यग्रे वक्ष्यते ।

पक्षेतरव्यतिरेकस्य व्यर्थविशेषणघटिततया साध्याभावासाधकत्वात् तत्र साध्यव्यापकताघटितोपाधित्वग्रहे नानुमानमात्रोच्छेद इति मूलाशयमाक्षिपति दीधितौ । यद्यपीति । व्यापकाभावमुद्रयेति । व्यापकतया गृह्यमाणस्याभावमुद्रयेत्यर्थः । गमकत्वे । साध्याभावानुमापकत्वे । तथा । वैयर्थ्यम् । स्वघटितस्य व्याप्यतानवच्छेदकत्वप्रयोजकत्वरूपविशेषणस्य वैयर्थ्यम् । न दोषाय । न साध्याभावानुमापकताव्याघाताय । उपाध्यभावे अन्वयव्याप्तिग्रहस्यानपेक्षितत्वादिति भावः ।

आशयान्तरवर्णनेन मूलं सङ्गमयति । तथापीति । वास्तवेति । साध्याभावानुमापकताविरोधिविशेषणानवच्छिन्नेत्यर्थः । वैयर्थ्यशून्यत्वम् । साध्याभावनिरूपितस्वाभावनिष्ठव्याप्यतावच्छेदकाघटकविशेषणाघटितत्वम् । विशेषणमिति । उपाधितावच्छेदकस्येत्यादिः । साध्याभावव्याप्यतानवच्छेदकस्वावच्छिन्नाभावत्वकं यत्साध्यव्यापकतावच्छेदकं तदन्यत्वेन धर्मो विशेषणीय इति फलितार्थः । भेदप्रतियोगिनि विशेष्यदलप्रवेशात् न साध्यव्यापकत्वे सतीत्यस्य वैयर्थ्यम् । विशेषणान्तरमप्रवेश्यैव पक्षेतरे ज्ञानातिव्याप्तिं वारयतः प्रगल्भस्य मतमुपन्यस्यति । यत्त्विति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(दी०) यत्तु ययोर्व्यतिरेकव्याप्तिस्तयोरेव व्याप्यवृत्तिव्यतिरेकिणोरन्वयव्याप्तिरिति नियमः । इह तु व्यर्थविशेषणतया व्यतिरेके व्याप्त्यभावादन्वयेऽपि न तथा अतः साध्याव्यापकत्वान्नायमुपाधिरिति भाव इति तन्न । अहेतुकत्वशरीराहेतुकत्वयोर्व्यभिचारात्, एवमपि संयोगादौ केवलान्वयिनि च साध्ये पक्षेतरातिव्याप्तितादवस्थ्याच्च ।

(गा०) ययोर्व्यतिरेके व्याप्तिरिति । यद्व्यतिरेके यद्व्यतिरेकनिरूपितव्याप्तिरित्यर्थः । तयोरेवेति । तस्यैव व्याप्यवृत्तिव्यतिरेकिणो व्याप्यवृत्तिव्यतिरेकितद्व्यापकत्वमिति नियम इत्यर्थः । अन्ययोगव्यवच्छेदार्थकैवकारबलाद्व्याप्यवृत्तिव्यतिरेकिनिष्ठतादृशधर्मनिरूपितव्यापकत्वस्य तयोर्व्यतिरेकव्याप्तिव्याप्यत्वलाभः, वह्निमान् यस्स एव धूमवानित्यादौ धूमादेर्वह्न्यादिनिरूपितव्याप्यत्वलाभवत् । यद्योगप्राथम्यसत्त्वेऽपि यत्पदस्य द्विरुक्तिं विना क्वचित्सामानाधिकरण्यसाकाङ्क्षबोधात् ययोर्व्याप्यवृत्तिव्यतिरेकिणोरन्वये व्याप्तिस्तयोर्व्यतिरेकव्याप्तिरित्यभिधाने ऽन्वयव्याप्तौ व्यतिरेकव्याप्तिव्याप्यताया झटिति लाभो न सम्भवतीति एवकारमन्तर्भाव्य वैपरीत्येन लेखनं ययोर्ययोर्व्याप्यवृत्तिव्यतिरेकिणोरित्याद्यनभिधानबीजम् । अशोकवनिकान्यायेन अवश्यं व्यतिरेकव्याप्तेरभावेनान्वयव्याप्तेरभावसाधनस्य वक्ष्यमाणतया व्यतिरेकव्याप्तिव्यतिरेके अन्वयव्याप्तिव्यतिरेकावश्यम्भावप्रदर्शनेन तत्साधने झटिति कथन्तानिवृत्तिरित्याशयेन एवकारघटितोक्तवाक्येन तत्प्रदर्शनम् । यद्योगेन प्रथमतो व्याप्यभूतान्वयव्याप्त्यभिधाने तन्निरूपकविशेषणव्याप्यवृत्तिव्यतिरेकित्वविशिष्टयोर्व्यतिरेकव्याप्तिनिरूपकयोस्तत्पदेन लाभस्स्यात्. तत्र च तादृशविशेषणमविवक्षितम्, वैयर्थ्यादिति वैपरीत्येन लेखनम् । यत्पदोत्तरतत्पदस्य यत्पदार्थमात्रपरामर्शकत्वादुक्तविशेषणस्य च यत्पदानुपस्थाप्यतया तद्विशिष्टस्य तत्परामर्शनीयत्वासम्भवेऽपि प्रथमं अन्वयव्याप्त्यभिधाने तयोरित्यत्र व्याप्यवृत्तिव्यतिरेकीत्यस्य अनुषङ्गाभिमानेन तत्पदार्थे उक्तविशेषणप्रवेशः शक्येतेति प्रथमं तदनभिधान-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बीजमिति केचित्।

यद्यपि व्यतिरेकनिष्ठव्याप्तेः वैयधिकरण्येनान्वयव्याप्तिव्यापकत्वं न सम्भवति तथापि तद्व्यतिरेकव्याप्यव्यतिरेकप्रतियोगित्वस्य तद्व्यापकता बोध्या, तयोरेवेत्यनेन तत्पदोपस्थाप्यव्याप्तिनिरूपकव्यतिरेकप्रतियोगिभिन्ने अन्वयव्याप्तिव्यतिरेकप्रत्यायनात्, उक्तशब्देन व्यतिरेकप्रतियोगिताया एव नियमबोधनात्।

यद्यपि पर्वतादिभेदाभावस्य तत्त्वेनैव व्याप्यता न सम्भवति पर्वतादिरूपाप्रसिद्धिमात्रवारकविशेषणघटितत्वात्, पर्वतत्वादिरूपेण व्याप्यत्वं चाव्याहतमेवेति व्यतिरेकव्याप्त्यभावेन पक्षेतरत्वसाध्ययोरन्वयव्याप्तिविरहसाधनं न सम्भवति स्वरूपासिद्धेः, मेयत्वाभावत्त्वादिना पर्वतभेदादेरपि वह्न्यादिव्यापकताया निर्विवादतया तदभावसाधने बाधश्च। तथाप्युपाधितावच्छेदकत्वाभिमतपर्वतभेदत्वादौ वह्न्याद्यभावव्याप्यतावच्छेदकस्वावच्छिन्नाभाववत्त्वकत्वविरहेण वह्न्यादिव्यापकतावच्छेदकत्वाभावसाधनौपयिको यो धर्मः व्याप्यवृत्तिव्यतिरेकप्रतियोगितावच्छेदकत्वे सति तादृशप्रतियोगितावच्छेदकयद्धर्मावच्छिन्नव्यापकतावच्छेदकस्सोऽवश्यं तद्धर्मावच्छिन्नाभावव्याप्यतावच्छेदकस्वावच्छिन्नाभाववत्त्वक इत्येव पर्यवसितो नियमः। द्रव्यत्वादिव्यापकतावच्छेदकवाच्यत्वत्वादौ स्वावच्छिन्नाभावाप्रसिद्ध्या द्रव्यत्वाद्यभावव्याप्यतावच्छेदकस्वावच्छिन्नाभाववत्त्वकत्वासम्भवात् व्यभिचार इति व्यापकतावच्छेदक व्यतिरेकप्रतियोगितावच्छेदकत्वं विशेषणम्। प्रतियोगिता व्यापकताघटकसम्बन्धावच्छिन्ना ग्राह्या अन्यथा वाच्यत्वत्वादेरपि भेदादिप्रतियोगितावच्छेदकतया व्यावृत्त्ययोगात्। अव्याप्यवृत्तिव्यतिरेकप्रतियोगितावच्छेदके द्रव्यत्वादिव्यापकतावच्छेदकसंयोगत्वादौ द्रव्यत्वाद्यभावव्यभिचारितावच्छेदकस्वावच्छिन्नाभाववत्त्वके व्यभिचारवारणाय व्यतिरेके व्याप्यवृत्तित्वं विशेषणम्। व्याप्यवृत्तित्वं च अवच्छिन्नवृत्तिकान्यत्वे सति वृत्तिमत्त्वं न त्वनवच्छिन्नवृत्तिकत्वम्, संयोगाभावादेरपि गुणादावनवच्छिन्नवृत्तिकतया तदव्यवच्छेदात् वृत्तिमत्त्वविशेषणात् प्रतियोगिरूपाभावप्रतियोगितावच्छेदके द्रव्यत्वव्यापकतावच्छेदकगगनाभावत्वा-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दौ द्रव्यत्वाद्यभावव्याप्यतानवच्छेदकस्यावच्छिन्नाभावत्वके न व्यभिचारः । द्रव्यं विशिष्टसत्तावद् गुणादित्यादौ द्रव्यादिभेदे विशिष्टसत्तात्वेोपलक्षितसत्ताव्यापकताविरहसाधनमनुपयुक्तम्, साध्यतावच्छेदकविशिष्टनिरूपितव्यापकताया एव उपाधिताघटकत्वादिति विशिष्टसाध्यव्यापकताविरहसाधनाय व्याप्यदिशि यद्धर्मावच्छिन्नेति । तादृशधर्मे व्याप्यवृत्तिव्यतिरेकप्रतियोगितावच्छेदकत्वस्य विशेषणात् संयोगत्वावच्छिन्नव्यापकतावच्छेदकद्रव्यत्वत्वादौ अभावत्वस्यैव केवलान्वयिसंयोगाद्यभावव्याप्यतावच्छेदकत्वसम्भवेन द्रव्यत्वाद्यभावत्वस्य तद्व्याप्यतानवच्छेदकत्वेऽपि न व्यभिचारः, संयोगत्वादेः व्यतिरेकप्रतियोगितावच्छेदकत्वेऽपि व्याप्यवृत्तिव्यतिरेकप्रतियोगितानवच्छेदकत्वात् ।

न च व्याप्यवृत्तितावच्छेदकत्वमेव विशेषणमस्तु, तावतैवोक्तव्यभिचारवारणसम्भवात्, व्यतिरेकप्रतियोगितावच्छेदकत्वस्य वैयर्थ्यम्, केवलान्वयितावच्छेदकधर्मावच्छिन्नव्यापकतावच्छेदकस्य व्यतिरेकप्रतियोगितावच्छेदकधर्मस्य अप्रसिद्ध्या वाच्यत्वत्वादिरूपव्याप्यतावच्छेदकधर्ममादाय व्यभिचाराप्रसक्तेरिति वाच्यम् । व्याप्यवृत्तित्वस्य व्याप्यतावच्छेदकप्रविष्टव्यतिरेक एव विशेषणतया व्याप्यवृत्तितावच्छेदकत्वस्य व्याप्यतावच्छेदकविशेषणतया यथासन्निवेशे अवैयर्थ्यात् । व्यर्थविशेषणाघटितकम्बुग्रीवादिमत्त्वरूपधर्मावच्छिन्नव्यापकतावच्छेदकघटत्वादौ तदवच्छिन्नाभावाप्रसिद्ध्या असम्भवस्तदवच्छिन्नाभावव्याप्यतावच्छेदकस्यावच्छिन्नाभावत्वकत्वे व्यभिचारवारकत्वाच्च ।

केचित्तु व्याप्यवृत्तिव्यतिरेकिणोरित्यत्र द्वन्द्वाश्रयणात् व्याप्ये व्याप्यवृत्तित्वमात्रस्य व्यापके च व्यतिरेकित्वमात्रस्य विशेषणत्वम् । न च व्यापके व्याप्यवृत्तित्वाविशेषणे पूर्वोपदर्शितव्यभिचारो दुर्वारः । प्रतियोगिवैयधिकरण्यघटितव्यापकताया एव व्याप्यत्वोपगमात्, संयोगादौ च द्रव्यत्वादिनिरूपितायास्तादृशव्यापकताया असत्त्वात्, व्यतिरेकिनिष्ठायाः केवलान्वयिव्यापकताया अप्रसिद्ध्या व्यापके व्यतिरेकित्वविशेषणादेव व्यतिरेकनिरूपितव्यापकताया व्याप्यत्वपर्यवसानात्, केवलान्वयिनिरूपितव्यापकतायां व्यतिरेकव्याप्तिव्याप्यत्वासम्भवेऽपि अविरोधात् । वक्ष्यमाणस्य केवलान्वयिसा-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ध्यकपक्षेतरत्वातिप्रसङ्गस्य व्याप्ये व्यतिरेकित्वविशेषणं विनापि सङ्गतिः ।

न च प्रतियोगिवैयधिकरण्यघटितव्यापकताया एव उपाधित्वघटकतया तस्या व्याप्यत्वमन्तरेण पक्षेतरातिप्रसङ्गस्य दुर्वारत्वाद्व्यापकेऽपि व्याप्यवृत्तित्वविशेषणस्यावश्यकत्वमिति वाच्यम् । व्याप्यवृत्तौ पक्षेतरत्वे प्रतियोगिवैयधिकरण्याघटितव्यापकत्वाभावसिद्धौ व्याप्यवृत्तित्वविशिष्टतदभावेन प्रतियोगिवैयधिकरण्यघटितव्यापकताया अभावस्यापि सिद्धिसम्भवात् । अव्याप्यवृत्तावेव प्रतियोगिवैयधिकरण्याघटितव्यापकताविरहेणैतद्घटितव्यापकतायाः क्वचित्सत्त्वेन व्यभिचारात् । व्याप्यवृत्तित्वाविशेषिततद्घटितव्यापकत्वाभावेनैव तद्घटितव्यापकत्वाभावसाधनायोगादिति वदन्ति । तदयुक्तम् । तथाहि तदवच्छिन्नसामानाधिकरण्यरूपतद्धर्मावच्छिन्नव्याप्तिनिरूपकत्वरूपसाध्यतावच्छेदकावच्छिन्नव्यापकत्वमेवोपाधिघटकतया मूलाभिप्रेतमित्याशयेनैव प्रगल्भानां पक्षेतरातिव्याप्तिवारणसङ्गमनम्, अन्यथा पर्वतभेदादौ द्रव्यभेदादिसमानाधिकरणाभावाप्रतियोगित्वरूपतद्व्यापकत्ववति पर्वतादिविशेषणवैयर्थ्याद्व्यतिरेकव्याप्तिविरहेण व्यभिचाराद्व्यतिरेकव्याप्तिविरहेण तत्समानाधिकरणात्यन्ताभावाप्रतियोगित्वरूपव्यापकत्वाभावसाधनासम्भवात् । पर्वतभेदादौ द्रव्यभेदादिमन्निष्ठात्यन्ताभावाप्रतियोगित्वसत्त्वेऽपि गौरवात् व्यर्थविशेषणघटितधर्मस्य साध्यसामानाधिकरण्यनिरूपितस्वरूपसम्बन्धरूपावच्छेदकत्वाभाववदुक्तव्याप्त्यनुरोधेन द्रव्यभेदत्वादौ तादृशपर्वतभेदादिसामानाधिकरण्यावच्छेदकत्वाभावोपगमेन दर्शितव्यभिचाररूपदोषस्योक्तव्यापकत्वाभावसाधने नावकाशः । तथा च संयोगादौ द्रव्यादिनिष्ठाभावप्रतियोगित्वसत्त्वेऽपि द्रव्यत्वत्वादेस्संयोगादिसामानाधिकरण्यावच्छेदकतया द्रव्यत्वत्वावच्छिन्नव्यापकत्वमक्षतमेवेति व्यापकेऽपि तद्विशेषणमर्थवत् ।

न चैवं व्यर्थविशेषणतया यत्र शरीराहेतुकत्वाभावस्तत्राहेतुकत्वाभाव इति व्यतिरेकव्याप्त्यसम्भवेऽपि उक्तव्याप्त्यनुरोधेन अहेतुकत्वे शरीराहेतुकत्वव्याप्यतावच्छेदकत्वानुपगमसम्भवादुक्तव्याप्तौ दीधितिकारवक्ष्यमाणव्यभिचारसङ्गतिरिति वाच्यम् । इदं शरीराहे-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तुकमहेतुकत्वादित्यनुमाननिर्वाहायाहेतुकत्वत्वावच्छिन्नशरीराहेतुकत्वव्याप्तेरवश्योपेयत्वात् ।

न चैवमिदं पर्वतभिन्नं द्रव्यभेदादित्यनुमानानुरोधेन द्रव्यभेदत्वाद्यवच्छिन्नेऽपि पर्वतभेदादिव्याप्त्युपगम आवश्यक इति वाच्यम् । यः पर्वतस्तद्द्रव्यमित्यादिव्यतिरेकव्याप्तित एव तादृशानुमानसम्पत्तेः । इदं शरीराहेतुकमहेतुकत्वादित्यनुमानस्य च यच्छरीरहेतुकं तत्सहेतुकमिति व्यतिरेकव्याप्तेरपि शरीरविशेषणवैयर्थ्येन असम्भवेनानिर्वाहात् । धूमादिव्यापकतावच्छेदकवह्नित्वाद्यवच्छिन्नप्रतियोगिताकाभावत्वादेः वह्नित्वाद्यवच्छिन्नाभावसाधारणधूमत्वाद्याश्रयप्रतियोगिकाभावव्याप्यतावच्छेदकत्वं न सम्भवति शुद्धस्याभावत्वस्यैव तद्व्याप्यतावच्छेदकत्वसम्भवादिति व्यभिचारः स्यात्, अतस्तदाश्रयप्रतियोगिकाभावमुपेक्ष्य तदवच्छिन्नाभावप्रवेशनम् । व्याप्यताघटकसम्बन्धावच्छिन्नत्वेनापि तदवच्छिन्नप्रतियोगिता विशेषणीया, अन्यथा ऽन्यसम्बन्धावच्छिन्नाभावसाधारणतया धूमत्वाद्यवच्छिन्नाभावत्वस्य केवलान्वयितावच्छेदकतया तदवच्छिन्ननिरूपितवह्न्याद्यभावनिष्ठव्याप्तेरभावत्वेनैवावच्छेदेन व्यभिचारात् । वह्नित्वाद्यवच्छिन्नाभावसाधारणवह्नित्वाद्याश्रयप्रतियोगिकाभावत्वस्य धूमत्वावच्छिन्नाभावव्याप्यतानवच्छेदकतया व्यभिचारवारणाय स्वाश्रयप्रतियोगिताकत्वमुपेक्ष्य स्वावच्छिन्नप्रतियोगिताकत्वनिवेशनम् । तादृशप्रतियोगिता व्यापकताघटकसम्बन्धावच्छिन्नत्वेनापि विशेषणीया, तेन समवायादिसम्बन्धावच्छिन्नवह्न्याद्यभावस्य संयोगादिसम्बन्धावच्छिन्नधूमाद्यभावव्यभिचारित्वेऽपि न व्यभिचारः ।

अथोक्तव्यभिचारवारणाय द्रव्यभेदत्वादेः पर्वतभेदादिव्याप्यतानवच्छेदकत्वे गुणो द्रव्यभिन्नो घटान्यत्वादित्यादौ पर्वतभेदादेरनुपाधितापत्तिरिति चेन्न । बाधोन्नीतपक्षेतरत्ववत्तादृशोपाधेरप्यसङ्ग्रहदोषस्य तन्मते सत्त्वेन तद्वारणासम्भवात्, उक्तविशेषणपक्षेऽपि तदावश्यकत्वात् ।

इदमत्र चिन्त्यते । उक्तव्याप्तिस्वीकारे यत्र आर्द्रेन्धनाभावस्तत्र धूमाद्यभाव इति व्याप्तिर्न सम्भवति, व्यर्थविशेषणतया यत्र धूमाद्यभावाभावस्तत्रार्द्रेन्धनाभावाभाव इति व्यतिरेकव्याप्तेरसम्भवात् तथा च यत्र धूमस्तत्रार्द्रेन्धनमिति व्याप्त्यापि प्रस्थितम्, तद्वय-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तिरेकयोर्व्याप्तिविरहादिति उपाधिमात्रोच्छेदस्स्यात् । यदि च व्यापकतावच्छेदकं यद्रूपं तदवच्छिन्नाभावत्वेन व्याप्यता न नियमे निवेश्यते अपि तु तदवच्छिन्नविरोधितावच्छेदकरूपेणैव उक्तस्थले आर्द्रेन्धनाभावव्यापकतावच्छेदकधूमाभावत्वाद्यवच्छिन्नाभावत्वेन अप्रसिद्धिवारकधूमादिविशेषणघटितेन व्याप्यताविरहेऽपि धूमाभावत्वाद्यवच्छिन्नविरोधितावच्छेदकधूमत्वादिना आर्द्रेन्धनाद्यभावाभावादिव्याप्यतासत्त्वेनोक्तनियमभङ्ग इत्युच्यते तदा तादृशानियमस्य प्रकृतानुपयोगप्रसङ्गः पर्वतभेदत्वाद्यवच्छिन्नविरोधितावच्छेदकपर्वतत्वादिनिष्ठतद्व्यक्तित्वादिना साध्याभावव्याप्यताग्रहसम्भवेन पर्वतभेदत्वादौ व्यापकतानवच्छेदकत्वसाधकहेत्वसिद्धेः पूर्वोक्ताया दुर्वारत्वादिति ।

व्यतिरेके व्याप्त्यभावात् । पक्षेतरत्वव्यतिरेकत्वावच्छिन्ने साध्याभावव्याप्त्यभावग्रहात् । अन्वयेऽपि न तथा । साध्यतावच्छेदकावच्छिन्ने पक्षेतरत्वव्याप्त्यभावग्रहः । पक्षेतरत्वाभावत्वे साध्याभावव्याप्यतानवच्छेदकत्वग्रहेण पक्षेतरत्वत्वे साध्याभावव्याप्यतानवच्छेदकत्वग्रहेण पक्षेतरत्वत्वे साध्याभावव्याप्यतावच्छेदकस्वावच्छिन्नाभावत्वकान्यत्वेन हेतुना साध्यतावच्छेदकावच्छिन्नव्याप्तिनिरूपकतानवच्छेदकत्वसाधनमिति फलितोऽर्थः । साध्याव्यापकत्वात् । पक्षेतरत्वत्वे साध्यव्यापकतावच्छेदकत्वाग्रहात् । नायमुपाधिः । नोक्तरूपावच्छिन्न उपाधिताग्रहाविषयः । उक्तनियमानवधारणस्थले चोपाधिताग्रह इष्ट एवेत्याशयः । अहेतुकत्वेति । व्यर्थविशेषणतया व्यतिरेकव्याप्त्यसत्त्वेऽपि अहेतुकत्वे शरीराहेतुकत्वव्याप्तिसत्त्वेन उक्तनियमे व्यभिचारादित्यर्थः । अभ्युपेत्याह । एवमपीति । उक्तानियमसत्त्वेऽपीत्यर्थः । संयोगादाविति । अव्याप्यवृत्तावित्यर्थः । अतिव्याप्तितादवस्थ्यादिति । साध्यव्यापकत्वाभावसाधनासम्भवेनेत्यादिः । अव्याप्यवृत्तिनिरूपितायाः केवलान्वयिनिरूपितायाश्च व्यापकतायास्तदभावव्याप्यव्यतिरेकप्रतियोगित्वाव्याप्यत्वेन तदभावाप्रसिद्ध्या च तादृशप्रतियोगित्वाभावेन तदभावसाधनस्य व्याप्तिविरहेण साधनाप्रसिद्ध्या चासम्भवादिति भावः ।

यद्यपि वाच्यत्वादौ केवलान्वयित्वनिश्चयदशायां व्यतिरेकित्व-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

घटितसाधनाव्यापकतया गृह्यमाणे पक्षेतरत्वे न वाच्यत्वादिव्यापकताग्रहसम्भवः केवलान्वयित्वेन लिङ्गेन तत्र व्यतिरेकिणो व्यभिचारानिश्चयात्, तथापि तत्र साध्ये पक्षनिष्ठाभावप्रतियोगित्वसंशयदशायां तत्रातिप्रसङ्ग इति बोध्यम् । व्याप्यवृत्तिव्यतिरेकप्रतियोगितावच्छेदकत्वे सति यो यः किञ्चिद्धर्मावच्छिन्नव्यापकतावच्छेदकः स यत्किञ्चिदभावव्याप्यतावच्छेदकस्वावच्छिन्नाभाववत्त्वक इति व्याप्तिरुपेयते तदा नायं दोषः, संयोगादिव्यापकतावच्छेदकद्रव्यत्ववत्त्वाद्यवच्छिन्नाभाववत्त्वस्य व्यर्थविशेषणतया संयोगाद्यभावव्याप्यतानवच्छेदकत्वेऽपि घटत्वाद्यभावव्याप्यतावच्छेदकतया व्याप्यदिशि व्याप्यवृत्तित्वानिवेशे क्षतिविरहात्, अव्याप्यवृत्तिव्यापकत्वाभावस्यापि व्यतिरेकव्याप्त्यभावेन साधनसम्भवात्, पक्षेतरत्वाभाववत्त्वस्य व्यर्थविशेषणतया केनचिदपि निरूपिते व्याप्यत्वे ऽवच्छेदकत्वाभावात्, वाच्यत्वाद्यभावघटितसाधनाप्रसिद्धावपि सामान्यतो व्याप्यतावच्छेदकस्वावच्छिन्नाभाववत्त्वकत्वविरहेण वाच्यत्वादिव्यापकतावच्छेदकत्वाभावसाधनासम्भवादिति ध्येयम् ।

बाधोन्नीतपक्षेतरस्योपाधित्वानभ्युपगमेऽपि न प्रतीकारः, तथा सत्यपि व्यभिचारवारकस्यैव व्याप्तिग्रहौपयिकतया ऽप्रसिद्धिवारकस्यापि विशेषणस्य व्याप्यतावच्छेदके ऽवश्यं प्रवेशादुक्तरीत्या बाधोन्नीतपक्षेतरे ऽतिव्याप्तेदुर्वारत्वादित्याह मूले न चेष्टापत्तिरित्यादिना ।

(चि०) वस्तुगत्या साध्यव्यापकः पक्षेतर उपाधिरिति चेत् ? अस्तु तथा, तथापि पक्षातिरिक्ते साध्यव्यापकताग्रहादुपाधेर्दूषकत्वम्, तच्च तत्राप्यस्ति, अन्यथा पक्षे साध्यसन्देहादनुपाधित्वे उपाधिमात्रमुच्छिद्येत । विपक्षाव्यावर्तकविशेषणशून्यत्वं विशेषणम्, तेन बाधोन्नीतपक्षेतरस्य परिग्रहः, तत्र पक्षस्यैव विपक्षत्वात्, न तु पर्वतेतरत्वादेरिति चेन्न । न हि वस्तु विपक्षव्या-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वर्तकविशेषणशून्यम्, सर्वत्र प्रमेयत्वादेरसत्त्वात्। तत्रोपात्तेति विशेषणे सिद्ध्यसिद्धिव्याघातः।

(दी०) वस्तुगत्येति। तथा च पक्षे साध्यवति तदितरत्वं साध्याव्यापकं तद्रहिते च बाधोन्नीतत्वादुपाधिरेवेति भावः। यद्विषयतया ज्ञानस्यानुमितिप्रतिबन्धकत्वं तदेव प्रकृते उपाधित्वं वाच्यं नान्यदनुपयुक्तत्वात्, तच्चेदुक्तं रूपं तदा तद्वत्तया पक्षेतरस्यापि ग्रहादनुमितिमात्रोच्छेद इत्यभिप्रायवानाह। अस्त्विति। उपाधिमात्रमिति। सत्प्रतिपक्षोन्नायकतया दूषकत्वमिति मते। इतरथा तु पक्षावृत्तेरुच्छेदो बोध्यः। विपक्षेति। विपक्षव्यावर्तकधर्मान्तरावच्छिन्नपक्षेतरत्ववारणाय निषेधद्वयगर्भता।

(गा०) पक्षेतरेऽतिव्याप्तिरिति ग्रन्थस्य ज्ञानातिव्याप्तिपरत्वेऽपि वस्त्वतिव्याप्तिपरत्वाभिमानेन मूले वस्तुगत्येत्यादिशङ्का। तत्र पर्वतो वह्निमान् धूमादित्यादौ पक्षेतरस्यालक्ष्यतया नाव्याप्तिरित्यभिप्रायप्रकाशमन्तरेण दोषोद्धारो न स्फुटीभवतीति शब्दतो लक्ष्ये बाधोन्नीतपक्षेतरत्वे वास्तवसाध्यव्यापकत्वघटितलक्षणसत्त्वमात्रलाभेऽपि एकविशेषे तादृशलक्षणसत्ताकथनादपरे तद्व्यवच्छेदलाभो व्युत्पत्तिसिद्ध इत्यर्थत औत्सर्गिकं तादृशाभिप्रायं प्रकाशयति दीधितिकृत्। तथा चेति।

अत्र स्वाभिप्रायं प्रकाशयन् उक्तातिव्याप्तिं सङ्गमयति मूले अस्तु तथेति। तथा। अलक्ष्ये पक्षेतरत्वे वस्तुतस्साध्यव्यापकताघटितलक्षणासत्त्वम्। पक्षातिरिक्ते। साध्यवत्तया निश्चिते। उपाधिव्यतिरेकाग्रहमात्रेणेति शेषः। साध्यव्यापकताग्रहादिति। साध्यसंशयविषये उपाधिव्यतिरेकग्रहस्य व्यभिचारसंशयरूपतया तस्य च व्यापकताग्रहाविरोधित्वोपगमेन तद्ग्रहसम्भवादित्यर्थः। उपाधेः। व्यभिचारहेतुकवास्तवोपाधेः। अनुमितिविरोधित्वम्। तत्रापि। पक्षेतरत्वेऽपि।

ननु पक्षेतरत्वस्य साध्यव्यापकताभ्रमकाले दूषकत्वापत्तावपि ज्ञानागर्भस्योक्तविशेषधर्मस्य घस्त्वतिव्याप्तिविरहेणेतरभेदा-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नुमापकस्वरूपलक्षणत्वं दुरुपपादमेवेत्याशङ्कां निराचिकीर्षुः अ-स्त्वित्यादेर्भावमाविष्कुरुते दीधितौ । यद्विषयतयेति । यद्विषयतया । यद्धर्मविशिष्टविषयकत्वेन । ज्ञानस्य । उपाधिताज्ञानस्य । अनुमि-तिप्रतिबन्धकत्वम् । तत्प्रतिबन्धकज्ञानसम्पादकत्वम् । तदेवोपा-धित्वम् । तान्त्रिकोपाधिव्यवहारविषयतावच्छेदकं तद्रूपमेव । प्रकृ-ते वाच्यम् । प्रकृतनिरुक्तिविषयः । अन्यत् । इतरभेदानुमापकम् । अनुपयुक्तत्वात् । अजिज्ञासितत्वात् । तच्चेदुक्तं रूपमिति । उक्तम् । साध्यव्यापकत्वे सतीत्यादिकं यदि तदनुमितिप्रतिबन्धकज्ञानवि-षयतावच्छेदकमित्यर्थः । ग्रहात् । प्रायशो ग्रहसम्भवात् । अनु-मितिमात्रोच्छेदः । स्वार्थस्थले प्रायशः परार्थस्थले सर्वत्रैवानु-मितेरुच्छेदप्रसङ्गः ।

मूले साध्यसन्देहात् । साध्यसंशयरूपव्यभिचारज्ञानात् । अनु-पाधित्वे । पक्षवृत्त्यभावप्रतियोगितया गृह्यमाणे उपाधित्वघट-कसाध्यव्यापकत्वाग्रहे ।

ननु उपाधिमात्रमुच्छिद्येत इति मूलमसङ्गतम्, पर्वतो धूमवा-न्वह्नेरित्यादौ व्यभिचारोन्नायकार्द्रेन्धनाद्युपाधौ सन्देहविषयपर्व-तादिरूपपक्षानिश्चितव्यतिरेके साध्यव्यापकताग्रहसम्भवेनोपाधि-त्वग्रहानुच्छेदादित्यत आह दीधितौ । उपाधिमात्रमितीति । सत्प्रतिपक्षोन्नायकतयेति । तथा चोपाधिमात्रस्य दूषकतोच्छेद इति मूलार्थः । उपाधिव्यवहारबीजदूषकताबीजस्य पक्षावृत्तित्व-नियतस्य तन्मते उक्तोपाधावसत्त्वेन तत्र साध्यव्यापकताग्रहस-म्भवेऽपि तत्सङ्गतिः, व्यभिचारोन्नायकतयोपाधेर्दूषकत्वेऽप्युपाधि-पदस्य तद्विशेषपरतया तत्सङ्गतिरित्याह । इतरथा त्विति । पक्षावृत्तेः । पक्षनिष्ठाभावप्रतियोगितया गृह्यमाणमात्रस्य ।

विपक्षाद्व्यावर्त्तकविशेषणशून्यत्वं विशेषणमिति मूलम् । विपक्षात् । साध्याभाववतः । स्वविशेष्यतावच्छेदकावच्छिन्नव्याव-र्त्तकं यत्तदन्यविशेषणशून्यत्वमुपाधिलक्षणे निवेशनीयमित्यर्थः । तथा च पर्वतभेदपर्वतनिष्ठभेदप्रतियोगित्वादौ नातिप्रसङ्गः, तत्र प्रविष्टस्य भेदप्रतियोगित्वादिरूपविशेष्ये पर्वतनिष्ठभेदादिरूप-विशेषणस्य ह्रदादिरूपविपक्षात् स्वविशेष्यतावच्छेदकभेदत्वप्रति-योगित्वत्वाद्यवच्छिन्नाव्यावर्त्तकत्वात्, तद्विशेषणानवच्छिन्नस्यैव स-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्विशेषणावच्छिन्नस्यापि भेदत्वाद्यवच्छिन्नस्य ह्रदादिरूपविपक्षवृत्तित्वादिति भावः। विपक्षात्स्वविशेष्यतावच्छेदकावच्छिन्नव्यावर्तकत्वं च स्वविशिष्टतद्विशेष्यतावच्छेदकावच्छिन्नाभाववद्विपक्षकत्वम्, पर्वतादिरूपविशेषणविशिष्टभेदत्वाद्यवच्छिन्नाभाववत्तया विपक्षे सत्त्वात् पर्वतादिरूपविशेषणस्य न विपक्षव्यावर्तकता।

अथैवमपि पर्वतावृत्तित्वपर्वतान्यवृत्तित्वादिविशेषणविशिष्टवह्न्यादेः पर्वतपक्षकवह्न्यादिसाध्यकोपाधितापत्तिर्दुर्वारैव, तादृशविशेषणस्य वह्नित्वाद्यवच्छिन्ने विपक्षव्यावर्त्तकत्वात्।

न च स्वप्रतियोगितावच्छेदकस्य यादृशविशेषणघटितत्वप्रयुक्तं विशिष्टाभावस्य विपक्षवृत्तित्वं तादृशत्वमेव विशेषणस्य विपक्षव्यावर्त्तकत्वम्, पर्वतावृत्तित्वादिविशेषणविशिष्टवह्न्यभावस्य विपक्षवृत्तित्वे च तादृशाभावप्रतियोगितावच्छेदकस्य वह्नित्वादिघटितत्वमेव प्रयोजकं न तु पर्वतावृत्तित्वादिविशेषणम्, वह्नित्वादिपरित्यागेन तद्विशिष्टस्य विपक्षे सत्त्वादिति वाच्यम्। प्रयुक्तत्वस्य दुर्वचत्वात्।

न च स्वविशेष्यतावच्छेदकावच्छिन्नाधिकरणीभूतविपक्षवृत्तिस्वविशिष्टतद्विशेष्यतावच्छेदकावच्छिन्नाभावकत्वमेव स्वस्य विपक्षव्यावर्त्तकत्वम्, पर्वतावृत्तित्वादिविशेष्यतावच्छेदकवह्नित्वाद्यवच्छिन्नाधिकरणत्वस्य विपक्षेऽसत्त्वात्तादृशविशेषणविशिष्टवह्नित्वाद्यवच्छिन्नाभावस्य विपक्षवृत्तित्वेऽपि न तस्य विपक्षव्यावर्त्तकतेति वाच्यम्। घटाद्यन्तरवति विपक्षे पर्वतीयघटात्यन्ताभावसत्त्वेन पर्वतभेदादावतिव्याप्तेर्वारयितुमशक्यत्वात्। प्रकृतोपाधिप्रविष्टस्य विशेष्यतावच्छेदकस्य विवक्षणे च यादृशोपाधिप्रविष्टविशेष्यतावच्छेदकं न किञ्चिद्विपक्षवृत्तितावच्छेदकं तद्विशिष्टाधिकरणविपक्षाप्रसिद्ध्या तादृशोपाधावव्याप्तिरिति चेन्न। स्वविशेष्यतावच्छेदकतद्धर्मावच्छिन्नाधिकरणविपक्षवृत्तिस्वविशिष्टतद्धर्मावच्छिन्नाभावकं यद्यस्त्वं तदन्यविशेषणविशेष्यतावच्छेदकतापन्नतद्धर्माघटितत्वेनोपाधितावच्छेदकविशिष्टस्य विशेषणीयतया सामञ्जस्यात्। उक्तरीत्या पर्वतादिविशेषणस्य घटत्वावच्छिन्ने विपक्षव्यावर्तकत्वेऽपि भेदत्वाद्यवच्छिन्ने ऽतथात्वात् भेदरूपविशेष्यतावच्छेदकावच्छिन्नस्य व्यावर्त्तकं ह्रदाद्येव, तदन्यपर्वतरूपविशेषणविशेष्यतावच्छेदकतापन्नभेदत्वादिघटिते पर्वतभेदादौ नातिव्याप्तिः। वह्न्यादि-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विशिष्टपर्वतभेदाद्यभावस्य विपक्षवृत्तितया भेदत्वाद्यवच्छिन्ने पर्वतादेर्विशेषणस्य विपक्षव्यावर्त्तकत्वं नाशङ्कनीयम्, स्वविशिष्टत-द्धर्मावच्छिन्नाभाव इत्यनेन स्वविशिष्टतद्धर्मपर्याप्तप्रतियोगितावच्छेदकताकाभावस्य विवक्षणीयत्वात् । आर्द्रत्वादिविशेषणस्य इन्धनत्वादिरूपविशेष्यतावच्छेदकावच्छिन्ने विपक्षाव्यावर्त्तकत्वाभावात् तादृशविशेषणविशेष्यतावच्छेदकेन्धनत्वादिघटिते आर्द्रेन्धनाद्युपाधौ लक्षणसमन्वयः ।

न चैवं धूमवान्वह्नेरित्यादौ धूमवद्भेदाभावस्य अनुपाधिताप्रसङ्गः, भेदत्वाद्यवच्छिन्नविशेषणतया तद्घटकस्य धूमवदादिविशेषणस्य भेदत्वादिरूपविशेष्यतावच्छेदकावच्छिन्ने विपक्षाव्यावर्त्तकत्वादिति वाच्यम् । विपक्षाव्यावर्तकविशेषणविशेष्यतावच्छेदकतापन्नधर्मस्य इतरविशेषणतानवच्छेदकतया तद्घटकत्वस्य विवक्षणीयत्वात्, उक्तोपाधिशरीरे च धूमवद्विशेष्यतावच्छेदकतापन्नभेदत्वादेः तदभावादिविशेषणतावच्छेदकतयैव प्रवेशात् । एवं पर्वतभेदादेस्तद्व्यक्तित्वादिना उपाधितावारणाय विपक्षनिष्ठाभावप्रतियोगितावच्छेदकत्वेनाप्युपाधितावच्छेदकं विशेषणीयम् । तादृशविशेषणेन पर्वतभेदत्वाद्यवच्छिन्नस्योपाधितावारणसम्भवेऽपि पर्वतभेदविशिष्टह्रदभेदादिवारणाय निरुक्तविपक्षाव्यावर्त्तकविशेषणशून्यत्वनिवेशनमिति ध्येयम् । एवं सति पक्षभेदस्य विपक्षह्रदादिभेदाविशिष्टतद्व्यक्तित्वेन विपक्षह्रदादिभेदविशिष्टभेदत्वेन चोपाधिताप्रसङ्गः, एतद्विशेषणेऽपि अणवः सकर्तृकाः कार्यत्वादित्यादौ अनणुत्वादेस्तत्प्रसङ्गवत्, तथापि लक्षणमतिव्यापकमेवेत्यग्रिममूलतात्पर्यविषयतया न क्षतिमावहति ।

विपक्षव्यावर्त्तकविशेषणवत्त्वस्य विपक्षनिष्ठाभावप्रतियोगितावच्छेदकत्वपर्यवसितस्योपाधितावच्छेदकविशेषणत्वं किमुपेक्षितमित्याशङ्कां निराकुरुते दीधितौ विपक्षव्यावर्त्तकधर्मान्तरावच्छिन्नेति । विपक्षावृत्तिसाध्यादिविशिष्टेत्यर्थः ।

उक्तविशेषणस्य पूर्वविशेषणवन्न बाधोन्नीतपक्षेतरव्यावर्तकता तत्रापि तत्सत्त्वादित्याह मूले तेनेति । तेन । उक्तविशेषणेन । बाधोन्नीतपक्षेतरस्येत्यनन्तरमपिः पूरणीयः । परिग्रहः । आक्रमणम्, स्वाश्रयीकरणमिति यावत् । तदेतत्स्फुटयति । तत्रेति । तत्र । बाधस्थले ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पक्षसम्पादके पक्षे साध्यव्यतिरेकोन्नयनयोग्यत्वे साधनाव्यापकत्वांशानुपयोगात् प्रकान्तमपि तदंशं विशिष्यानुपादाय साध्यव्यापकतामात्रस्येत्युक्तम् । मात्रपदेनोक्तविशेषणस्यैव व्यभिचाराद्युन्नयनोपयोगिताव्यवच्छेदः । व्यभिचारोन्नयने साधनाव्यापकतायाः सत्प्रतिपक्षोन्नयने च पक्षावृत्तितायाः उपयोगात्तद्व्यवच्छेदायोगात्साध्यव्यापकतेत्यनेनान्यतरसहितव्यापकताया विवक्षणीयत्वात् । दूषकत्वादित्यनेन स्वतो दूषकत्वविवक्षासम्भवात् । तदर्थमाह । दोषोन्नयनेति । व्यभिचारसत्प्रतिपक्षान्यतरोन्नयनेत्यर्थः । व्यभिचारस्योन्नयनं तदनुमितिः, सत्प्रतिपक्षोन्नयनं च साध्यानुमितिप्रतिरोधप्रयोजकसाध्यव्यापकाभाववत्ताज्ञानसम्पादनम् ।

मूले अनुमानमात्रोच्छेदकतयेति । सर्वत्रैवानुमाने पक्षेतरस्योपाधितयोद्भावनसम्भवात् पक्षेतरत्वव्यभिचारेण साध्यव्यभिचारानुमानमपि न सम्भवतीति दूषणसमर्थत्वेनेत्यर्थः । अनुमानपदं परार्थानुमानपरम्; स्वार्थानुमाने सर्वत्र पक्षेतरत्वे साध्यव्यापकताग्राहकसामग्र्या नियतत्वाभावेन अनुमानमात्रोच्छेदासम्भवात् ।

दूषणासमर्थमुत्तरं जातिरिति जातिलक्षणादुत्तरस्यैव जातित्वं न तु पक्षेतरोपाधेरिति मूलासङ्गतेर्वारणाय पूरयति दीधितौ । त्वदुत्तरस्येति ।

मूले न पक्षेतर उपाधिरिति । जात्युत्तरकत्वस्यालक्ष्यताप्रयोजकत्वादिति शेषः । तथा च तद्व्यावर्त्तनाय विशेषणदानमुचितमेवेति भावः । अत एवेत्यनेनोक्तमुपाधिताहेतुं विवृणोति । दूषणसमर्थत्वेनेति । उक्तयुक्त्या व्यभिचाराद्यनुमापकत्वेऽपि पक्षे साध्यव्यापकाभावज्ञानसम्पादनेन साध्यानुमितिप्रतिरोधसमर्थत्वेनेत्यर्थः । प्रकारान्तरम् । विशेषणान्तरानिवेशनम् । तच्च बाधोन्नीतपक्षेतरभिन्नत्वम् ।

पक्षेतरस्य लक्ष्यताव्यवस्थापनदशायां उपाधित्वाभावेऽपीति कथनासङ्गतेस्तदर्थमाह दीधितौ । उपाधित्वानङ्गीकारेऽपीति । भवतेत्यादिः ।

(चि०) अथोपाधिस्स्वव्यतिरेकेण सत्प्रतिपक्षोत्थापकतया दूषणम् ? पक्षेतरत्वव्यतिरेकश्च न सा-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जयकृष्णदास-हरिदास गुप्तः-चौखम्बासंस्कृतसीरीज आफिस बनारस सिटी ।

१ अस्यां चौखम्बा- संस्कृतग्रन्थमालायां प्रतिमासं पृष्ठशतके सुन्दरैः सीसकाक्षरैरुत्तमेषु पत्रेषु एकः स्तबको मुद्रयित्वा प्रकाश्यते । एकस्मिन् स्तबके एक एव ग्रन्थो मुद्र्यते ।
२ प्राचीना दुर्लभाश्चामुद्रिता मीमांसावेदान्तादिदर्शनव्याकरणधर्मशास्त्रसाहित्यपुराणादिग्रन्था एवाऽत्र सुपरिष्कृत्य मुद्र्यन्ते ।
३ काशिकराजकीयप्रधानसंस्कृतपाठशालाध्यापकाः पण्डिता अन्ये च शास्त्रदृष्टयो विद्वांस एतत्परि- शोधनादिकार्यकारिणो भवन्ति ।
४ भारतवर्षीयैः, ब्रह्मदेशीयैः, सिंहलद्वीपवासिभिश्चैतद्ग्राहकैर्देयं वार्षिकमग्रिमं मूल्यम्—मुद्राः ७ आणकाः ८
५ अन्यैर्देयं प्रतिस्तबकं ... ... " " १ " ०
६ प्रापणव्ययः पृथग् नास्ति । ... ...

) संस्काररत्नमाला । गोपीनाथभट्टकृता २
) शब्दकौस्तुभः । भट्टोजिदीक्षितकृतः प्रथमाध्यायमारभ्य तृतीयाध्यायद्वितीयपादचतुर्थाध्यायपर्यन्तम् ३२
) श्लोकवार्तिकं भट्टकुमारिलविरचितं पार्थसारथिमिश्रकृतन्यायरत्नाकराख्यया व्याख्यया सहितम् १५
) भाष्योपबृंहितं तत्त्वत्रयम् । विशिष्टाद्वैतदर्शनप्रकरणम् । श्रीमल्लोकाचार्यप्रणीतम् । श्रीनारायणतीर्थविरचितभाट्टभाषाप्रकाशसहितं सम्पूर्णम् (वेदान्तः) २
) करणप्रकाशः । श्रीब्रह्मदेवविरचितः ... १
) भाट्टचिन्तामणिः । महामहोपाध्यायश्रीगागाभट्टविरचित तर्कपादः (मीमांसा) २
) न्यायरत्नमाला श्रीपार्थसारथिमिश्रविरचिता सम्पूर्णा २
) ब्रह्मसूत्रभाष्यम्-बादरायणप्रणीतवेदान्तसूत्रस्य यतीन्द्रश्रीमद्विज्ञानभिक्षुकृतव्याख्यानं । सम्पूर्णम् । (वेदान्तः) ६
) स्याद्वादमञ्जरीमल्लिषेणनिर्मिता सम्पूर्णा । ... २
) सिद्धित्रयम्-विशिष्टाद्वैतब्रह्मनिरूपणपरम् श्रीभाष्यकृतां परमगुरुभिः श्री ६ श्रीयामुनमुनिभिर्विरचितम् । १
) न्यायमकरन्दः । श्रीमदानन्दबोधभट्टारकाचार्यसंगृहीतः । आचार्यचित्सुखमुनिविरचितव्याख्योपेतः (वेदान्तः) ४
) विभक्त्यर्थनिर्णयो न्यायानुसारिप्रथमादिसप्तविभक्तिविस्तृतविचाररूपः म० म० श्रीगिरिधरोपाध्यायविरचितः सम्पूर्णः (न्यायः) ५
विधिरसायनम् । श्रीमदप्पय्यदीक्षितकृतं सम्पूर्णम् २
न्यायसुधा (तन्त्रवार्तिकटीका) भट्टसोमेश्वरविरचिता । (मीमांसा) १६
शिवस्तोत्रावली । उत्पलदेवविरचिता श्रीक्षेमराजविरचितवृत्तिसमेता (वेदान्तः) २
मीमांसाबालप्रकाशः । जैमिनीयद्वादशाऽध्यायार्थसंग्रहः श्रीभट्टनारायणात्मजभट्टशङ्करविरचितः । (मीमांसा) २
प्रकरणपञ्चिका प्रभाकरमतानुसारि-मीमांसादर्शनम् । महामहोपाध्यायशालिकनाथमिश्रविरचितम् श्रीशङ्करभट्टकृतो मीमांसासारसंग्रहश्च सम्पूर्णः (मीमांसा) ३

(१८) अद्वैतसिद्धिसिद्धान्तसारः । पण्डितप्रवरश्रीसदानन्दव्याससप्रणीतस्तत्कृतव्याख्यासमलङ्कृतः । (वेदान्तः) ३
(१९) कात्यायनश्रौतसूत्रम् । महामहोपाध्यायश्रीकर्काचार्यविरचितभाष्यसहितम् ३५
(२०) ब्रह्मसूत्रभाष्यम् । श्रीभास्कराचार्यविरचितं ३
(२१) श्रीहर्षप्रणीतं खण्डनखण्डखाद्यम् । आनन्दपूर्णविरचितया खण्डनफक्किकाविभजनाख्यया व्याख्यया विद्यासागरीति प्रसिद्धया समेतम् । (वेदान्तः)
(२२) आख्यातचन्द्रिका श्रीभट्टमल्लविरचिता ...
(२३) श्रीलक्ष्मीसहस्रम्-बालबोधिनीव्याख्ययाऽवतरणिकया च सहितम् ८
(२४) ब्रह्मसूत्रवृत्तिः मरीचिका श्रीब्रजनाथभट्टकृता । २
(२५) क्रोडपत्रसंग्रहः । अत्र श्रीकालीशङ्करसिद्धान्तवागीशविरचितानि अनुमानजागदीश्याः प्रत्यक्षानुमानगादाधर्योः प्रत्यक्षानुमानमाथुर्या व्युत्पत्तिवादस्य शक्तिवादस्य मुक्तिवादस्य शब्दशक्तिप्रकाशिकायाः कुसुमाञ्जलेश्च क्रोडपत्राणि ४
(२६) ब्रह्मसूत्रम्, द्वैताद्वैतदर्शनम् । श्रीसुन्दरभट्टरचितसिद्धान्तजाह्नवीयुतम् २
(२७) षड्दर्शनसमुच्चयः । बौद्धनैयायिककापिलजैनवैशेषिकजैमिनीयदर्शनसंक्षेपः । मणिभद्रकृतटीकया सहितः । हरिभद्रसूरिकृतः १
(२८) शुद्धाद्वैतमार्तण्डप्रकाशव्याख्यासहित [illegible] १
(२९) अनुमानचिन्तामणिव्याख्यायाः शिरोमणिकृतदीधित्या जागदीशी टीका १२
(३०) वीरमित्रोदयः महामहोपाध्यायश्रीमित्रमिश्रविरचित [illegible]रिभाषा—संस्कारप्रकाशात्मकः । [illegible] ११
(३१) वीरमित्रोदयः । महामहोपाध्यायश्रीमित्रमिश्रविरचित आह्निकप्रकाशः ६
(३२) स्मृतिसारोद्धारः विद्वद्वरविश्वम्भर[illegible] ४
(३३) वेदान्तरत्नमञ्जूषा । श्रीभगवत्पुरुषोत्तमाचार्यकृता १

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(३४) प्रस्थानरत्नाकरः । गोस्वामिश्रीपुरुषोत्तमजीमहाराज-विरचितः २

(३५) वेदान्तपारिजातसौरभं नाम ब्रह्ममीमांसाभाष्यं श्रीनिम्बार्काचार्यविरचितम् १

(३६) योगदर्शनम् । परमहंसपरिव्राजकाचार्यनारायणतीर्थ-विरचित-योगसिद्धान्तचन्द्रिकासमाख्यया व्याख्यया संवलितम् २

(३७) वेदान्तदर्शनम् । परमहंसपरिव्राजकाचार्यश्रीरामानन्द-सरस्वतीस्वामिकृतब्रह्मामृतवर्षिणीसमाख्यव्याख्यासवलितम् ४

(३८) विश्वप्रकाशः । कोशः । विद्वद्वरश्रीमहेश्वरसूरिविरचितः २

(३९) श्रीसुबोधिनी । श्रीवल्लभाचार्यविनिर्मिता श्रीमद्भागवत-विरचितटिप्पणीसहिता । श्रीमद्भागवतदशमस्कन्धजन्म-प्रकरण श्रीसुबोधिनीटिप्पण्योः-प्रकाशः गोस्वामि श्री पुरुषोत्तमजीमहाराज विरचितः ... ३

(४०) वीरमित्रोदयः । महामहोपाध्यायश्रीमित्रमिश्रविरचितः पूजाप्रकाशः ४

(४१) वेदान्तसिद्धान्तसंग्रहः । श्रुतिसिद्धान्तापरनामकः । श्रीब्रह्मचारिवनमालिमिश्रविरचितः । वेदान्तकारिकावली श्रीपुरुषोत्तमप्रसाद शर्मकृता अध्यात्मसुधातरङ्गि-ण्याख्य टीकया सहिता ३

(४२) स्वानुभवादर्शः । श्रीमत्परमहंसपरिव्राजकाचार्यनाराय-णाश्रमशिष्यमाधवाश्रमविरचितः स्वकृतटीकावि-भूषितश्च २

(४३) याज्ञवल्क्यस्मृतिः । बालम्भट्टीसमाख्यव्याख्यासमलङ्कृतमिताचरासहिता । व्यवहाराध्यायः ... ११

(४४) गादाधरी । श्रीगदाधरभट्टाचार्यचक्रवर्तिकृता । श्रीगङ्गेशोपाध्यायविरचिततत्त्वचिन्तामण्या श्रीरघुनाथतार्किकशिरोमणिविरचितदीधित्या च गर्भिता ... ९

(४५) शास्त्रदीपिका । श्रीपार्थसारथिमिश्रप्रणीता । रामकृष्णविरचितयुक्तिस्नेहप्रपूरण्याख्यव्याख्यया सहिता तर्कपादः ५

(४६) वैयाकरणसिद्धान्तलघुमञ्जूषा महामहोपाध्याय-श्री-नागेशभट्टविरचिता । श्रीमद्दुर्बलाचार्य-बालम्भटाभ्यां विरचितकुञ्जिकाकलाद्वटीकाद्वयसंवलिता ... ११

(४७) व्याकरणसिद्धान्तसुधानिधिः । पर्वतीय विश्वेश्वरसूरि-विरचितः १०

(४८) वीरमित्रोदयः । लक्षणप्रकाशः । महामहोपाध्यायश्री-मित्रमिश्रविरचितः ७

(४९) बृहदारण्यकवार्त्तिकसारः श्रीमद्विद्यारण्यस्वामिविरचितः । महेश्वरतीर्थकृतयालघुसंग्रहाख्ययाटीकयासमलंकृतः१०

(५०) वीरमित्रोदयः । राजनीतिप्रकाशः । महामहोपाध्याय-श्रीमित्रमिश्रविरचितः... ... ... ५

(५१) पूर्वमीमांसाअधिकरणकौमुदी । श्रीमन्महामहोपाध्याय पं० रामकृष्णभट्टाचार्यविरचिता नेने इत्युपाख्य गोपालशास्त्रिणा परिशिष्टाधिकरणनिरूपणपूर्वकं टिप्पण्या परिष्कृत । १

(५२) प्रशस्तपादभाष्यटीकासंग्रहः । तत्र कणादरहस्यम् श्रीशंकरमिश्रविरचितम् १

(५३) क्रमदीपिका । श्रीमन्महामहोपाध्याय काश्मीरिककेशवभट्टविरचिता । विद्याविनोदश्रीगोविन्दभट्टाचार्यकृतविवरणोपेता ... ...

(५४) वीरमित्रोदयः । तीर्थप्रकाशः । महामहोपाध्याय श्रीमित्रमिश्रविरचितः ... ...

(५५) सांख्यसंग्रहः । तत्र सांख्यतत्त्वविवेचनम् श्रीषिमानन्द 'क्षेमेन्द्र' विरचितम् । सांख्यतत्त्वयाथार्थ्यदीपनम् भावगणेशविरचितम् । समाससूत्रव्याख्या सर्वोपकारिणी च ... ...

(५६) न्यायपरिशुद्धिः । श्रीमद्वेङ्कटनाथ श्रीवेदान्ताचार्यप्रणीता । श्रीनिवासाचार्यविरचित न्यायसारसमाख्यटीकया युता ... ...

(५७) निर्णयसिन्धु—कमलाकरभट्टविरचितः, कृष्णभट्टकृतव्याख्यासहितः ... ...

(५८) न्यायप्रकाश, श्रीमदापदेवविरचितः । श्रीमदनन्तदेवविरचितया "भाट्टालङ्काराख्य" व्याख्ययासहितः

(५९) सांख्यतत्त्वकौमुदी—षड्दर्शनकृद्वाचस्पतिमिश्रविरचिता । पण्डितराड़—वंशीधरमिश्रविरचित "तत्त्वविभाकर" टीकासहिता ... ...

—:०:—

जयकृष्णदास गुप्तः सेक्रेटरी
चौखम्बासंस्कृतसीरीज आफिस
बनारस सिटी ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Stock Verification-2024

Stock Verification-2024

STOCK VERIFY 2020 G.K.V. Library

RA 661,BHA-G

44640

Entered in Database

Signature with Date

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Digitized by Arya Samaj Foundation Chennai and eGangotri

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar